Printed by C. S. Deole at the Bombay Vaibhav Press, Servants of India Society's Home, *Sandhurst Road, Girgaon, Bombay,*

AND

Published by Newton Mohun Dutt, Curator of Libraries, for the Government of His Highness the Maharaja Gaekwad of Baroda

Price Rs. 2-4-0



H. H. THE MAHARAJA SAYAJIRAO GAEKWAD OF BARODA.
Golden Jubilee 1875-1925.

मुकुलः—विदर्भराजोद्यानरक्षकः

कोशलिका—दमयन्त्या दासी

वसुदत्तः—भीमरथस्यामात्यः

मङ्गलकः } —विदर्भराजपुरुषौ
भद्रः }

माधवसेनः—विदर्भराजान्तःपुरकञ्चुकी

बलः—काशीक्षितिपतिः

विजयवर्मा—मथुराधिपतिः

दधिपर्णः—अयोध्याधिपतिरिक्ष्वाकुकुलीनः

सपर्णः—दधिपर्णस्यामात्यः

जीवलकः—दधिपर्णनृपपुरुषः

बाहुकः—दधिपर्णस्य सूपकारो विपर्यस्तरूपधारी नलः

ऋतुपर्णः—अचलपुरस्वामी

धनदेवः—अचलपुरनिवासी सार्थवाहः

गन्धारः } —धनदेवसार्थवाहस्य मनुष्यौ
पिङ्गलकः }

भस्मकः—लम्बोदरः वयस्यकः



प्रस्तावना

भो भो गीर्वाणवाणीगौरवाभिज्ञा नाटकादिप्रबन्धप्रणयिनः प्राज्ञाः !

सुप्रसिद्धस्य पुण्यश्लोकस्य धीमतो नैषधस्य नलनृपस्य चारुचरितानि प्राचीनैरर्वाचीनैर्भू-गिभिर्भारतभूषणैर्भारतीभारतीभारतीयैः कृतिभिः संस्कृत-प्राकृतादिभाषासु काव्य-कथा-चम्पू-नाटकादिभिर्भिन्नभिन्नप्रकारैः संक्षिप्त-विस्तृतया भिन्नभिन्नशैल्या विरचितानि दृष्टि-श्रुतिपथमवतरन्ति ।

महामान्या दमयन्त्याः पातिव्रत्यपवित्रचरितपूतानि चूतादिदोषदर्शकानि चैतानि जैनैर्जैनेतरैश्च कैः कैर्विबुधैः किं किमभिधानमभिधाय विहितानीति जिज्ञासया कृतायां गवेषणायामद्यावध्यस्माभिर्दृष्टानि ज्ञातानि श्रुतानि चात्र नामोल्लेखपुरःसरं प्रदर्शितानि विज्ञजनप्रमोदावहानीति विचार्य प्रदर्श्यन्ते ।

नल-साहित्यम् (सं.) ।

नलोपाख्यानम्—(महर्षिव्यासप्रणीतमहाभारतान्तर्गतम्)
" (गुणाढ्यकविविरचितबृहत्कथान्तर्गतम्)
" (क्षेमेन्द्रकविविहितभारतमञ्जर्यन्तर्गतम्)
" (क्षेमेन्द्रकविनिर्मितबृहत्कथामञ्जर्यन्तर्गतम्)
" (सोमदेवभट्टकृतकथासरित्सागरान्तर्गतम्)

नैषधीयचरितम्—(महाकविश्रीहर्षरचितम्)

नल-दमयन्ती-कथा-चम्पूः—(त्रिविक्रमभट्टकृता)

नलोदयकाव्यम्—(कविकालिदास ! रविदेवकृतम्)

नलाभ्युदयः—(महाकविवामनभट्टबाणविरचितः)

नलचरितनाटकम्—(नीलकण्ठदीक्षितकृतम् सें. ला. सं. पु. संग्रहस्थम्)

नलानन्दनाटकम्—(जीवविबुधकृतम्)

नलवर्णनकाव्यम्—(लक्ष्मीधरविरचितम्)

नलभूमिपालरूपकम्—

नलविक्रमनाटकम्—(अष्टाङ्कम्)

नलचरितकाव्यम्—

सहृदयानन्दम्—(कृष्णानन्दकविकृतम्)

राघव-नैषधीयम्—(हरदत्तसूरिरचितम्)

नल-यादव-पाण्डव-राघवीयम्—

नलस्तोत्रम्—

दमयन्तीपरिणयकाव्यम्—

भैमीपरिणयनाटकम्—(नलविजयापराभिधं महिसूरराजशास्त्रिमण्डिकलूरामशास्त्रिविरचितमाधुनिकम्)

पुण्यश्लोकोदयनाटकम्—(देवीशरणकविचक्रवर्तिनिर्मितमाधुनिकम्)

नल-दमयन्तीयम्—(इदानीन्तनम्)

[illegible]

...काव्यमालायाम् ऑफ़्रेंसु॰ ६५६५ क्रमाङ्के सूचितम् । ११ ऑफ़्रेटसूचिपत्रे (नं. ५४७५) सूचितम् । १२ कील्हॉर्नसूचिपत्रे (नं ५८) सूचितम् । १३ महिशूरपुरे राजकीयशासामुद्राक्षरशालायां मुद्रितम् ।

(२)

जैनविदुषां सं. प्रा. कृतयः ।

* नलचरितम्—(प्रा० गद्यं धर्मसेनगणिविरचित[1]वसुदेवहिण्डी—मध्यमखण्डान्तर्गतम्)

नलचरितम्—(श्रीहेमचन्द्राचार्यविरचिते[2]त्रिषष्टिशलाकापुरुषचरित्रान्तर्गतम् पर्व ८,स० ३)

* नलायनमहाकाव्यम्—(कुबेरपुराणेत्यपराह्वं महाकविमाणिक्यसूरिविरचितम्)

नलविलासनाटकम्[3]—(प्रस्तुतं रामचन्द्रसूरिविरचितम्)

दवदन्तीचरितम्—(सोमप्रभाचार्यविरचिते[3]कुमारपालप्रतिबोधान्तर्गतम्)

नलोपाख्यानम्—(देवप्रभसूरिविरचिते[4]पाण्डवचरितान्तर्गतम्)

दवदन्तीचरितम्—(विनयचन्द्रसूरिरचिते[5]मल्लिनाथमहाकाव्यान्तर्गतम्)

* दवदंतीचरियं—(प्रा० पत्तनभाण्डागारीयसूचिपत्रे सूचितम्)

* दमयन्तीप्रबन्धः—(गद्यः)
* „ (पद्यः) } जैनग्रन्थावल्यां सूचितौ ।

दवदन्तीकथा—(सोमतिलकसूरिविरचित[6]शीलोपदेशमालावृत्त्यन्तर्गता)

„ (जिनसागरसूरिविरचितायां कर्पूरप्रकर[6]टीकायाम्)

दमयन्तीकथा—(शुभशीलगणिविरचित[7]भरतेश्वर—बाहुबलिवृत्त्यन्तर्गता)

नलचरितम्—(देवविजयगणिविहित[8]पाण्डवचरितान्तर्गतम्)

„ (गुणविजयगणिगदित—गद्यनेमिनाथचरितान्तर्गतम्)

सूचितेभ्योऽन्यत्रापि *हरिवंशपुराण—पाण्डवपुराण—नेमिनाथपुराण—त्रिषष्टिलक्षण-पुराण—जैननैषधीयचरित-कथाकोष—कथावली—नेमिनाथचरित्र—वसुदेव—कनकवत्यादि-कथान्तर्गतं स्वतन्त्रकथा—चरितरूपं च नल—दमयन्त्याख्यानं सम्भाव्यते ।

---

* एतच्चिह्नाङ्किता ग्रन्था यावज्ज्ञातमद्यावधि मुद्रणेनाप्रसिद्धाः ।

१ अत्रत्यजैनज्ञानमन्दिरे मुनिराजश्रीहंसविजय—शास्त्रसङ्ग्रहे प्रतिः (कनकवतीलम्भकः प. १३५–१४९)

२ भावनगरस्थया जैनधर्मप्रसारकसभया प्रकाशितम् ।

३ अनया ' गा. ओ. सिरीझ् ' संस्थया प्रकाशितम् ।

४ निर्णयसागरमुद्रणालयतः प्रसिद्धम् ।

५ यशोविजयजैनग्रन्थमालया, भावनगरस्थयाऽऽत्मानन्दसभया च प्रसिद्धिमानीतम् ।

६ जामनगरस्थेन पं. हीरालालेन प्रकाशिता ।

७ अहमदावादस्थया जैनविद्याशालया गूर्जरभाषानुवादरूपा प्रकाशिता ।

८ पण्डितामृतलालेन (ए. एम्. एण्ड कम्पनी संस्थया) प्रकाशितम्

नलमहिमप्रख्यापकं नलपाकशास्त्रमपि श्रूयते । गूर्जरभाषायां ऋषिवर्धन(वि. स. १५१२)—मुनिमेघराज(वि. सं. १६६४)—नयसुन्दर(वि. सं. १६६५)—समयसुन्दर(वि. सं. १६७३)—ज्ञानसागर(वि. सं. १७२०)दिनैनकविभिर्भालण(वि. सं. १५४५ ?)—नाकर—(वि.सं. १५८१)—प्रेमानन्दा(वि.सं. १७२८ ? ४२)दिभिश्च जैनेतरकविभी रामाख्यानादिरूपेण नल—दमयन्तीवृत्तानि पप्रथिरे । महाराष्ट्रभाषायां पं. रघुनाथादिभिरेवमन्यासु देशभाषास्वपीतराण्यपि सम्भवेयुर्लभेरंश्च प्रयत्नशीलैः गवेषणायां प्रयतेरन् ।

नलचरित–भेदः ।

महाभारतान्तर्गतनलोपाख्यानादन्यनलचरितग्रन्थेष्वपि च नलविलासस्य रचनायां विभिन्नता विलोक्यते । महाभारतादौ नलजनकस्य नाम ' वीरसेन ' इति, नलविलासे नलजनकं विहाय जैनकर्तृकान्यनलचरितग्रन्थेषु च ' निषध ' इति, नलभ्रातुरभिधा ' पुष्कर ' इति महाभारतादौ, युवराज ' कूबर ' इति वसुदेवहिण्डी-नलविलासादौ; महाभारतादौ नलविलासेऽपि च नलदेशो ' निषध ' इति, वसुदेवहिण्डीप्रभृतिषु तु ' कोशल ' इति दृश्यते ।

महाभारतादौ दमयन्तीजनन्या अभिधानं नेक्ष्यते, वसुदेवहिण्डीप्रभृतिषु ' पुष्पदन्ती ' इति, नलविलासे तु ' पुष्पवती (पुप्फवदी)' इति निरदेशि । ' दमयन्ती ' इत्यभिधानं महाभारतादौ नलविलासे च समानम्, वसुदेवहिण्डी-हैमत्रि. श. पु. चरित्रादौ तु ' दम(व)न्ती ' इत्यपि वीक्ष्यते ।

महाभारतादौ नल–दमयन्त्योरनुरागे हंसपक्षी निमित्तकारणम्, नलविलासे कलहंसमंज्ञको नलवयस्यः समसूत्रि । महाभारतादौ वर्णितं लोकपालैः कारितं नलदौत्यं, स्वयंवरे पद्मनलीत्यादि च नलविलासे वसुदेवहिण्डीप्रभृतिषु च न प्रपञ्चितम् ।

महाभारतादौ दमयन्त्याः कामुको द्यूतद्वारा नल–दमयन्त्योर्वियोगादिदुःखदर्शकश्च कलिः सूचितः, नलविलासे तु तत्स्थाने दमयन्त्यभिलपुकाम्य चेदिराज(कलचुरिसिंति)चित्रसेनस्य चरकापालिकानां विलसितं विलोक्यते ।

महाभारतादौ दमयन्तीभ्रातॄणां नामानि दर्शितानि, नल–दमयन्त्योः सन्ततिसंज्ञा ' इन्द्रसेन ' ' इन्द्रसेना ' चेति, वसुदेवहिण्डीप्रभृतिषु केवलं ' पुक्खर(ल)' इति पुत्रनाम, नलविलासे तु तदप्युपेक्षितम् ।

महाभारतादौ नलरूपविकृतिकारणं कर्कोटकनागः सूचितः, नलविलासे वसुदेवहिण्डीप्रभृतिषु च—देवभूयत्वं गतो नलपिता निषधो भुजगरूपं विधाय नलं विकृतरूपं कृतवान्, देवरूपेण च तद्धेतुं निमस्वरूपं द्वादशवर्षीयं दमयन्त्या वियोगं च सूचितवान् ।

नलो विषयोध्याधिपते ऋतुपर्णस्य पार्श्वेऽवसदिति महाभारतादौ, दधिपर्णस्य निकटे इति नलविलासे, सुंसुमारपुरस्वामिन ऋतुपर्णस्य सन्निधाविति वसुदेवहिण्ड्याम्, सुंसु(शिशु)मारपुरस्वामिनो दधिपर्णस्य समीपे इति हैमत्रि. श. पु. चरित्रादौ दृश्यते ।

नलवियोगे दमयन्ती चेदिराजसुबाहुगृहमाश्रयदिति महाभारतादौ, अचलपुरस्वामिनो रिपुशत्रो(?)र्गृहमिति वसुदेवहिण्ड्याम्, ऋतुपर्णस्य गृहमिति नलविलासे; वसुदेवहिण्डीप्रभृतिषु रिपुशत्रोः(ऋतुपर्णस्य) पत्नी चन्द्रयशा दमयन्त्या मातृष्वसेति च निरदेशि ।

नलस्य रूपविकृतौ ' बाहुक ' इति नाम महाभारतादौ, नलविलासेऽपि तदेव, वसुदेवहिण्डीप्रभृतिषु तु ' हुण्डिक ' इति पठ्यते ।

' धनदेव ' इत्यचलपुरगामिसार्थवाहस्याभिधा नलविलासे वसुदेवहिण्डीप्रभृतिषु च समाना ।

महाभारते ' जीवल ' इति ऋतुपर्णनृपसारथिनः संज्ञा, नलविलासे तु दधिपर्णराजपुरुषस्य । हैमत्रि. श. पु. चरित्रे नलविलासे च विदर्भराजपुरुषस्य ' मङ्गल ' इति समाना संज्ञा ।

शीघ्रं शतयोजनगमने नलस्याश्वविद्यायाः प्रभाव इति महाभारतादौ, दिव्यतेजस्वितातत्प्रभावात् पवनजयिनो वाजिन इति नलविलासेऽवर्ण्यत । कुण्डिनपुरे नल–ऋतुपर्णयोः प्रवेशः सायंकाले इति महाभारतादौ, तत्र प्रातःकाले प्रवेश इति वसुदेवहिण्ड्यादौ, नल–दधिपर्णयोरिति तु नलविलासेऽवर्णि । नल-दमयन्त्योः पुनः सङ्गमश्चतुर्थे वर्षे इति महाभारतादौ, द्वादशे वर्षे इति नलविलासादौ समसूच्यत ।

महाभारतादौ–' ऋतुपर्णार्थं प्रेषितं बाहुकरूपिनलोपसंस्कृतं पाचितं मांसं प्राश्य नलसिद्धमांसपरिचिता दमयन्ती नलमुपलक्षितवतीत्यादि, वसुदेवहिण्डीप्रभृतिषु तु सूर्यपाकौदनरसवतीमुपभुज्येति; नलविलासे तु दधिपर्णसूपकारस्य सूर्यपाकविद्याप्रसिद्धिं श्रुत्वा दमयन्ती तत्परीक्षणार्थं कलहंसादीन् प्रेषयति स्म । पश्चाद्वैदर्भीकृतस्वयंवरप्रवादं कारयित्वा दधिपर्णमामन्त्र्य नलमाकर्णितवती, नलमरणप्रवादं श्रुत्वा तु चिताऽधिरोहणं प्रगुणयति, तदैव च दधिपर्णसारथीभूतो नलः कुण्डिनपुरसीमानं प्राप्य, वृत्तान्तं चाधिगम्य दमयन्त्याः प्रेमप्रकर्षं परीक्ष्य चितारोहमरणाद् बाहुकरूपं विहाय स्वस्वरूपं प्रकाशयति स्मेत्यादि प्रदर्श्यते । एवमन्योऽपि चरितभेदो दृश्यते ।

नलविलासस्य नाटकत्वात् तदुचितानीतरपात्राभिधानानि तु परिकल्पितानि प्रतीयन्ते, मैत्रकर्कन्दकलहंसमकरिकादयोऽपि च क्वचिदंशे भिन्नताऽत्र प्रदर्श्यते ।

नलविलासस्य वैशिष्ट्यम् ।

रसोर्मिभिः परिप्लुतं रसिकजनरञ्जकं माधुर्याञ्चितं लालित्यललितमलङ्काराद्यलङ्-समोजः-प्रसादप्रभृतिभिः समुचितैः समग्रगुणैः समुपेतं वैदर्भीरीतिप्रधानं सप्ताङ्कसङ्कलितं गर्भाङ्क-गौरवितं धीरललितनरनायकं पुनर्दमयन्तीसङ्घटनापर्यन्तसम्बद्धं रमणीयतमं प्रस्तुतमेतन्नलविलास-नाटकं स्वपूर्वमिवाद्भुतं प्रतिभास्यति प्रतिभावतां प्रेक्षावतामित्यस्मदाकूतम् ।

दण्डि–वामन–रुद्रट–राजशेखर–भोजदेव–विश्वनाथ–जगन्नाथादिविद्वद्भिर्यस्या रीतेः प्रकृष्टत्वं स्वीयकाव्यादर्श–काव्यालङ्कार–काव्यमीमांसा–सरस्वतीकण्ठाभरण–साहित्यदर्पण–रस-गङ्गाधरादिग्रन्थेषु प्रादर्शि; तामेव वैदर्भीरीतिं

" वैदर्भीं रीतिमहं लभेय सौभाग्यसुरभितावयवाम् ।
दमयन्ती वैरस्यं दिशति गिरां या परां लक्ष्मीम् ॥ "

इत्यनेन प्रारम्भश्लोकेन संसूच्य स्वाभिप्रेतां च तामुररीकृत्य कविपुङ्गवेनैतत् प्रारेभे, तथैव च निर्व्यूढमिति विज्ञाततरं भविष्यति विचक्षण-विशारदानाम् ।

---

१ अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भ–गौडीयौ वर्ण्येते प्रस्फुटान्तरौ ॥
श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजः—कान्ति–समाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।
एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि ॥

—आचार्यदण्डिनः काव्यादर्शे (प्रथमपरिच्छेदे श्लो० ४०—४२)

२ रीतिरात्मा काव्यस्य ॥ ६ ॥ विशिष्टा पदरचना रीतिः ॥ ७ ॥ विशेषो गुणात्मा ॥ ८ ॥ सा त्रिधा ॥ ९ ॥

सा चेयं रीतिस्त्रिधा भिद्यते वैदर्भी गौडीया पाञ्चाली चेति । किं पुनर्देशवशाद् द्रव्यवद् गुणोत्पत्तिः काव्यानाम् ? येनायं देशविशेषव्यपदेशः । नैव, यदाह—विदर्भादिषु दृष्टत्वात् तत्समाख्या ॥ १० ॥

विदर्भ-गौड-पाञ्चालेषु देशेषु तत्रत्यैः कविभिर्यथास्वरूपमुपलब्धत्वात् तत्समाख्या, न पुनर्देशैः किञ्चिदुप-क्रियते काव्यानाम् । तासां गुणभेदाद् भेदमाह—समग्रगुणा वैदर्भी ॥ ११ ॥

समग्रैरोजः—प्रसादप्रभृतिभिर्गुणैरुपेता वैदर्भी नाम रीतिः । अत्र च श्लोकौ—

अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥

अलङ्कारादिसौभाग्यं तामेकामेव स्तुवन्ति कवयः—

सति वक्तरि सत्यर्थे सति शब्दानुशासने ।
अस्ति तन्न विना येन परिस्रवति वाङ्मधु ॥

तासां पूर्वा ग्राह्या गुणसाकल्यात् ॥ १४ ॥ न पुनरितरे स्तोकगुणत्वात् ॥ १५ ॥ तासां तिसृणां रीतीनां पूर्वा वैदर्भी ग्राह्या, गुणानां साकल्यात् ।

—वामनाचार्यकृतौ काव्यालङ्कारसूत्रवृत्तौ (प्रथमेऽधिकरणे द्वितीयाध्याये)

३ असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥ —रुद्रटः

वैदर्भी-पाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः ।
लाटीया-गौडीये रौद्रे कुर्याद् यथौचित्यम् ॥ ”

—रुद्रटकृते काव्यालङ्कारे (अ. १५, श्लो० २०)

आक्षयातान्युपसर्गैः संमुच्यन्ते कदाचिदर्थाय ।
वृत्तेरसमासाया वैदर्भी रीतिरेकैव ॥ —रुद्रटः (अ. २, श्लो० ६)

४ यदर्य्यं च स (काव्यपुरुषः) तया (साहित्यविद्यावध्वा) वशंवदीकृतः स्थानानुप्रासवदसमासं योगवृत्तिगर्भं च जगाद सा वैदर्भी रीतिः । तां ते मुनय इति समाने पूर्वेण । तत्र वेषविन्यासक्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः ।

—काव्यमीमांसायां तृतीयाध्याये (पृ ९) राजशेखरः ।

५ वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः ।
रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ॥
वैदर्भी साऽथ पाञ्चाली गौडीयाऽवन्तिका तथा ।
लाटीया मागधिका चेति षोढा रीतिर्निगद्यते ॥
तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥ तासु वैदर्भी यथा—

मलयानिलाः सन्ति गृहेषु देवतास्तथाः क्व कले ! क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥

ईदृगसमस्ता समस्तश्लेषादिगुणवती वैदर्भी रीतिः ।

—महाराजभोजदेवकृते सरस्वतीकण्ठाभरणे (द्वितीयपरिच्छेदे)

६ माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥

—साहित्यदर्पणे (नवमपरिच्छेदे) विश्वनाथः ।

७ ऋषि [illegible] सामासिकेऽपि च वृत्ते रहिता ।
माधुर्यवाग्भधुरसुन्दरपदवर्णविन्यासा ॥
[illegible] निर्मलपदा प्रसादयुता ।
सा त्रिगुणा वैदर्भी [illegible] वृत्ति [illegible] ॥

* [illegible] , [illegible] ।

—[illegible] (पृ. ७१)

नलविलासस्य माधुर्यम् ।

अस्य प्रस्तावनायां कौमुदी–मित्राणन्दस्यामुखे च सूत्रधारमुखात् कविना यथोच्चारितम्–' प्रबन्धानाधातुम्–' (नल० श्लो० ६) तथैव खल्वत्र नाट्यमाणाः सर्वेऽपि रसाः स्वस्वभूमिकायां परकोटौ घटिताः प्रतिभान्ति । किंच विशेषतोऽत्र प्रथमे षष्ठेऽङ्के च प्रवाहितः करुणरसस्य प्रकर्षः पर्यार्द्रयत्यभिप्रायविदः पाषाणहृदयानपि ।

नलविलासस्यातीव मनोज्ञं स्वयंवरवर्णनं स्वेतत्कविसमकालीनः सुमतिनाथचरित्र(प्रा.)–कुमारपालप्रतिबोध(प्रा.)–शतार्थवृत्त–सूक्तमुक्तावल्यपरनामसिन्दूरप्रकरादिसमर्थग्रन्थकारः सोमप्रभाचार्योऽपि वि. सं. १२४१ वर्षे प्रणीते जिनधर्मप्रतिबोधापरनामकुमारपालप्रतिबोधे (गा. ओ. सिरीझ्द्वारा प्रकाशिते) तदन्तर्गतनलचरिते स्वल्पाक्षरपरिवर्तनेन*समुदतारयत् । तदानीन्तनानां प्रौढग्रन्थकाराणामप्यनुकरणीयत्वेनादरपात्रमिति किं न चेतोहरं प्रभवेदिदमिदानीमिदानीन्तनानाम् ?

---

(१) दम०—अम्ब ! परवंचगवग्गणिणो कालिआरिणो गुरुग्रहनि ।

माधव०—न मेऽस्मिन् मनोरतिरिति × ×　　—नलविलासे पृ. ४८

(१) भेद ! परवंचगवग्गणिणो कालिकागिणो गुरुं(थं)ति ता न मे इमंमि रमइ मणं ति × ×

—कुमारपालप्रतिबोधे पृ. ४९

(२) अणिमित्तरोसिरो एस, ता न पारेमि पए पए अणुऊलिदुं ।　　—नल० पृ. ४९

(२) + अकारणरोसणो कुमारो, ता न पारेमि इमं पए पए अणुकूलिउं । कुमारपाल० पृ० ४९

(३) + + गुरुआरंभारंभणयभीरुयं मे सरीरयं न किं तुमं जाणा(ण)सि ?　　—नल० पृ. ४९

(३) + गुरुआरंभारभीरुयं मे सरीरयं किं न तुम जाणसि ? ।　　—कु० पृ. ४९

(४) दम०—करभिअले ! अदिरमणीया तुमए वरमाला विणिम्मिदा ।

माधव०—अप्रतिवचनमेवास्य भवने प्रत्याख्यानम् ।　　—नल० पृ. ४९

(४) + करभिअले ! अइरमणीया वरमाला विणिम्मविया । + + अप्पडिवयणमेव इमस्स नरिंदस्स पडिसेहो

—कु० पृ ५०

(५) + तावसमाणवयपरिणामस्स ममो एतस्स ।　　—नल० पृ. ५०

(५) + + तावसमाणवयपरिणामस्स ममो एयस्स ।　　—कु० पृ. ५०

(६) अम्मो ! ईदिसे वि कमिणभीरूणं माणुसाणं भोदि ! अम्ब ! तुरिदमग्गदो ब्रज, वेवदि मे हिदयं ।

—नल० पृ. ५१

(६) अम्मो ! एरिसे वि कमिणभे(भी)रूणं माणुसाणं रूवं होइ त्ति तुरियं अग्गओ गच्छ । वेवइ मे हिययं ।　　—कुमार० पृ. ५०

(७) हीमाणहे ! परिस्संत म्हि एदिणा सयंवरमंडवभूमिविहरणेण, किंचिरं अम्ब वि अज्जो माधवसेणो जंपिस्सदि ?　　—नल० पृ. ५२

(७) हद्धि ! परिस्संत म्हि इमिणा सयंवरमंडवसंचरणेण, ता किच्चिरं अम्ब वि भद्दो जंपिस्सइ ?

—कुमारपाल० पृ. ५०

नलविलास-सूक्तयः ।

नलविलासे वर्णितानि सन्ध्या-चन्द्रोदयादिवर्णनानि, नायक-नायिकादीनां वक्रोक्ति-गूढभणिति-वैदग्ध्यविलसितानि, प्रसङ्गोचितानि व्यवहारोपयोगीनि शिक्षासूत्राणीवार्यगाम्भीर्यभृतानि सुभाषितानि पद्यानि, हृद्यानि च गद्यानि विचारकपाठकानामतीवप्रमोदप्रदानि विज्ञानकलाकौशल-प्रवर्धकानि च प्रभवेयुः। नाट्यादिविषयकाणि कानिचित् तु तत उद्धृत्य वर्णिकामात्रमत्रापि प्रदर्श्यन्ते ।

- नाट्योपयोगि—

नाट्ये रसस्यैव प्राधान्यमिति स्वाभिप्रेतं मतं समसूचि नाट्यलक्षणनिर्माणनिष्णातेनानेन सूरिणाऽत्र प्रसङ्गतः । तद् यथा—

" सपर्णः—देव ! रसप्राणो नाट्यविधिः । वर्णार्थबन्धवैदग्धीवासितान्तःकरणा ये पुनरभिनेयेष्वपि प्रबन्धेषु रसमपजहति विद्वांस एव ते, न कवयः ।

न तथा वृत्तवैचित्री श्लाघ्या नाट्ये यथा रसः ।
विपाककम्रमप्याम्रमुद्वेजयति नीरसम् ॥ "—नल० पृ. ७७

प्रसङ्गोचिताश्चान्या अपि नाटक-रूपक-नटादिभावगर्भिता उपमा उपक्षिप्ताः प्रेक्ष्यन्तेऽत्र यथा—

" नाटकस्येव मम दाद्भुतरसशरणं सम्भावयामि निर्वहणम् । "
—नल० पृ. ४९

" आमन्त्रिता वयमतः प्रमदः परेऽपि
सन्त्यागताः क्षितिभुजोऽथ विषादतापः ।
अङ्गं विधानमिव सन्धिषु रूपकाणा
तुल्यं स्वयंवरविधिः सुख-दुःखहेतुः ॥ "
—नल० पृ. ६०

" तदिदमनिशं स्मारं स्मारं कुशीलववन्मनो
हसति रमते रोदित्युच्चैर्विषीदति सीदति ॥ "—नल० पृ. ४९

" कलहंसः—अहो ! विकटस्य संसारनाटकस्य परस्परविरुद्धरससमावेशवैरस्यम् ! शृङ्गाराद्भुतरसनिस्यन्दसुन्दरः क्व नाम स स्वयंवरविवाहमहोत्सवाडम्बरः, क्व चैष परम-करुणरसप्रावीण्यप्रणयपिच्छिलो दुरोदरप्रवर्तितो दमयन्तीमात्रपरिकरस्य देवस्य निषधाधिपतेः प्रवासवैशसोपप्लवः । "
—नल० पृ. ९९

अनेकान्तवादः—

"भजन्ते कार्याणि प्रकृतिविभवं कारणगतं
प्रवादो लोकानां ध्रुवमयमनेकान्तकलुषः ।
मृदुत्वं तत् किञ्चिज्जलदपयसां विराविदितं
न कश्चिन्मुक्तानामथ च किल काठिन्यनिकषः ॥"—नल० पृ. २७

"सुस्थे हृदि सुधासिक्तं दुःस्थे विषमयं जगत्। वस्तु रम्यमरम्यं वा मनःसंकल्पतस्ततः॥"
—नल० पृ. १९

कर्मसत्ता—

"तावन्मतिः स्फुरति नीतिपथाध्वनीना
तावत् परोक्षमपि पश्यतया विभाति ।
यावत् पुरा कृतमकर्म न सर्वसर्व-
प्रत्यूहकारि परिपाकमुपैति जन्तोः ॥" —नल० पृ. ११

"तैस्तैः शुभैरशुभैर्वा कर्मभिर्भिन्नवर्तनीसञ्चरिष्णवः सर्वे जन्तवः ।"
—नल० पृ. ८२

विद्याजीविनामल्पचेतनिकत्वम्—

"अल्पचेतना हि विद्याजीविनः प्रायेण ।
देवीं वाचमविक्रेयां विक्रीणीते धनेन यः ।
क्रुद्धेव तस्मै सा मूल्यमप्यल्पमुपढौकयेत् ॥" —नल० पृ. ८

प्रेम—

"यस्त्रिजगद्बन्धनेन प्रेम्णा न बध्यते, तस्य मृणालतन्तुपेशलमम्बरं किमादधीत ?"
—नल० पृ. ६१

राजधर्मः—

"यतो द्रष्टुं स्त्रीणां वधविधिमयोग्याः क्षितिभुजः ।" —नल० पृ. ७६

द्यूतम्—

"दुरोदरकृतः क्व वा त्रपा क्व कृपा ?" —नल० पृ. ६६

स्थानमहिमा—

"दोषा अप्यतिशेरते क्वचिदपि स्थाने प्ररूढा गुणान् ।" —नल० पृ. ९१

सदाचारः—

"एगागिणो परमहिलाणं मज्झे गमणं न समुचिदं ।" —नल० पृ. ११

तपस्विधर्मः—

" अनुचितं गृहस्थकृत्यचिन्तनं तपस्विनः । " —नल० पृ. ६१

स्त्रीबन्धनम्—

" यद्वा स्त्रियो बन्धनम् " —नल० पृ. ६६

" भुजमात्रपरिच्छदैर्यत्रैव तत्रैव यथैव तथैव स्वैरमास्यते, स्त्रीबद्धानां कुतः कामचार —नल० पृ. ६१

दाक्षिणात्याया अभिज्ञानम्—

" यथेदं मौक्तिकप्रायमाभरणम्, यथा दन्तपत्राञ्चितौ कर्णपाशौ; तथा जाने दाक्षिणात्यायाः कस्या अपि योषितः प्रतिकृतिरियम् " —नल० पृ. १०

सूर्यग्रहणसमयः—

" न नाम सैंहिकेयोपरागे सवितैव केवलं क्लाम्यति, किन्तु तदधीनाशेषव्यवहारविमर्दमपि कादम्बपीवलयम् । " —नल० पृ. ९९

कैतवम्—

" सर्वथा कैतवं निन्द्यं प्रवदन्तु विपश्चितः ।
केवलं न विना तेन दुःसाध्यं वस्तु सिध्यति ॥
निर्मायो यः कृपालुर्यः सत्यो यः सनयश्च यः ।
प्रायेण तत्र लोकस्य क्लीबबुद्धिर्विजृम्भते ॥ " —नल० पृ. १०

दुर्जनः—

" छिन्नेषु रावणे तुष्टः शम्भुर्दशसु मूर्धसु ।
शतेऽपि शिरसां छिन्ने दुर्जनस्तु न तुष्यति ॥" —नल० पृ. ८९

मूक्ति—गतिगौरव—

" अनल्पं जल्पामः किमपि किल पाषाणसुहृदां
सदा तेषां मूर्धन्यगति पुरुषाणामनतिः ।
असारं संसारं विदधति न सारं प्रतिमुहुः
निबध्नो ये मार्गेऽपि न कवीनामि पुरुषः ॥
न गतिरसमत्वमसदृशा न तत्त्वस्तव ये किल ।
सदृशोभ्योऽन्येभ्यः पुरुषेभ्यो नमो नमः ॥ " —नल० पृ. ११

नलविलासस्य समुदाहरणानि ।

नलविलासरचयित्रा श्रीमता रामचन्द्रसूरिणा पं. गुणचन्द्रेण सार्धं विरचितायां स्वोपज्ञनाट्यदर्पणविवृतौ नाटक–प्रकरण–नाटिका–प्रकरणी–व्यायोग–समवकार–भाण–प्रहसन–डिमाङ्केहामृग–वीथीसंज्ञकद्वादशरूपकस्वरूपनिरूपणाय *पञ्चपञ्चाशन्नाटकादिप्रबन्धानामुदाहरणानि प्रादर्श्यन्त । तन्मध्ये च स्वोपज्ञकृतीनामपि दृष्टान्तानि प्रदर्शितानि । किञ्च [1]प्रयोज्य–[2]हेतु–[3]विरुद्धवर्णन–[4]बिन्दु–चूलो–पताकाऽवस्था–प्रयत्न-प्राप्त्याशा-[5]विमर्श–नर्म–[6]प्रतिवाक्श्रेणि–[7]परिभाषा–व्याहार–गुण–दोष–[8]व्यत्यय–प्ररोचनाऽऽदिनिदर्शनाय नलविलासस्यांशानुपयोज्य कविरेतस्य गौरवं विशेषतः प्राख्यापयत् ।

---

* नलविलासकर्त्रा नाट्यदर्पणोदाहृतौ निर्दिष्टानि नाटकादिनामानीमानि ।

(१) अनङ्गवतीनाटिका (२) अनङ्गसेना–हरिनन्दिप्रकरणम् (श्रीसुचितवासकुमारविरचितम् (३) अनर्घराघवम् (४) अभिज्ञानशाकुन्तलम् (५) अभिनवराघवम् (भट्टेन्दुराजशिष्यक्षीरस्वामिविरचितम्) (६) अर्जुनचरितम् (७) इन्दुलेखानाटिका (८) उत्तर(उत्तरराम)चरितम् (९) उदयनचरितम् (१०) उदात्तराघवम् (११) कादम्बरी (१२) कुन्दमाला (धीरनागनिबद्धा) (१३) कुमारसम्भवम् (१४) कृत्यारावणम् (१५) कौशलिकानाटिका (भट्टश्रीभवनुतचूडाविरचिता) (१६) चित्रोत्पलावलम्बितकप्रकरणम् (अमात्यशङ्ककविरचितम्) (१७) छलितरामम् (१८) तरङ्गदत्तम् (१९) तापसवत्सराजम् (२०) दरिद्रचारुदत्तप्रकरणम् (२१) देवीचन्द्रगुप्तम् (विशाखदेवकृतम्) (२२) नागानन्दम् (२३) पाण्डवानन्दम् (२४) पार्थविजयम् (२५) पुष्पदूषितकम् (२६) प्रतिमानिरुद्धम् (श्रीभीमदेवसूनुवसुनागकृतम्) (२७) प्रबोधाभ्युदयम् (२८) बालिकावञ्चितकम् (२९) बृहत्कथा (३०) भारतम् (३१) मनोरमावत्सराजम् (श्रीमद्विरचितम्) (३२) मायापुष्पकम् (३३) माल(वि)काग्निमित्रम् (३४) मालती–माधवम् (भवभूतिविरचितम्) (३५) मुद्राराक्षसम् (३६) मृच्छकटिका (श्रीशूद्रकविरचिता) (३७) रत्नावली (३८) राधाविप्रलम्भम् (रामकाङ्गभेज्जलविरचितम्) (३९) विक्रमोर्वशी (४०) विधिविलसितम् (४१) विलक्षदुर्योधनम् (४२) वीरचरितनाटकम् (४३) वेणीसंहारम् (४४) स्वप्नवासवदत्तम् ।

१ " यत् पुनरुत्तररामचरिते रामोत्सङ्गनिषण्णायाः सीतायाः, अस्मदुपज्ञे नलविलासे अरण्ये दमयन्त्याश्च शयने प्रयुक्तं तत् प्रस्तुतोपयोगित्वात् रसकत्वाच्च न दुष्टम् । "

—नाट्यदर्पणविवृतिः (आमात्यविजयधर्मलक्ष्मीज्ञानमन्दिरीया प्रतिः प. ७)

२ " यथा रत्नावल्यां 'फलागमसम्पानं' सागरिकानुरागबीजस्य फलस्य सम्प्राप्तिहेतुः, यथा वाऽस्मदुपज्ञे नलविलासे कापालिक-वित्रपकनिगूढं राज्ञोऽनुरागमूलस्य दमयन्तीप्रतिकृतिनिदर्शनस्य हेतुः । "

—ना. द. वि. प. ८

३ " यथा नलविलासे धीरललितस्य नायकस्य दोषं विना सर्वसंवादिनीपरित्यागोऽनुचित इति कापालिकप्रयोगेण निबद्धः । "

—ना. द. वि. प. ९

४ " यथा वा नलविलासे चतुर्थे स्वयंवराङ्के नेपथ्ये बन्दी विन्यस्य-[श्लो. १४] इति । "

—ना. द. वि. प. १०

५ " यथा वा नलविलासे द्वितीयाङ्कस्यादौ 'स्वामिनं सरविन्दकाय बन्धुदत्तस्य । ततः प्रविशति कलहंसो मकरिकाप्रभृतिकश्च परिवारः ।' अत्र नेपथ्यवाचैव पुंसा होरकेण बन्धुदत्तादिकानुगः सूचनाय चूर्णिः । "

—ना. द. वि. प. १४

नलविलासीयं स्वयंवरवर्णनं सोमप्रभाचार्येण स्वीये कुमारपालप्रतिबोधे समवतारितमिति पूर्वं प्रदर्शितं तथा च सुमतिगणिना वि. सं. १२९५ वर्षे विरचितायां गणधरसार्धशतकबृहद्वृत्तौ (पृ. ३०९-११) नामग्राहं नलविलासनाटकस्थानि विदूषकादिवचांसि समुद्धृतानि दृष्टिपथे निपतन्ति । तथाहि—

" तथा च **नलविलासनाटके** विदूषकहास्यस्थानानि । यथा किल निषधाधिपतिर्दृष्टस्वप्नः प्रकृतयुगादिदेवसपर्यः कलहंसादिपरिवार उद्यानक्रीडासरसीसीकरासारस्निग्धच्छायं तरुषण्डमवलोक्य स्वगतं समुचितोऽयं प्रदेशः । " इत्यादिनाऽऽरभ्य " बीहामि एआओ बंभरक्खसाओ । " इति यावत् (प्रकाशिते नल० पृ. ४–७) " पुनरत्रैवाग्रतो **नलविलासे**

६ " यथा वा **नलविलासे** विदूषक–कापालिकनियुद्धनिवारणायोद्यतस्य राज्ञो दमयन्तीप्रतिकृतिलाभ इति।"
—ना. प. १७

७ " यथा वा **नलविलासे** प्रथमेऽङ्के नेपथ्यतूर्यध्वनि । + + + + + यातु । इत्यादीति ।"
—ना. प. २१

८ " यथा वा **नलविलासे** तृतीयेऽङ्के ' राजा (सत्वरम्)–मकरिके ! प्रभवसि × × × यतस्व ' इत्यादीति ।"
—ना. प. २१

९ " यथा वा **नलविलासे** चतुर्थे स्वयंवराङ्के ' नलः–कलहंस ! मकरिके ' फलित × × × स्वकार्यप्रत्याशा ।' इति ।"
—ना. प. २१–२२

१० " यथा वा **नलविलासे** तृतीयाङ्के ' दमयन्ती राजानमवलोक्य स्वगतम् × × × अङ्गचङ्गिमा ' इति ।"
—ना. प. ३३

११ " यथा वा **नलविलासे** ' विदूषकः लम्बस्तनीं विलोक्य सभयकम्पं भो रायं ! × × तथा राजा लम्ब० × × × × तिष्ठति ' इति ।"
—ना. प. ३५

१२ " यथा वा **नलविलासे** तृतीयेऽङ्के भुजमवलम्बिते राजनि दमयन्ती क्रमादाह ' जइ × × जादा ' इति ।"
—ना. प. ३७

१३ " यथा वा **नलविलासे** दमयन्तीं प्रति नलः—' न प्रेम × × ' [अ. १, श्लो० ९]
—ना. प. ५१

१४ " यथा **नलविलासे** लम्बस्तनीकापालिकीं प्रति विदूषकः—' एकं दाव × × का वि ' [अ. २, पृ. २५] इत्यादीति ।"
—ना. प. ७२

१५ " यथा **नलविलासे** ' राजा—देवि ! उपालभ्यसे × × ' [अ. ३, पृ. ४०–४१] अत्र स्तब्धता स्तनयो दोषीकृत ।"
—ना. प. ७९

१६ " यथा वा **नलविलासे** ' सर्वेषामपि × × ' [अ० ३, श्लो० १३] अत्र पण्यस्त्रीत्वदोषः गुणीकृतः ।"
—ना. प. ७९

१७ " यथा वा **नलविलासे** ' कविः काव्ये रामः– ' [अ. १, श्लो० ४] —ना. प. ८४

१ शर-निधि-दिनकरसङ्ख्ये विक्रमवर्षे गुरौ द्वितीयायाम् ।
शाके पूर्णीभूता वृत्तिरियं नन्दतात् सुचिरम् ॥
—गणधरसार्धशतकबृहद्वृत्तिप्रान्ते ।

यथा किल " ' कलहंसः—ततो दमयन्त्या ' इत्यादिनाऽऽरभ्य "लम्बस्तनी × × निष्क्रान्ता" इति यावत् (नल० पृ. २३–२९)। तत्रत्य उपयुक्त पाठभेदस्त्वत्र समुद्ध्रियते—

पृ.	पं.	नलविलासे	गणधरसार्धशतकबृहद्वृत्तौ (पृ. १०९–११)
४	२०	समन्ततो वि-	समन्ततोऽवलोक्य
५	४	खल्वयम्	खल्वसौ
"	५	भाव्यम्	भवितव्यम्
"	७	गन्तुमिच्छति	पदमुत्क्षिपति
"	१३	–मकाण्डे	–मकाण्ड एव
"	"	ज्ञायते	ज्ञायते नूनं
"	२०	–चतुर्भागे	–चतुर्थभागे
६	६	कमप्य–	किमप्य–
"	११	मत्प्रसादस्य फलं	मत्प्रसादफलं
"	१७	ससम्भ्रमं	पुनः ससम्भ्रमं
"	२०	दुवारे	दारे
"	२२	वने	काननें
"	२३	–देवायदंभेण तुज्झे इह ज्जेव चिट्ठध	–देवदेवदायदंभेण तुम्भे इध य्येव चिट्ठध। अहं उण नि(न)स्सिस्सं।
७	३	निस्सरिस्सं	नस्सिस्सं
"	९	तत उत्थाय	ततुत्थाय
"	१०	कलहंसो निष्क्रम्य पुनः प्रविशति	कलहंसो निष्क्रम्य पुनः प्रविश्य च देव तपोधनो द्वारि। राजा–सम्भवन्ति तपोधना देवतायतनपावनेषु वनेषु। शीघ्रं प्रवेशय। कलहंसो निष्क्रम्य सतपोधनः प्रविशति।
"	१२	एआओ संभरस्सआओ	एदाउ संभणरक्खसाओ।
२३	१८	यथा यदि	यदि
"	१९	सा तातं यदा–	तातं सा निष्क्रमेन(क)दा–
"	२३	कथमौ	कथमौ कथमौ
"	२४	अस्ति मत्त–	मत्त–
२४	४	एदाओ	एदाउ
"	७	कड्डिअइ नच्चावंती	कड्डिअइ नच्चाविंती
"	१३	ज्जेव	य्येव
२४	१६	–मित्रं	–मित्तं

२९	२	गोणेहिं मुद्दे (द्दे) हिं [वा]	गोणेहि मुद्देहि
„	२२	–र्गुणैर्मूटकैरे[वै]पा	[–र्गोभिर्मूतैरेपा]
„	६	तदस्य	तदेतस्य
„	८	मुखं	मुखं च
„	१२	पि पिअजणं संपाडेमि	अं जणं संघडावेमि
२६	४	इत्थ को वि	पत्तकत्तके (?) वि
„	५	भो भाण्डागारिपु	भो भाण्डागारिकेपु
„	७	एषोऽस्मि	देव एषोऽस्मि

महाकविरामचन्द्रः ।

नलविलासरचयितुः कविरत्न–रामचन्द्रस्य कदा कुत्र जन्म–दीक्षाऽऽदि ?, का ज्ञातिः ? का जन्मभूमिः ? माता–पित्रोः किमभिधानमित्यादि विज्ञातुं न किञ्चित् साधनमुपलभामहे । किन्तु प्रबन्धादिपु सिद्धहस्तः कविकर्मकुशलोऽसाधारणप्रतिभासम्पन्नोऽयं कवीश्वरो रामचन्द्रः श्चातुर्वैद्यविशारदस्य स्वोपज्ञवृत्तिन्याससमुपेतसाङ्गसं. प्रा.शब्दानुशासन–काव्यानुशासन–छन्दोऽनुशासन–वादानुशासन–धातुपारायण–द्व्याश्रयमहाकाव्य–देशीनाममालाऽभिधानचिन्तामण्यने–कार्थसङ्ग्रह–निघण्टु–सप्तसन्धानमहाकाव्य–त्रिपष्टिशलाकापुरुषचरित–परिशिष्टपर्व–योगशास्त्र–वीतरागस्तोत्र–महादेवस्तोत्र–द्वात्रिंशिकाद्वयार्हन्नीति–प्रमाणमीमांसाप्रभृतिप्रणेतुर्गूर्जरेश्वरसिद्धराजसम्मानितस्य कुमारपालभूपालप्रतिबोधकस्य सुप्रसिद्धजैनाचार्यश्रीहेमचन्द्रस्य शिष्यत्वं तु स्वयं प्रतिपादयति सूत्रधारमुखेनात्रान्यत्र च स्वकृतिसन्दर्भे + ।

+ १ सूत्र॰—दत्तः श्रीमदाचार्यहेमचन्द्रस्य शिष्येण **रामचन्द्रेण** विरचितं **नलविलासा**भिधानमाद्यं रूपकमभिनेतुमादेशः । ——नलविलासस्य आमुखे ।

२ श्रीसिद्धहेमाभिधानशब्दानुशासनवेधसः श्रीमदाचार्यहेमचन्द्रस्य शिष्येण **रामचन्द्रेण** विरचितं **सत्यहरिश्चन्द्रा**भिधानमादिरूपकमभिनीय सभाजनमनुरञ्जयिष्यामः । ——सत्यहरिश्चन्द्रस्य प्रस्तावनायाम् ।

३ मारिष ! श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनविधानवेधसः श्रीमदाचार्यहेमचन्द्रस्य शिष्ये(ष्यं) **रामचन्द्र**मसि(? भि)जानासि ? । चन्द्र॰—(साक्षेपम्)—

पञ्चप्रबन्धमिषपञ्चमुखानकेन
विद्वन्मनःसदसि नृत्यति यस्य कीर्तिः ।
विद्यात्रयीचणमचुम्बितकाव्यतन्द्रं
कस्तं न वेद सुकृती किल **रामचन्द्रम्** ।

किन्तु **द्रव्यालङ्कार**नामा प्रबन्धोऽनभिनेयत्वेन तावदास्ताम् । अपरेषां **राघवाभ्युदय–यादवाभ्युदय–नलविलास–रघुविलासानां** चतुर्णां रमणीयतम–सदृश्यङ्गनिवेशानां विशदप्रकृतीनां पुनमेष्वं कुत्र प्रज्ञानामनुरागः ? ——रघुविलासस्य प्रस्तावनायाम् ।

४ श्रीमदाचार्यहेमचन्द्रशिष्यस्य **प्रबन्धशतकर्तुर्महाकवे रामचन्द्रस्य** भूयांसः प्रबन्धाः । ——निर्भयभीमव्यायोगस्य प्रस्तावनायाम् ।

५ अस्ति खलु श्रीसिद्धहेमचन्द्राभिधानशब्दानुशासनविधानवेधसः श्रीमदाचार्यहेमचन्द्रस्य शिष्येण **प्रबन्धशतविधाननिष्णातबुद्धिना नाट्यलक्षण**निर्माणपारावारीणसाहित्याम्भोधिना विशीर्णकाव्यनिर्माणतन्द्रेण

हेमचन्द्रसूरेः पट्टधरत्वम्।

श्रीसिद्धराजजयसिंहेन जिज्ञासया पृष्टे श्रीहेमचन्द्राचार्येण 'स्वपट्टयोग्यो गुणाधिकः शिष्यः कृतिशेखरो रामचन्द्र' इति न्यवेदि दिदृक्षायां तं च प्रादर्शीत्यादिवृत्तान्तो वि. सं. १३३४ वर्षे प्रभाचन्द्रसूरिणा रचितस्य प्रभावकचरितस्य निम्नदर्शितोल्लेखादधिगम्यते—

" राज्ञा श्रीसिद्धराजेनान्यदाऽनुयुयुजे प्रभुः।
भवतां कोऽस्ति पट्टस्य योग्यः शिष्यो गुणाधिकः ? ॥
तमस्माकं दर्शयत चित्तोत्कर्षाय मामिव।
अपुत्रमनुकम्प्यार्ह पूर्वे त्वां मा स्म शोचयन् ॥
आह श्रीहेमचन्द्रश्च न कोऽप्येवं हि चिन्तकः।
आद्योऽप्यभूदिलापालः सत्पात्राम्भोधिचन्द्रमाः ॥
सज्ञानमहिमस्थैर्यं मुनीनां किं न जायते ?।
कल्पद्रुमसमे राज्ञि त्वयीदृशि कृतस्थितौ ॥
अस्त्यामुष्यायणो रामचन्द्राख्यः कृतिशेखरः।
प्राप्तरेखः प्राप्तरूपः सङ्घे विश्वकलानिधिः ॥
अन्यदाऽदर्शयंस्तेऽमुं क्षितिपस्य स्तुतिं च सः।
अनुक्तामाधविद्वद्भिर्ह्लेखासाधयिनीं व्यधात् ॥

तथाहि— * 'मात्रयाऽप्यधिकं किं(कं)चिन्न सहन्ते जिगीषवः।
इतीव त्वं धरानाथ ! धारानाथमपाकृथाः ॥'
शिरोधूननपूर्वं च भूपालोऽत्र दृशं दधौ।
रामे वामेतराचारो विदुषां महिमस्पृशाम् ॥
एकदृष्टिर्भवान् भूयाद् वत्स ! जैनेन्द्रशासने।
महापुण्योऽयमाचार्यो यस्य त्वं पदरक्षकः ॥"

—प्रभावकचरिते (नि. सा. प्रकाशिते पृ.)

'सिंहस्य शिशुः सिंह एव' इति लोकोक्तिं सफलयन् प्रौढपाण्डित्यशालिनः शिष्योऽयमपि तथैवेति न नाम विस्मयावहम्। किञ्च श्रीमद्भिर्गुरुभिः स्वपट्टधुरन्धरत्वेन प्रकल्पितो गुरुगौरवकार्यसौ गुर्वभीष्टकार्यनिर्वहणेन निजां पट्टधुरन्धरतां प्रख्यापयत्येव। मन्ये नाटकप्रबन्धादिषु सफलप्रयत्नं पटिष्ठमेनं स्वशिष्यरत्नं विज्ञायैव तत्र गुरुभिर्न प्रयतितं स्यात्।

श्रीमता रामचन्द्रेण विरचितं कुतूहलसदृशनिधानं कौमुदी-मित्राणन्दाभिधानं निःशेषरसभावप्रदीपकं द्वितीयं रूपकम्। —कौमुदी-मित्राणन्दस्य आमुखे।

१ शब्द-प्रमाण-साहित्य-छन्दोलक्ष्मविधायिनाम्।
श्रीहेमचन्द्रपादानां प्रसादाय नमो नमः ॥ —नाट्यदर्पणविवृतिप्रान्ते।

---

* अयं श्लोकः सिद्धहेमबृहद्वृत्तिं(अ ५, पा. २)प्रान्तेऽपि दृश्यते।

कविरामचन्द्रस्य सतीर्थ्याः ।

कलिकालसर्वज्ञहेमचन्द्राचार्यस्य शिष्या महेन्द्रसूरि–गुणचन्द्रगणि–वर्धमानगणि–देवचन्द्रमुनि–यशश्चन्द्रोदयचन्द्र–बालचन्द्रादयः पं. रामचन्द्रस्य सतीर्थ्या आसन् । तत्र च–

महेन्द्रसूरिः—अनेन सूरिणाऽनेकार्थकैरवाकरकौमुदीसंज्ञिता हैमानेकार्थसङ्ग्रहटीका गुरुनाम्नैव प्रतिष्ठिता[1] । सोमप्रभाचार्येण वि. सं. १२४१ वर्षे समापितो जिनधर्मप्रतिबोधापरनाम-कुमारपालप्रतिबोधग्रन्थोऽनेन सूरिणाऽश्रावि[2] ।

गुणचन्द्रगणिः—पं. रामचन्द्रस्य परमप्रीतिपात्रं समविद्यागुणशीलः प्रतीयते, यतोऽनेन सार्कं कविरामचन्द्रेण स्वोपज्ञद्रव्यालङ्कारवृत्ति–नाट्यदर्पणविवृती विहिते विलोक्येते । एतेन गणिनाऽपि सोमप्रभाचार्यसन्दर्भितः कुमारपाल(जिनधर्म)प्रतिबोधः श्रुत आसीत्[3] ।

वर्धमानगणिः—अयमपि पूर्वोक्तं प्रतिबोधग्रन्थमश्रौषीत्[3] । कुमारविहारप्रशस्तिकाव्य-व्याख्यादिकमनेन निर्ममे[4] ।

देवचन्द्रमुनिः—चन्द्रलेखाविजयप्रकरणमनेन प्रणीतम् । जेसलमेरभां० सूची पृ० ६४ इत्यत्रायमस्माभिः परिचायितः ।

यशश्चन्द्रगणिः—वि. सं. १३६१ वर्षे मेरुतुङ्गसूरिणा विरचिते प्रबन्धचिन्तामणौ (स. ४, पृ. २०६–२११) एतस्य नामोपलभ्यते ।

उदयचन्द्रः—अस्योपदेशाद् देवेन्द्रसूरिशिष्यो मनीषी कनकप्रभो हैमन्यासस्सारं समुदधरत्[5] ।

बालचन्द्रः—अयं रामचन्द्रसूरेः प्रतिस्पर्द्धी, पूर्वमजयपालनरेशस्य मित्रमासीत् । रामचन्द्रसूरिमरणमेतत्कृतमन्त्रभेदादिति प्राचीनप्रवादोऽग्रे प्रदर्शिष्यते । ' स्नातस्याप्रतिमस्य ' इत्यादिका प्रसिद्धा स्तुतिरेतस्य कृतिरूपा श्रूयते ।

इतरेऽप्यविदिता अनेके सम्भवेयुः, इतिहासरसिकसज्जनानां सुप्रयत्नेन सुविदिता भविष्यन्ति ।

---

१ श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिणा । भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता ॥
—अनेकार्थकैरवकौमुदी ।

२ शशि–जलधि–सूर्यवर्षे शुचिमासे रविदिने सिताष्टम्याम् ।
जिनधर्मप्रतिबोधः क्लृप्तोऽयं गूर्जरेन्द्रपुरे ॥ —कुमारपालप्रतिबोधप्रशस्तिः ।

३ हेमसूरिपदपङ्कजहंसैर्महेन्द्रमुनिपैः श्रुतमेतत् ।
वर्धमान–गुणचन्द्रगणिभ्यां साकमाकलितशास्त्ररहस्यैः ॥ —कु. प्र.

४ श्रीहेमचन्द्रसूरिशिष्येण वर्द्धमानगणिना कुमारविहारप्रशस्तौ काव्येऽमुष्मिन् पूर्वं षडर्थे कृतेऽपि कौतुकात् षोडशोत्तरं शतं व्याख्यानं चक्रे । P. P. ३, ३१६

५ भूपालमौलिमाणिक्यमालालालितशासनः । दर्शनषट्कनिस्तन्द्रो हेमचन्द्रो मुनीश्वरः ॥
तेषामुदयचन्द्रोऽस्ति शिष्यः शास्त्रावतां वरः । यावज्जीवमभूद् यस्य व्याख्या ज्ञानामृतप्रपा ॥
तस्योपदेशाद् देवेन्द्रसूरिशिष्यलवो व्यधात् । न्यासशारसमुद्धारं मनीषी कनकप्रभः ॥
—हैमशब्दानुशासनबृ. न्यासप्रान्ते ।

कविरामचन्द्रस्य स्वातन्त्र्यप्रियत्वम् ।

नलविलासस्य प्रस्तावनायां सूचितमेतत्–' भाव ! अयं कविः स्वयमुत्पादक उताहो परोपजीवकः ?' इति नटप्रश्नस्य प्रत्युत्तरे " सूत्रधारः—अत्रार्थे तेनैव कविना दत्तमुत्तरम्—

जनः प्रज्ञाप्राप्तं पदमथ पदार्थं घटयतः
परार्ध्याच्चान्यान् नः कथयतु गिरां वर्तनिरियम् ।
अमावास्यायामप्यविकलविकासीनि कुमुदा–
न्ययं लोकश्चन्द्रव्यतिकरविकासीनि वदति ॥

अपि च शपथप्रत्येयपद–पदार्थसम्बन्धेषु प्रीतिमादधानं जनमवलोक्य जातखेदेन तेनेदं चाभिहितम्—

स्पृहां लोकः काव्ये वहति जरठैः कुण्ठिततमै–
र्वचोभिर्वाच्येन प्रकृतिकुटिलेन स्थपुटिते ।
वयं वीथीं गाढुं कथमपि न शक्ताः पुनरिमा–
मियं चिन्ता चेतस्तरलयति नित्यं किमपि नः ॥"

अनेन पद्यद्वयेन कविप्रवरस्यास्य स्वतन्त्रनूतनकृतिपटुता प्रतीयते, तथा च कविकीर्त्यसहिष्णुजनस्याश्रद्धेयप्रलापोऽपि ध्वन्यते ।

कविसमयेऽप्येतादृशाः कविनामधारिणोऽभूवन्, येऽन्यकविकृत्यंशानुपादाय स्वनामकीर्तनम् कुर्वन् । एतदर्थं कविनाऽन्यत्रापि स्वहृदयोद्गारः प्रकाशितोऽवलोक्यते—

' विद्वानपि यथा हास्यः परकाव्यैः कविर्भवन् ।'

—जिनस्तोत्रे ।

" अकवित्वं परस्तावत् कलङ्कः पाठशालिनाम् ।
अन्यकाव्यैः कवित्वं तु कलङ्कस्यापि चूलिका ॥ "

—नाट्यदर्पणविवृतिप्रारम्भे ।

" परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्तयः ।
निबद्धारोऽधुना तेन चक्रे नौ क्लेशमेष्यति ! ॥ "

—नाट्यदर्पणविवृतिप्रान्ते ।

" परोपनीतशब्दार्थाः स्वनाम्ना कृतकीर्तयः ।
निबद्धारोऽधुना तेन विश्रम्भस्तेषु कः सताम् ! ॥ "

—कौमुदीमित्राणन्दस्यामुखे ।

किञ्च काव्यप्रबन्धादिवर्त्मनि स्वतन्त्रेण प्रायः सर्वामपि स्वां कृतिं स्वातन्त्र्यमुद्राङ्कितां कुर्वताऽनेन कविरत्नेन स्वीयं स्वातन्त्र्यप्रियत्वं प्रख्यापितम् । तच्च निम्नोद्धृतांशदर्शनेन पाठकानां प्रतीतं प्रभविष्यति—

काव्यं चेन् सरसं किमर्थममृतं वक्त्रं कुरङ्गीदृशां
चेन् कन्दर्पविपाण्डुगण्डफलकं राकाशशाङ्केन किम् ! ।
स्वातन्त्र्यं यदि जीवितावधि मुधा स्वर्भूर्भुवो वैभवं
वैदर्भी यदि बद्धयौवनभरा प्रीत्या सरस्त्याऽपि किम् ! ॥

—नलविलासे (अ० २, श्लो० २)

अनुभूतं न यद् येन रूपं नावैति तस्य सः ।
न स्वतन्त्रो व्यथां वेत्ति परतन्त्रस्य देहिनः ॥

—नल० (अ० ६, श्लो० ७)

नलविलासप्रान्ते—

दुरोदरकलङ्कतः कृतविराम चन्द्रोज्ज्वल—
मवाप्य निजसम्पदं पदमनिन्द्यशर्मश्रियः ।
यशोभिरनिशं दिशः कुमुदहासभासः सृजन्
अजातगणनाः समा परमत स्वतन्त्रो भव ॥

सत्यहरिश्चन्द्रप्रान्ते—

परप्रणयदैन्यतः कृतविराम चन्द्रोज्ज्वल—
मवाप्य निजसम्पदं पदमनिन्द्यशर्मश्रियः ।
यशोभिरनिशं दिशः कुसुमहासभास सृजन्
अजातगणनाः समा. परमत· स्वतन्त्रो भव ॥

यादवाभ्युदयप्रान्ते—

कल्याणं भूर्भुवःस्वः प्रथयतु विरतः प्रक्षयं यान्तु सर्वाः
मन्त्रः स्वच्छां भजन्तामनवरमगना दुर्मतिर्दुर्जनानाम् ।
धर्मः पुष्णातु वृद्धिं मधुरमधुमनःकैरवारामचन्द्रः
प्राप्य स्वातन्त्र्यलक्ष्मीं मुदमथ वहता शारदी चन्द्रिका ॥

निर्भयभीमव्यायोगप्रान्ते—

भूयासुः सत्कवीनां ... काव्यराम प्रवाह
... दुर्जना ... ।
धर्मं पुष्णातु वृद्धिं ... रामचन्द्रः मुरारौ
प्राप्य स्वातन्त्र्यलक्ष्मीमनुभवतु मुदं ... ॥

कौमुदी–मित्राणन्दप्रान्ते—

उपनतमित्रकलत्रः सन्तप्तारामचन्द्रकरविशदाम् ।
आसाद्य यशोलक्ष्मीं परां स्वतन्त्रश्चिरं भूयाः ॥

द्रव्यालङ्कारप्रान्ते—

पूर्वैर्यस्य समुद्धृतिर्न विहिता धीरैः कुतोऽप्याशया–
दावाभ्यां स समुद्धृतः श्रुतनिधेर्द्रव्योत्करो दुर्लभः ।
एनं यूयमनन्तकार्यनिपुणं गृह्णीत तत् कोविदाः !
स्वातन्त्र्यप्रसवां यदीच्छत चिरं सर्वार्थसिद्धिं हृदि ॥

—जेसलमेरभां० सूची (पृ. ११)

जिनस्तोत्रप्रान्ते—

स्वतन्त्रो देव ! भूयासं सारमेयोऽपि वर्त्मनि ।
मा स्म भूवं परायत्तस्त्रिलोकस्यापि नायकः ॥

स्वामिन्ननन्तफलकल्पतरोऽभिराम चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुतांह्रिसरसीरुह ! दुःस्थसार्थे देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥

जिनस्तव(षोडशिका)प्रारम्भे—

स्वातन्त्र्यश्रीपवित्राय परमब्रह्ममूर्तये ।
साधिताशेषसाध्याय नमो भगवतेऽर्हते ॥

अन्यत्रापि—

सूक्तयो रामचन्द्रस्य वमन्तः कल्पीतयः ।
स्वातन्त्र्यमिष्टयोगस्य पर्यैने हर्षवृ(सृ)ष्टयः ॥

—सत्यहरिश्चन्द्रप्रस्तावनायाम् ।
—निर्भयभीमव्यायोगेऽपि (श्लो० २)

कविरामचन्द्रस्य 'कविकटारमल्ल' बिरुदम् ।

प. रामचन्द्रस्य बाल्येऽपि शीघ्रकवित्वशक्तिं परीक्ष्य प्रसन्नेन गूर्जरेश्वरचौलुक्य-श्रीसिद्धराजजयसिंहदेवेनास्मै 'कविकटारमल्ल' बिरुदं सर्वसमक्षमुपदीकृतमित्यस्मीयने वि. सं. १६१७ वर्षे भोजप्रबन्धादिप्रणेतृ रत्नमन्दिरगणेरुपदेशतरङ्गिण्यन्तर्गतोल्लेखतः—

" तथा रैवतोद्धारकारकश्रीसज्जनदण्डनायक–२४ प्रासादकारकमं० आम्रभट–देव–गुरुदृढभक्तमं० आलिग–मं० सांतू–९९ लक्षहाटकस्वामी श्रे० छाडा–पद्मखेटीद्रव्यस्वामि-कुबेरदत्तादि–कोटीध्वजाष्टादशशतव्यवहारि–शाकम्भरीपति–अर्णोराज–लाटाधिपगजमांगृहा-

लकप्रभृति ७२ राणकपरिकरितश्रीजयसिंहदेवेन ग्रीष्मे क्रीडोद्यानं गतेन मार्गमिलितश्रीरामचन्द्र-क्षुल्लः पृष्टः–कथं ग्रीष्मे दिवसा गुरुतराः ? । रामचन्द्रः प्राह—

देव ! श्रीगिरिदुर्गमल्ल ! भवतो दिग्जैत्रयात्रोत्सवे
धावद्वीरतुरङ्गनिष्ठुरखुरक्षुण्णक्ष्मामण्डलान् (ली) ।
वातोद्धूतरजोमिलत्सुरसरित्सञ्जातपङ्कस्थली—
दूर्वाचुम्बनचञ्चुरा रविहयास्तेनाति(नैव) वृद्धं दिनम् ॥

चमत्कृतेन सिद्धराजेनोक्तम्–सद्यो नगरं वर्णय पत्तनाभिधानम् ।

एतस्यास्य पुरस्य पौरवनिताचातुर्यतानिर्जिता
मन्ये नाथ ! सरस्वती जडतया नीरं वहन्ती स्थिता ।
कीर्तिस्तम्भमिषोच्चदण्डरुचिरामुत्सृज्य वाहावली—
तन्त्रीकां गुरुसिद्धभूपतिसरस्तुम्बीं निजां कच्छपीम् ॥

तुष्टेन सर्वसमक्षं ' कविकटारमल्ल ' इति विरुदं दत्तम् ॥ "

वि. सं. १३६१ वर्षे विरचिते प्रबन्धचिन्तामणौ मेरुतुङ्गसूरिः संक्षिप्ततया सिद्धराज-रामचन्द्रयोः प्रश्न–प्रत्युत्तरमेव केवलमनूनयत्—

" एकदा श्रीसिद्धेन रामचन्द्रः पृष्टः–' ग्रीष्मे दिवसाः कथं गुरुतराः ? ' रामचन्द्रः प्राह–" देव श्रीगिरिदुर्गमल्ल० " इति ।

कविकटारमल्लविरुदधारिणाऽनेन रघुविलासस्य प्रस्तावनायाम् 'अनुम्भितकाव्यतन्द्रम्' इति, कौमुदीमित्राणन्दस्यामुखे च 'विशीर्णकाव्यनिर्माणतन्द्रेण' इत्यादीनि विशेषणानि सूत्रधारमुखेनात्मनि नियोजयता निजं काव्यप्रेम, काव्यक्रियासु स्वस्य सर्वदाऽप्यविश्रान्तपरिश्रमशीलत्वं च प्रचकाशे । किञ्च कविनाऽनेन नाट्यदर्पणविवृतिप्रारम्भे नाट्य–प्रबन्धकवित्वविषयमधिकृत्य कविशिक्षारूपा विदुषां विचारणीया मनन–परिशीलनार्हाश्च हृद्या हृदयोद्गारा प्रकाशिताः* ।

---

* अक्षुण्णभूः [illegible] कथाऽऽदर्शी मुगन्धरः । दुःसञ्चरस्तु नाट्यस्य [illegible] ॥
न [illegible] श्लोकान्निर्गिरो न ये । अमितैः [illegible] च प्रबन्धारम्भे [illegible] ॥
स कविस्तस्य [illegible] मार्गो अपि [illegible] । [illegible] नाट्ये यस्य [illegible] भारती ॥
[illegible] ये [illegible] । [illegible] न पुनः [illegible] ॥
[illegible] । [illegible] न [illegible] गिरः ॥
[illegible] न [illegible] ये । [illegible] ते [illegible] ॥
[illegible] । [illegible] ॥
[illegible] । [illegible] ॥
[illegible] । [illegible] ॥
[illegible] ये । [illegible] ॥

—नाट्यदर्पणविवृतिप्रारम्भ (श्लो० १–११)

कविरामचन्द्रस्य काव्यप्रबन्धादिगुणदोष—
परीक्षणविचक्षणता ।

एकदिनप्रणीतमहाप्रबन्धेन सिद्धराजप्रतिपन्नबन्धुना हैमचन्द्रसूरीयद्विसन्धानमहाकाव्य-संशोधकेन श्रीपालकविराजेन सिद्धराजकारितसहस्रलिङ्गसरोवरस्य रचितायां प्रशस्तावन्य-विदुषामगोचरं दूषणद्वयं दर्शितमासीदनेन रामचन्द्रेणेत्यवगम्यते प्रबन्धचिन्तामणितः—

" अथ श्रीपालकविना सहस्रलिङ्गसरोवरस्य रचितायां प्रशस्तिपट्टिकायामुत्कीर्णायाम् ।

तत्रत्यकाव्यमिदम्—

न मानसे माद्यति मानसं मे पम्पा न सम्पादयति प्रमोदम् ।
अच्छोदमच्छोदकमत्र सारं विराजते कीर्तितसिद्धभर्तुः ॥ १ ॥

तत्प्रशस्तिशोधनाय सर्वदर्शनेष्वाहूयमानेषु श्रीहेमचन्द्राचार्यैः सर्वविद्वज्जनानुमते प्रशस्ति-काव्ये भवता वैदग्ध्यं किमपि न प्रकाशयमित्युक्त्वा पण्डितरामचन्द्रोऽनुशिष्य तत्र प्रहितः ।

---

१ एकाहनिष्पन्नमहाप्रबन्धः श्रीसिद्धराजप्रतिपन्नबन्धुः ।
श्रीपालनामा कविचक्रवर्ती सुधीरिमं शोधितवान् प्रबन्धम् ॥

—हैमचन्द्रसूरीयद्विसन्धानमहाकाव्यप्रान्ते ।

प्राग्वाटान्वयसागरेन्दुरसमप्रज्ञः कृतज्ञः क्षमी
वाग्मी सूक्तिसुधानिधानमजनि श्रीपालनामा पुमान् ।
यं लोकोत्तरकाव्यरञ्जितमतिः साहित्यविद्यारति-
श्रीसिद्धाधिपतिः कवीन्द्र इति च भ्रातेति च व्याहरत् ॥

—सोमप्रभाचार्यीयसुमतिनाथचरित्रप्रान्ते, कुमारपालप्रतिबोधप्रान्तेऽपि ।

सोमप्रभाचार्येण सुमतिनाथचरित-कुमारपालप्रतिबोधयो रचनेनाश्रीपालकविसूनोः कुमारपालभूपालप्रीति-पात्रस्य सिद्धपालकवेः संगतावकारीति प्रतिपाद्यते तेनैव सूरिणा निजकृतिप्रान्ते—

सूनुस्तस्य कुमारपालनृपतिप्रीतेः पदं धीमता—
मुत्तंसः कविचक्रमस्तकमणिः श्रीसिद्धपालोऽभवत् ।
यं व्यालोक्य परोपकार-करुणा-सौजन्य-सत्य-क्षमा-
दाक्षिण्यैः कलितं कलौ कृतयुगारम्भो जनैर्मन्यते ॥

तस्य पौषधशालायां पुरेऽणहिल्लपाटके ।
निवसन्नहमिदं प्रोक्तं पदार्थान्तं ....॥—सुमतिनाथचरित्रप्रान्ते ।

" सूनुस्तस्य कुमारपालनृपतिप्रीतेः पदं धीमता-
मुत्तंसः कविचक्रमस्तकमणिः श्रीसिद्धपालोऽभवत् ।
क्वापि तद्गुणवर्णनं किमपि यथाश्रुतमुक्तं मया
तद् युष्माभिरिहोच्यतामिति बुधा वः प्राञ्जलिः प्रार्थये ॥ "

—कुमारपालप्रतिबोधप्रान्ते

ततः सर्वविद्भिः शोध्यमानायां प्रशस्तौ नृपोपरोधात् श्रीपालकवेर्देश्य–दाक्षिण्याच्च सर्वेषु काव्येषु मन्यमानेषु ।

' कोशेनापि युतं दलैरुपचितं नोच्छेत्तुमेतत् क्षमं
स्वस्यापि स्फुटकण्टकव्यतिकरं पुंस्त्वं च धत्ते नहि ।
एकोऽप्येष करोति कोशरहितो निष्कण्टकं भूतलं
मत्वैवं कमला विहाय कमलं यस्यासिमाशिश्रियत् ॥ '

विशेषेणास्मिन् काव्ये प्रशस्यमाने श्रीसिद्धराजेन पृष्टः श्रीरामचन्द्रश्चिन्त्यमेतदित्यवादीत् । अथ तैरेव सर्वैरनुयुक्तः । एतस्मिन् काव्ये सैन्यवाचको दलशब्दः कमलशब्दस्य नित्यक्लीबत्वमिति दूषणद्वयं चिन्त्यम् । ततः सर्वानपि पण्डितानुपलक्ष्य दलशब्दो राजसैन्यार्थे प्रमाणीकारितः । कमलशब्दस्य तु लिङ्गानुशासनसिद्धं नित्यक्लीबत्वं केन निर्णीयत इति पुंस्त्वं च धत्ते न चेत्यक्षरभेदः कारितः । "

कविरामचन्द्रस्य समस्यापूर्तिशक्तिः ।

वाराणसीवासिकविर्विश्वेश्वरो रामचन्द्रसूरेः समस्यापूर्तिशक्तिं पर्यैक्षत पर्यतुष्यच्चेति प्रतीयते प्रबन्धचिन्तामणि–कुमारपालचरितादिप्रेक्षणात् । वि. सं. १३६१ वर्षे मेरुतुङ्गसूरिणा रचिते प्रबन्धचिन्तामणौ (प्र० ४, पृ. २२६–२२७) उपलभ्यतेऽयमुल्लेखः—

" कस्मिंश्चिदप्यवसरे विश्वेश्वरनामा कविर्वाराणस्याः श्रीपत्तनमुपागतः श्रीहेमसूरीणां संसदि गतः । तत्र कुमारपालनृपतौ विद्यमाने सः

' पातु वो हेमगोपालः कम्बलं दण्डमुद्वहन् । '

इति भणित्वा विलम्बमानो नृपेण सक्रोधं निरैक्ष्यत ।

' षड्दर्शनपशुग्रामं चारयन् जैनगोचरे ॥ '

इत्युत्तरार्धंकरणेनैव तन्मुखमुद्रितेन श्रीरामचन्द्रादीनां [समस्यां] समर्थयामास । "

वि. सं. १४[९१ ?] वर्षे विनिर्मिते कुमारपालचरितमहाकाव्ये चारित्रसुन्दरगणिरपि समस्यापूरणविषयेऽस्मिन्नुल्लिखति स्म—

" यत्र लक्षाणि द्रम्माणां ददौ कोटिंश्च मुग्धमान् ।
विश्वेश्वराय कवये तुष्टः श्रीकुमरो ददौ ॥
सभायां नृपतिना योऽत्र विश्वेश्वरकविर्गिरा ।
श्रीहेमसूरिशासनं विदुषां चैव संसदि ॥
अन्येद्युः संसदि सूरीन्द्रं विश्वेश्वरकविः पुनः ।
स श्रुत्वापि च तं ध्यानेन मेने कविवरः ॥

'सूरिशिष्यपरीक्षार्थं द्वे समस्ये समार्पयत् ।
'व्याविद्धेति' प्रसिद्धाऽऽद्या 'शृङ्गाग्रेणेति' चापरा ॥
तामाद्यां निरवद्यपद्यरसनाहृद्यः *कपर्दी महा—
मात्यः पूर्वमपूरयद् गुरुतरप्रज्ञाप्रकर्षोद्धुरः ।
कुर्वंस्तन्मनसीति विस्मयभरं श्रीसूरिशिष्यः क्षणाद्
अन्यां मान्यतमोऽनिशं मतिमतां श्रीरामचन्द्रोऽप्यधात् ॥
'नैतस्या भ्रूलतिद्वयेन सरले ! शक्ये पिधातुं दृशौ
सर्वत्रापि च लक्ष्यते मुखशशिज्योत्स्नाचितानैरियम् ।
इत्थं मध्यगता सखीभिरभितो दम्मीलनात् केलिषु
व्याविद्धा नयने मुखं च रुदती स्वे गर्हते कन्यका ॥'
'त्वं नो गोत्रगुरुस्तवेन्दुरधिपस्तस्यामृतं तत्करे
तेन व्याधशरातुरां मम प्रियामेनां समुज्जीवय ।
इत्युक्ते मृगलाञ्छनस्य हरिणे कारुण्यमाजल्पतः
शृङ्गाग्रेण मृगस्य पश्य पतितं नेत्राम्बु भूमण्डले ॥'
स जहर्ष निजार्पितं से निपीयाशु पूरिते ।
अहो ! जानाति विश्वेऽस्मिन् कविरेव कवेः श्रमम् ॥"

कविरामचन्द्रस्य त्रैविद्यविज्ञत्वम् ।

प्रचुरप्रबन्धप्रबन्धकेनानेन विरचिता रघुविलासस्य प्रस्तावनाप्रसङ्गे—
"पद्यप्रबन्धमिषपद्यमुपानकेन विद्वन्मनःसदसि नृत्यति यस्य कीर्तिः ।
विद्यात्रयीचणमचुम्बितकाव्यतन्द्रं कस्तं न वेद सुकृती किल रामचन्द्रम् ? ॥
इति चन्द्रवाक्यात् प्रोच्चारितेऽस्मिन् श्लोके ह्यस्य विद्यात्रयीवित्त्वं स्पष्टं निवेदितमेव ।
नाट्यदर्पणविवृतिप्रारम्भे—
"प्राणाः कवित्वं विद्यानां लावण्यमिव योषिताम् ।
त्रैविद्यवेदिनोऽप्यस्मै ततो नित्यं कृतस्पृहाः ॥"
इत्यत्र 'त्रैविद्यवेदिनः' इति विशेषणं भावगर्भितं व्यज्यते । त्रैविद्यवेदिनोऽस्मा—
दृशोऽपीत्येवं ध्वन्यते ।

---

* मेरुतुङ्गसूरिः प्रबन्धचिन्तामणावस्य विनोदप्रबन्धमित्थं निर्दिशति स्म—
" कदाचित् प्रत्यूषे श्रीकपर्दिमन्त्री प्रणामानन्तरं हस्ते किमेतदिति पृष्टः स प्राकृतभाषया 'हरडइ' ति विज्ञपयामास । प्रभुभिरुक्तं 'किमद्यापि ?' आहतप्रतिभया तद्वचनच्छलाद्वक्तव्य कपर्दिनोक्तम् इदानीं च । पुनः ? । अन्योऽन्यायोऽभूत्, मात्राधिकश्च । इत्यनुपरिपूर्वेदयः प्रभवः श्रीरामचन्द्रप्रभृतिपण्डितानां पुरस्तात् तच्चातुरी प्रशशंसुः । तैरज्ञातत्वेऽपि किमिति पृष्टे 'ह रडइ' शब्दच्छलेन हकारो रडइ । किमद्यापि त्वभिहितमा—मेव वक्तव्यविदा मयाऽनीमुक्तम् । यतः पुरा मातृकापाठे हकारः प्रान्ते पठ्यते; अत एव ह रडइ । सम्प्रति त्वस्मत्स्वामिप्रणमनदा मात्राधिकश्च । " इति हरडइप्रबन्धः ॥

पञ्चप्रबन्धमिषपञ्चमुखानकेन विद्वन्मनःसदसि नृत्यति यस्य कीर्तिः ।
विद्यात्रयीचणमचुम्बितकाव्यतन्द्रं कस्तं न वेद सुकृती किल रामचन्द्रम् ? ॥
—रघुविलासे

कविरामचन्द्रस्य प्रबन्धशतकर्तृत्वम् ।

प्रस्तुतकविना कौमुदी–मित्राणन्दस्यामुखे ' प्रबन्धशतविधाननिष्णातबुद्धिना ' इत्यादि, तथा निर्भयभीमव्यायोगस्य प्रस्तावनायां ' प्रबन्धशतकर्तुर्महाकवे रामचन्द्रस्य ' इति विशेषणमात्मनि प्रयोगयता स्वस्य प्रबन्धशतकर्तृत्वं प्रकटं पर्यचायि। किन्तु करालकालकवलितेन साम्प्रतं निम्नसूचितानेव प्रबन्धान् तन्मध्यान् कथंचिदभिजानीमोऽन्येषां नामान्यपि सम्यग् न जानीमहे ।

गुणचन्द्रद्वितीयेनानेन महाकविना विहिताया स्वोपज्ञनाट्यदर्पणविवृतौ द्वादशरूपकस्वरूपनिरूपणाय प्रदर्शितेषु निजान्यनाटकप्रकरणादिप्रबन्धानामुदाहरणेषु निदर्शितानामेकादशकृतीनां स्वोपज्ञता समदर्श्यस्मदुपज्ञादिशब्दव्यवहरणेन । तास्त्वेताः—

(१) नलविलासनाटकम् (एतदेव)
(२) सत्यहरिश्चन्द्रनाटकम् (निर्णयसागरमुद्रणालयतः प्रसिद्धम्)
(३) कौमुदी–मित्राणन्दप्रकरणम् (भावनगरस्थया ऽऽत्मानन्दसभया प्रकाशितम्)
(४) मल्लिका-मकरन्दप्रकरणम् *
(५) रोहिणी-मृगाङ्कप्रकरणम् *
(६) यादवाभ्युदयम् *
(७) राघवाभ्युदयम् *
(८) रघुविलासम् *
(९) वनमालानाटिका *
(१०) निर्भयभीमव्यायोगः (यशोविजयजैनग्रन्थमालया प्रसिद्धिं नीतः)
(११) सुधाकलशः *

एतदतिरिक्ता इमा अपि ज्ञाताः सन्ति—

(१२) द्रव्यालङ्कारः (सवृत्तिकः) * } गुणचन्द्रेण सह
(१३) नाट्यदर्पणम् (सविवरणम्) * } गुणचन्द्रेण सह
(१४) यदुविलासम् * (रघुविलासे कविना सूचितम्)
(१५) कुमारविहारशतकम् (भा. आ. सभातः प्रसिद्धम्)
(१६) युगादिदेवद्वात्रिंशिका *
(१७) व्यतिरेकद्वात्रिंशिका *
(१८) प्रसादद्वात्रिंशिका *
(१९) आदिदेवस्तवः *
(२०) मुनिसुव्रतदेवस्तवः *
(२१) नेमिस्तवः * (२२–३७) षोडशिकाः साधारणजिनस्तवाः *
(३८) जिनस्तोत्राणि *
(३९) हैमबृहद्वृत्तिन्यासः *

ग्रन्थरत्नगवेषिणो गवेषयिष्यन्ति कविरत्नस्यास्यान्यानप्यज्ञातां कृतिमंहतिम् ।

---

* एतच्चिह्नाङ्किता ग्रन्था यावत्कालं मुद्रणादिनाऽप्रसिद्धाः ।
१ ' सुधाकलशाख्यसुभाषितकोशे पं. रामचन्द्रस्य पद्य...... '—मुनिजिनविजयाः
२ वटपद्रीय ' [illegible] ' [illegible] प्रतिः ।
३ ' रामचन्द्रग्रन्थाग्रम् ५१००० म । '—मु.

नलविलासस्य रचनासमयः ।

अगाधागाधसाहित्याम्भोधिना नाट्यलक्षणनिर्माणनिष्णातेन प्रबन्धशतकर्तृमहाकविना रामचन्द्रेणास्यां रचनायां किमिति समयस्मादृशैः स्वल्पमपि? । किन्त्वत्र तत्कृतीनां पौर्वा-परामृश्य प्रस्तुतनाटकस्य प्रणयनसमयो विचार्यते । नलविलासान्तर्गतानि कानिचित् पद्यानि पात्रनामानि च कवेरन्यकृतावपि दृष्टिगोचरीक्रियन्ते । तथाहि—

अकृतासम्बद्धधर्माणाम्—	नलविलासे	(अ. १, श्लो० १०)	कौमुदी-मित्राणन्दे	(अ.१ श्लो० ६,७
अपकृत्योपकार्येषु	,,	(अ. ७, श्लो० ३)	सत्यहरिश्चन्द्रे	(अ. ३, श्लो० १५
अस्तमयति	,,	(अ. ५, श्लो० ८)	कौमुदीमित्राणन्दे	(अ. १, श्लो० ८
अ(य)स्यां	,,	(अ. ४, श्लो० ७)	,,	(अ. १०, श्लो० १२
एते निर्विशङ्कान्कृते.	,,	(अ. ५, श्लो० ९)	निर्भयभीमव्यायोगे	(श्लो० ९)
चलकमलविलासा-	,,	(अ. २, श्लो० ५)	कौमुदी-मित्राणन्दे	(अ. ८, श्लो० ८)
परिमलभृतो वाताः	,,	(अ. ३, श्लो० २)	,,	(अ. १०, श्लो० ३)
प्रबन्धानाधातुम्	,,	(अ. १, श्लो० ३)	,,	(अ. १, श्लो० ३)
मा विषीद	,,	(अ. ५, श्लो० ५)	,,	(अ. ४, श्लो० १७)
सर्वथा कैतवं निन्द्यम्	,,	(अ. २, श्लो० ११)	,,	(अ. १०, श्लो० ४)
स्फुरन्त्युपायाः	,,	(अ. ५, श्लो० ३)	,,	(अ. २, श्लो० ९)
स्वमेकः पर-	,,	(अ. ७, श्लो० ७)	सत्यहरिश्चन्द्रे	(अ. ५, श्लो० ११)

तथा च घोरघोणनाम नलविलासे कौमुदीमित्राणन्देऽपि प्रयुक्तम्, एवं लम्बस्तनीनाम नलविलासे सत्यहरिश्चन्द्र—कौमुदीमित्राणन्दयोरपि व्यवहृतम् ।

न चैतावता प्रबन्धानां पौर्वापर्यं वक्तुं सुशकम् । तथाप्येतेषु नलविलासस्य किञ्चित् प्राचीनत्वं प्रतीयते । नाट्यदर्पणे नलविलासस्योदाहरणानि दृश्यन्ते यानि पूर्वं प्रादर्श्यन्त । कौमुदीमित्राणन्द-निर्भयभीमव्यायोगयो रचनासमये कविना प्रबन्धशतं प्रणीतं भवेद् वा प्रणीयमानं सम्भवेद् यतस्तत्र ' प्रबन्धशतविधाननिष्णातबुद्धिना ' ' प्रबन्धशतकर्तुः ' इति विशेषणेन तत् प्रकाशितम् । नल-विलासादौ च तादृग् विशेषणं न दृश्यते । नाट्यदर्पणविवृतौ कौमुदी-मित्राणन्दस्योदाहरणानि विद्यन्ते । कौमुदीमित्राणन्दस्य प्रस्तावनायां चोपन्यस्तेन ' नाट्यलक्षणनिर्माणापातावगाढसाहित्याम्भोधिना ' विशेषणेन कौमुदीमित्राणन्दप्रणयनसमये नाट्यदर्पणविवरणरचनायाः सत्ता सम्भाव्यते । रघुवि-

लासस्य प्रस्तावनायां 'पद्यप्रबन्धमिषपद्यमुत्तानकेन' श्लोकानन्तरं द्रव्यालङ्कार-राघवाभ्युदय-यादवाभ्युदयाभिधानन्तरं नलविलासस्य नामोपात्तम्। नलविलासस्यामुखे च--

"सङ्ख्यायामिव काकुत्स्थ-यादवेन्द्रप्रबन्धयोः।
वर्धमानैर्गुणैरङ्काः प्रथमानतिशेरते ॥"

इत्यभिधानात् नलविलासरचनायाः पूर्वं काकुत्स्थ-यादवेन्द्रप्रबन्धयोः (राघवाभ्युदय-यादवाभ्युदययोः) रचनाऽभिहिता भवति। किञ्च प्रबन्धशते नाट्यदर्पणदर्शितानां द्वादशानामपि रूपकाणां प्रत्येकमष्टौ पञ्च वा न्यूनाधिकाः कृतयो निर्मिताः सम्भवेयुः। तन्मध्ये यदि क्रमेण रूपकनिर्माणं कृतं स्यात्, तदाऽऽदिरूपकस्य नाटकस्य प्रथमं निर्माणं सम्भवेत्। अद्यावधि सूरिवर्यस्यास्यादिरूपकोदाहरणरूपं कृतिद्वयं ज्ञातम्, एकं सत्यहरिश्चन्द्रम्, द्वितीयं नलविलासमेतत्। तत्रापि नलविलासस्य प्राग् रचनाऽनुमीयते पूर्वोक्तेषु मुख्येषु पञ्चसु प्रबन्धेष्वस्य संस्मरणात्।

रघुविलासस्य प्रस्तावनायामभिहिते प्रबन्धपञ्चके कविना यस्याभिधानं प्रागुपात्तम्, तस्य द्रव्यालङ्कारस्यादर्शपुस्तकमेकं ताडपत्रीयं वि. सं. १२०२ वर्षे लिखितमुपलभ्यते जेसलमेरजैनभाण्डागारे (जेसलमेरभां. सूची पृ. ११)।

वि. सं. ११४५ वर्षे जन्मभाजः, वि. सं. ११५० वर्षे संयतस्य, वि. सं. ११६६ वर्षे सूरिपद-प्रतिष्ठितस्य, वि. सं. १२२९ वर्षे दिवंगतस्य सुप्रसिद्धस्य श्रीमतो हेमचन्द्राचार्यस्य पट्टधुरन्धरस्तत्समकालीनश्चायं महाकविरामचन्द्रो गूर्जरेश्वरसिद्धराज-कुमारपालयोः सत्तायां विद्यमान आसीद्, ययोः सत्तासमयो वि. सं. ११४९-९९-१२३० वर्षेषु विदितः। इत्यादिविचारणया नलविलासस्य विरचनं विक्रमीयद्वादशशताब्द्याः प्रान्तभागेऽथवा त्रयोदशशताब्द्याः प्रारम्भे प्रकल्प्यमानं नानुचितं प्रतिभाति। किञ्च वि. सं. १२४१ वर्षे विरचिते कुमारपालप्रतिबोधे वि. सं. १२९५ वर्षे विनिर्मिते गणधरसार्धशतकबृहद्वृत्तौ च नलविलासस्यावतरणमपि दृश्यते यत् पूर्वमत्र प्रदर्शितम्।

१ 'रामचन्द्रकृत प्रबन्धशतं द्वादशरूपकनाटकादिस्वरूपज्ञापकम्।' —प्राचीनपत्रे

कविरामचन्द्रस्य नेत्रनाशः ।

वि. सं. १३३४ वर्षे विरचिते प्रभावकचरिते प्रभाचन्द्रसूरिः सिद्धराज-रामचन्द्रयोः परिचयसूचनानन्तरं रामचन्द्रस्य दक्षिणदृष्टिविनाशविषयमित्थमुदलिखत्—

" इत्युक्त्वा विरते राज्ञि रामस्यातुच्छदेशनम् (!) ।
नेत्रदृष्टिर्हि दुर्भाग्या सुकृतातिशयस्पृशाम् ॥
उपाश्रयाश्रितस्यास्य महापीडापुरःसरम् ।
व्यनशद् दक्षिणं चक्षुर्न रत्नमनुपद्रवम् ॥
कर्मप्रामाण्यमालोच्य ते शीतीभूतचेतसः ।
स्थितास्तत्र चतुर्मासीमासीनास्तपसि स्थिरे ॥ "

वि. सं. १३६१ वर्षे मेरुतुङ्गसूरिणा रचिते प्रबन्धचिन्तामणावेतद्विषयेऽयमुल्लेख उपलभ्यते–

" तदा श्रीसिद्धराजस्य सञ्जातदृष्टिदोषेण पं. रामचन्द्रस्य वसतौ प्रविशत एव लोचनमेकं स्फुटितम् । "

कविरामचन्द्रविहितेषु नैकेषु जैनस्तोत्रेषु दृष्टिदानप्रार्थनया तत् किञ्चिद् ध्वनितं व्यज्यते । तथाहि नेमिस्तवप्रान्ते—

" नेमे ! निधेहि निशितासिलताभिराम चन्द्रावदातमहसं मयि देव ! दृष्टिम् ।
सद्यस्तमांसि विततान्यपि यान्तु नाशमुज्जृम्भतां सपदि शाश्वतिकः प्रकाशः ॥ "

षोडशषोडशिकाप्रान्ते—

स्वामिन्ननन्तफलकल्पतरोऽतिराम चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुतांह्रिसरसीरुह ! दुःस्थसार्थे देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥

व्यतिरेकद्वात्रिंशिकाप्रान्ते तु—

जगति पूर्वविधेर्विनियोगजं विधिनतान्ध्य–गलत्तनुताऽऽदिकम् ।
सकलमेव विलुम्पति यः क्षणादभिनवः शिवसृष्टकरः सताम् ॥

इत्थङ्कारमकारणैकसुहृदं विश्वस्य पार्श्वं जिनं
तं स्तोतुस्त्रिजगद्विलक्षणगुणग्रामाभिरामाकृतिम् ।
यः कश्चिद् विकचीबभूव बत मे भाग्यातिरेकस्तत–
स्तल्लोकव्यतिरिक्तमुक्तियुवतिप्रेमप्रमोदोत्सवः ॥

इत्याद्युच्चारणेन स्पष्टं ध्वनितम् ।

कविरामचन्द्रकृतं कुमारपालनृपस्य शोकशमनादि ।

वि. सं. १२२९ वर्षे रामचन्द्रगुरोर्हेमचन्द्राचार्यस्य स्वर्गगमनमजनीति नैकग्रन्थेषु पठ्यते । तदनन्तरं तत्प्रतिबोधितपरमार्हतस्य तदनन्यभक्तस्य चौलुक्यकुमारपालभूपालस्य शोकशान्ती रामचन्द्रादिभिरकृतेति निम्नदर्शितात् वि. सं. १४२२ वर्षे निष्पन्नात् कृष्णर्षिगच्छीयजयसिंहसूरिरचितकुमारपालचरितान्तर्गतोल्लेखाद् विज्ञायते—

" हेमाचार्यवियोगेन शून्यात्मेव समन्ततः ।
विदाञ्चकार चौलुक्यो न किञ्चित् कृत्यमात्मनः ॥
ततः स रामचन्द्राद्यैर्बुधैः सम्बोध्य नित्यशः ।
दिनैः कतिपयैश्चक्रे स्तोकशोकः कथञ्चन ॥ "

वि. सं. १२३० वर्षे हेमाचार्यस्वर्गगमनानन्तरं षट्सु मासेषु व्यतीतेषु निजभ्रातृव्यामयपालार्पितविषसङ्क्रमे कुमारपालभूपालः पर्यन्ताराधनां रामचन्द्रसूरिमाचार्यात्कार्षीदित्यपि तत एव कुमारपालचरिताद्—

" अथ राजर्षिराकार्य रामचन्द्रं मुनीश्वरम् ।
पर्यन्ताराधनां कर्तुं विधिनैवं प्रचक्रमे ॥ " इत्यादिनाऽवगम्यते ।

कविरामचन्द्रस्य मृत्युः ।

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यपट्टधुरन्धरस्य गूर्जरेश्वरश्रीसिद्धराज-कुमारपालनृपालादिसम्मानितस्य प्रबन्धशतकर्तुर्विद्यवेदिनः कविकटारमल्लोपपदधारिणः स्वतन्त्रमहाकवेरीदृशस्य विद्वद्रत्नस्य धीमतो रामचन्द्रसूरेर्मरणं श्रुतमप्यनिकम्पजनकममानुषोचितनीत्याऽजयपालनृपकृतं ऽभवदिति निम्नाङ्कितचरितप्रबन्धोल्लेखादवगम्यते ।

मेरुतुङ्गसूरिः प्रबन्धचिन्तामण्यन्तर्गतरामचन्द्रप्रबन्धे ईदृग् ज्ञापयति स्म—

" अथ श्रीप्रबन्धशतकर्ता रामचन्द्रस्तु तेन भूपालेन तप्तताम्रपट्टिकासनं निवेश्यमानः

' महिवीढह सचराचरह जिण सिरि दिण्हा पाय ।
तसु अत्थमणु दिणेसरह होउत होइ चिराय ॥ '

इत्युदीर्य दशनाग्रेण रसनां छिन्दन् दिवस एव स्वापदमापद्यते । "

कविरत्नरामचन्द्रर्षिहत्याऽऽपधर्माधिपत्यस्याजयपालस्य मरणं विषमेवमुल्लिखति स्म स एव प्रबन्धचिन्तामणिकारः—

१ " कविकटारमल्ल इति-नाम्ना-प्रसिद्धः ... ।

२ महीपीठस्य सचराचरस्य येन शिरसि दत्तः पादः ।
तस्यास्तमनं दिनेश्वरस्य भवितव्यं भवति चिराय ॥

" त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युग्रपुण्य–पापानामिहैव फलमश्नुते ॥ '

इति प्रमाणोक्तप्रामाण्यात् स कुपतिर्वयजल्देवनाम्ना प्रतीहारेण क्षुरिकया हतो धर्मस्थानपातकी कृमिभिर्भक्ष्यमाणः प्रत्यहं नरकमनुभूय परोक्षतां प्रपेदे । सं. १२३० पूर्ववर्षादजयदेवेन वर्ष ३ राज्यं कृतम् ॥ "

वि. सं. १४०५ वर्षे विरचिते प्रबन्धकोषे राजशेखरसूरिरेवं निर्दिशति स्म—" एवं व्रजति काले राजा कुमारपालदेवः श्रीहेमश्च वृद्धौ जातौ । श्रीहेमसूरिगच्छे विरोधः । रामचन्द्र–गुणचन्द्रादिवृन्दमेकतः, एकतो बालचन्द्रः । तस्य च बालचन्द्रस्य राजभ्रातृव्येनाजयपालेन सह मैत्री । एकदा मतावे राज्ञो गुरूणामाभडस्य च रात्री मन्त्रारम्भः । राजा पृच्छति–भगवन् ! अहमपुत्रः कं स्वपदे रोपयामि ? गुरवो ब्रुवन्ति–प्रतापमल्लं दौहित्रं राजानं कुरु धर्मस्थैर्याय, अजयपालात् तु त्वत्स्थापितधर्मक्षयो भावी । अत्रान्तरे आभडः प्राह–भगवन् ! यादृशस्तादृश आत्मीयो भव्यः । पुनः श्रीहेमः—अजयपालं राज मा कृथाः सर्वथैव । एवं मन्त्रं कृत्वोत्थितास्त्रयः । स मन्त्री बालचन्द्रेण श्रुतः, अजयपालाय च कथितः; अतो हेमगच्छीयरामचन्द्रादिषु द्वेषः, आभडे तु प्रीतिः । हेमसूरेः स्वर्गमनं जातम्, ततो दिनद्वात्रिंशता राजा कुमारपालोऽजयपालदत्तविषेण परलोकमगमत् । अजयपालो राज्ये निषण्णः । श्रीहेमद्वेषाद् रामचन्द्रादिशिष्याणां तप्तलोहविष्टरासनयातनया मारणं कृतम् । राजविहाराणां बहूनां पातनम् । लघुक्षुल्लकानाह्वाय्य प्रातः प्रातर्मृगयां कर्तुमभ्यासयति, पूर्वमेते चैत्यपरिपाटीमकार्षुरित्युपहासात् । बालचन्द्रोऽपि स्वगोत्रहत्याकारापक इति ब्रुवद्भिर्ब्राह्मणैर्मनम उत्तारितः, लज्जितो मालवान् गत्वा मृतः । पापं पच्यते हि सद्यः । "

वि. सं. १४९२ वर्षे विरचिते कुमारपालप्रबन्धे जिनमण्डनगणिरपि रामचन्द्रादिष्वजयपालस्य द्वेषहेतुमित्थं सूचयति स्म—

" अथैवं काले कवलितानेकपुरुषरत्ने श्रीकुमारपालभूपालः श्रीहेमसूरिश्च कृतहत्यौ महसा तपसा वयसा च वृद्धौ जातौ । परं हेमसूरिगच्छे विरोधः । रामचन्द्र–गुणचन्द्रवृन्दमेकतः, एकतो बालचन्द्रः; तस्य च राजभ्रातृव्याजयपालेन सह मैत्री ।

१ शर–नमन–मनुमिताब्दे ज्येष्ठामूलीयधवलपक्षसप्तम्याम् । निष्पन्नमिदं शास्त्रं श्रोतृप्रयोगैः सुखं तन्यात् ॥

२ प्रबन्धो योजितः श्रीमत्कुमारनृपतेरयम् । गद्य पद्यैर्नवैः कैश्चित् कैश्चित् प्राक्तननिर्मितैः ॥
श्रीसोमसुन्दरगुरोः शिष्येण यथाश्रुतानुसारेण । श्रीजिनमण्डनगणिना द्व्यङ्क–मनुप्रमितवत्सरे रुचिरः ॥

अथ वार्धक्यमालोक्य चौलुक्यपृथिवीपतिः ।
स्थित्वाऽनु रहसं (स्थित्वैकदा रहो) रात्रौ गुरुं प्रत्येवमूचिवान् ॥ १ ॥

सत्यपि त्वादृशे सर्वविद्याम्भोधौ गुरौ मम ।
फलं गार्हस्थ्यधर्म(वृक्ष)स्य नाभाग्यैस्तनयोऽजनि ॥ २ ॥

दिने दिने जरा चैषा जनयन्ती कृशाङ्गताम् ।
ओमायते समं राज्यलक्ष्मीदानार्हचिन्तया ॥ ३ ॥

[राज्यसूत्रमतः किञ्चिदामुच्य भगवन्नहम् ।
हंसायितुमभीप्सामि समतारसवारिधौ ॥ ४ ॥]

ददाम्यजयपालाय स्वराज्यं भ्रातृसूनवे ।
उत प्रतापमल्लाय दौहित्राय निवेद्यताम् ॥ ५ ॥ *

ततो विमृश्य सूरिभिराभाणि—राजन् ! भ्रातृव्यो न योग्यो दुराशयत्वात्, सत्सङ्गरहितत्वादधर्मनिष्ठत्वादिकारणैर्न बहुराजवर्गीय–प्रजासम्मतः, भ्रातृव्यात् तु त्वत्कारितधर्मस्थानक्षयः कियानास्ति । प्रतापमल्लः प्रजाप्रिय–न्याय–धर्मनिष्ठत्वादिगुणैर्योग्यः । यदुक्तम्—

' धर्मशीलः सदा न्यायी पात्रे त्यागी गुणादरः ।
प्रजानुरागसम्पन्नो राजा राज्यं करोति सः ॥ '

एवं मन्त्रे कृते बालचन्द्रेण स्वरूपमेतदजयपालाय न्यवेदि । तस्य च तदनु रामचन्द्रादिषु श्रीचौलुक्ये च महान् द्वेषः ॥ "

अजयपालाधिपतये मोहराजपराजयनाटकादिनिर्माता जैनमन्त्रियशःपालो राजसचिवपदे नियुक्तो विज्ञायते । एवमन्येऽपि जैना अधिकारिणो राजमान्याश्च धनाढ्याः श्रेष्ठिन आभडादयस्तदा सम्भवेयुः । तथाप्येतादृश्या अतीवनिन्द्यान्याय्यप्रवृत्तिस्तं सत्ताऽधीशं निवारयितुं निष्फलप्रयत्ना भवेयुरित्यतीव शोचनीयं विषादजनकमतिदुःखकरं दुर्दैवदुश्चेष्टितम्, येनेदृग्विधस्य विद्वद्रत्नस्येत्थमपमरणप्रसङ्गः । । ।

---

* इमे पद्य श्लोकाः प्रबन्धकारेण जयसिंहसूरिरचितात् कुमारपालचरिताद् (स.१०, श्लो० १०६) उद्धृता ज्ञायन्ते।

१ सूत्रधारः—" आर्ये ! अस्त्येव श्रीमोढवंशावतंसेन श्रीअजयदेवचक्रवर्तिचरणराजीवराजहंसेन मन्त्रि-धनदेवतनुजन्मना रुक्मिणीकुक्षिसरोलिना सर्वतोमुखनिस्तुषशेमुषीविलासवासभवनेन निर्व्याजराजनीतिनिलयविलासिनीवदनविभ्रममणिदर्पणेन व्यापारिकमलाकुचकलशमुक्ताफलहारयष्टिना सारसारस्वतोदारसारणीसेकसुकुमारस्मेरकाव्यकन्दलप्ररोहेण परमार्हतेन यशःपालकविना विनिर्मितं मोहराजपराजयो नाम नाटकम् ॥ "

—मोहराजपराजयनाटके (गा. ओ. सिरीझ् संस्थया प्रकाशिते पृ. २)

उपसंहारः ।

नलविलासं तत्कर्तारं कविरत्नं रामचन्द्रं चाधिकृत्य यथामति यथाशक्ति यथाज्ञानं यथासाधनं यथोपयुक्तं न्यवेदि । नलविलाससंशोधनकर्मणि आदर्शपुस्तकत्रयमस्माभिरुपलब्धम् । तत्रैकं तावत् प्रतिकृति(प्रेसकॉपी)सदृशं १४१ पत्रं सं. १४८४ वर्षे लिखितादर्शान्नूतनं लेखितं प्रायः शुद्धं कसंज्ञितम्, द्वितीयं ५२ पत्रात्मकं नूतनं क्वचिदशुद्धं खसंज्ञितम्; द्वयमप्येतदत्रत्यसंस्कृतपुस्तकालयसङ्ग्रहसत्कम् । तृतीयं १९ पत्रपरिपूर्णं प्रायः शुद्धं गसंकेतेन मया गसंज्ञितं छाणीजैनज्ञानमन्दिरसत्कं प्रवर्तकश्रीकान्तिविजयजैनमुनिराजस्य कृपया द्वितीयाङ्कमुद्रणसमये सम्प्राप्तम् ।

तथा च नाट्यदर्पणस्य सविवरणस्यादर्शपुस्तकमागरास्थश्रीविजयधर्म-लक्ष्मीज्ञानमन्दिरतः समधिगतम् । वसुदेवहिण्डी–गणधरसार्धशतकबृहद्वृत्त्यादर्शपुस्तके पंन्यासपदाङ्कितसम्पद्विजय-मुनिराजस्य कृपयाऽत्रत्यजैनज्ञानमन्दिरान्तर्गतात् श्रीहंसविजयमुनिराजीयशास्त्रसङ्ग्रहादधिगते । रामचन्द्रसूरिरचितस्तोत्रप्रतिस्त्वत्रत्य 'झवेरी अंबालाल नानाभाई' संज्ञकश्रेष्ठिसङ्ग्रहादधिगता । यतोऽत्र महत्त्वं सौरभं च प्रसृतमतः कृतज्ञतासंसूचकमेतेषामुपकृतं संस्मरामः ।

पूर्वोक्तपुस्तकसाहाय्येन सावधानतया संशोधिते, पाठान्तरादिभिः परिष्कृते, प्राकृतपाठानां संस्कृतच्छायया संस्कृते, प्रस्तावना–पद्यसूचिप्रभृतिभिर्यथौचित्यमुत्तेजितेऽस्मिन् मतिमान्द्यतया प्रमादेन दृष्टिदोषेण वा स्थिता जाता वा स्खलनाः सुमनसः सम्मार्जयिष्यन्तीत्याशास्ते—

श्रीमत्सयाजीरावमहाराजस्य शतार्धवर्षीयसौराज्य-सुवर्णमहोत्सवस्य सुवर्णप्रभाते, वटपद्रे
ता. ११-१-२६


गान्धीत्युपाह्वो भगवानदासतनयः
लालचन्द्रः



॥ श्रीः ॥

श्रीरामचन्द्रसूरिविरचितं

नलविलासम् ।



वैदर्भीं रीतिमहं लभेय सौभाग्यसुरभितावयवाम् ।
दमयन्तीं वैरस्यं दिशति गिरां या परां लक्ष्मीम् ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः—(सप्रमोदम्)

कविः काव्ये रामः सरसवचसामेकवसति-
र्नलस्येदं हृद्यं किमपि चरितं धीरललितम् ।
समादिष्टो नाट्ये निखिलनटमुद्रापटुरहं
प्रसन्नः सभ्यानां कटरि ! भगवानेष स विधिः ॥ २ ॥

तद् गृहं गत्वा रङ्गोपजीविनः प्रगुणयामि (इति परिक्रामति । पुरोऽवलोक्य) कथमयमित एवाभिपतति वयस्यो मन्दारः !

(प्रविश्य)

नटः—भाव ! दत्तः कोऽपि सामाजिकैरभिनयादेशः ?

सूत्रधारः—दत्तः श्रीमदाचार्यहेमचन्द्रस्य शिष्येण रामचन्द्रेण विरचितं नलविलासाभिधानमाद्यं रूपकमभिनेतुमादेशः ।

नटः—भाव ! एतस्यां रामचन्द्रकृतौ सम्भाव्यते कोऽपि सामाजिकानां रसास्वादः ?

सूत्रधारः—मारिष ! सम्भाव्यत इति किमुच्यते ? यतः—

प्रबन्धानाधातुं नवभणितिवैदग्ध्यमधुरान्
कवीन्द्रा निस्तन्द्राः कति नहि मुरारिप्रभृतयः ।
ऋते रामान्नान्यः किमुत परकोटौ घटयितुं
रसान् नाट्यप्राणान् पटुरिति वितर्को मनसि नः ॥ ३ ॥

अपरं च—

> मवन्या इक्षुवत् मायो हीयमानरसाः क्रमात् ।
> कृतिस्तु रामचन्द्रस्य सर्वा स्वादुः पुरः पुरः ॥ ४ ॥

नटः—भाव ! अयमर्थः सत्य एव । यतः—

> सङ्ख्यायामिव काकुत्स्थ-यादवेन्द्रमबन्धयोः ।
> वर्धमानैर्गुणैरङ्काः प्रथमानतिशेरते ॥ ५ ॥

किन्तु रघु-यदुचरितं निसर्गतोऽपि रमणीयम्, अतस्तत्र सुकरो रसनिवेशः । नलचरितं तु न तथा, ततः साशङ्कोऽस्मि ।

सूत्रधारः—मारिष ! मा शङ्किष्ठाः

> श्रुतीनां पीयूषं कविकुलगिरां कीर्तिपदवी
> रसापीतेः पात्रं रघु-यदुचरित्रं विजयते ।
> परं किञ्चित् किञ्चिन्नललितमप्येतदमृत-
> स्रवन्तीं श्रोतॄणां श्रवसि विनिधातुं प्रभवति ॥ ६ ॥

नटः—(विमृश्य) भाव ! अयं कविः स्वयमुत्पादक उताहो परोपजीवकः ?

सूत्रधारः—अत्रार्थे तेनैव कविना दत्तमुत्तरम्—

> जनः मज्ञामाप्तं पदमथ पदार्थं घटयतः
> पराध्वाध्वन्यान् नः कथयतु गिरां वर्त्तनिरियम् ।
> अमावास्यायामप्यविकलविकासीनि कुमुदा-
> न्ययं लोकश्चन्द्रव्यतिकरविकासीनि वदति ॥ ७ ॥

अपि च शपथमत्येयंपदपदार्थसम्बन्धेषु मीतिमादधानं जनमवलोक्य जात-खेदेन तेनेदं चाभिहितम्—

> स्पृहां लोकः काव्ये वहति जरठैः कुण्ठिततमै-
> र्वचोभिर्वाच्येन प्रकृतिकुटिलेन स्थपुटिते ।
> वयं वीथीं गाढुं कथमपि न शक्ताः पुनरिमा-
> मियं चिन्ता चेतस्तरलयति नित्यं किमपि नः ॥ ८ ॥

नटः—(क्षणं विमृश्य) भाव ! अद्य नटी विषादिनी ।

सूत्रधारः—जानासि किमपि विषादस्य कारणम् ?

नटः—जानासि । या भगवत्पुत्री कुन्तला नाम सा भर्त्रा स्वगृहान्निर्वासिता ।

सूत्रधारः—हुं ! कुन्तला भर्त्रा गृहान्निर्वासिता ?

नटः—अथ किम् ।

सूत्रधारः—(विमृश्य) अवश्यं किमप्युक्त्वाप्य कलहे सुप्तैव ?

नटः—सुप्तैव ।

सूत्रधारः—अनवसरस्तर्हि विषादस्य । किञ्च कृतेनापि विषादेन सा पुनर्गेहं न लभ्यते । यतः—

> न स मन्त्री न सा बुद्धिर्न स दोष्णां पराक्रमः ।
> अपूर्णावधिकं येन व्यसनं प्रतिरुध्यते ॥ ९ ॥

यदि च सा निरवद्या, तदा तां पुनरपि पतिः सम्भावयिष्यति ।

नटः—पुनरप्यसमर्थो जातोऽस्मि । किन्तु परमं गृहाधिपत्यमवाप्य सापत्नं सा धर्मचरहृदया तिष्ठतीति मयि विषादमुद्वहति ।

सूत्रधारः—(साक्षेपम्) मारिष ! त्वमप्येवमभिदधासि ! ननु—

> अङ्गारखण्डधर्माणां पूर्वे जन्मनि जन्मिनाम् ।
> आपदः परिपच्यन्ते गरीयस्योऽपि सम्पदः ॥ १० ॥

(नेपथ्ये)

वयस्य कलहंस ! परमेश्वरस्य युगादिदेवस्य सपर्यया वयमतीव श्रान्ताः । तदादेशय स्वरमुखम् । येनास्मद्विश्रामहेतुं सज्जायं कमप्युद्यानप्रदेशमवलोकयति ।

सूत्रधारः—(समाकर्ण्य) कथं नलनेपथ्यधारी नटो वदति ? तदेहि मारिष ! वयमप्यनन्तरकरणीयाय सज्जीभवाम ।

(इति निष्क्रान्तौ)

आमुखम् ।

(ततः प्रविशति राजा कलहंसादिकश्च परिवारः)

राजा—(वयस्य कलहंस इत्यादि पुनः पठति)

कलहंसः—हंहो ! स्वरमुख ! गवेषय कमपि देवस्य विश्रामहेतुमारामप्रदेशम् ।

---

१ ग हर्षं० ।



राजा—वयस्य ! क्षणं मर्षय यावत् सम्यग् निर्णयामि ।

विदूषकः—(१) भो ! ता न निस्सरिस्सं । णियबंभणीचलणसमरणेण नट्ठं मह भयं ।

कलहंसः—(विहस्य) अतीव ब्राह्मणीभक्तोऽयम् ।

राजा—कलहंस ! स्थितिरियं जगतः ।

आत्मन्यपत्ये (त्य-) दारेषु प्राणेषु विभवेषु च ।
इतो नृप इतो रङ्कस्तुल्या प्रीतिर्द्वयोरपि ॥ १३ ॥

तत उत्थाय स्वयं विलोकय कोऽयं द्वारि ।

(कलहंसो निष्क्रम्य पुनः प्रविशति)

विदूषकः—(२) भो रायं ! अहं तुह पिट्ठिभाए चिट्ठिस्सं । बीहामि एआओ बंभरक्खसाओ ।

राजा—(विलोक्य) कथं खट्वाङ्गसङ्गी कापालिकः ? स्वागतं तपोधनाय ।

कलहंसः—मुने ! इदमासनमास्यताम् ।

कापालिकः—(स्वगतम्) अयमपि तावद् द्रष्टव्यः । कदाचिदेनदीयमपि चरितं फाल्गुनीपतिः पृच्छति । (प्रकाशम्) स्वस्ति महाराजाय ।

राजा—कुतस्तपोधनः ?

कापालिकः—साम्प्रतं विदर्भमण्डलात् ।

राजा—क्रियदवधिगमनम् ?

कापालिकः—जीवितावधि ।

राजा—(स्वगतम्) वचनशठस्तापसच्छद्मा चर इव लक्ष्यते । (प्रकाशम्) देशावधिं पृच्छामि ।

कापालिकः—नवनवनीर्थदर्शनश्रद्धालुना तपस्विना कुत एव देशावधिः ।

राजा—(स्वगतम्) नियतमयं चरः । अनुचितमाचरितमस्माभिर्यदस्मिन्नना-श्रने वने समीपीकृतः । कदाचिदयं घातकोऽपि स्यात् । भवतु तावत् । (प्रकाशम्) कुतो भवति दीक्षासद्गमः ?

(१) भोः ! तत् निःसरिष्यामि, निजब्राह्मणीचरणस्मरणेन नष्टं मम भयम् ।

(२) भो राजन् ! अहं तव पृष्ठभागे स्थास्यामि, बिभेमि एतस्माद् ब्रह्मराक्षसात् ।

राजा—वयस्य ! सर्वं भवति तावत् सम्यक् निर्णयामि ।

विदूषकः—(१) भो ! ता ण णिरासिदव्वं । णिअबम्हणीसमागमसुहेण णट्ठं मह भअं ।

कलहंसः—(विहस्य) भवतीव समाकर्णितमेतत् ।

राजा—कलहंस ! विपरीतोऽयं क्रमः ।

आपत्पतने (स्व-) दारेषु प्राणेषु विपत्सु च ।
इतो नृप इतो बन्धुतुल्या प्रीतिर्द्विधाऽभवत् ॥ १३ ॥

तत् उद्याने स्वयं विलोकय कोऽयं द्वारि ।

(कलहंसो निष्क्रम्य पुनः प्रविशति)

विदूषकः—(२) भो राअं ! अहं तुह पिट्ठिदो चिट्ठिस्सं । पीडादि एआसो पवरवस्सत्ताओ ।

राजा—(विलोक्य) कथं ... कापालिकः ? स्वागतं तपोधनाय ।

कलहंसः—कुतो ! इदमासनमास्यताम् ।

कापालिकः—(स्वगतम्) अवसरो तावत् ... । ... पृच्छति । (प्रकाशम्) स्वस्ति महाराजाय ।

राजा—कुतस्तपोधनः ?

कापालिकः—साम्प्रतं विदर्भमण्डलात् ।

राजा—किमर्थमपि गमनम् ?

कापालिकः—जीविकार्थमपि ।

राजा—(स्वगतम्) ... । (प्रकाशम्) देशान्तरमपि पृच्छामि ।

कापालिकः—... भगवतो ... एव देशान्तरेऽपि ।

राजा—(स्वगतम्) निश्चयमेतत् । ... पूर्वं मम सखीभूता । ... भवतु तावत् । (प्रकाशम्) कुतो भवति ... ?

(१) भोः ! तत् निराशयितव्यं, निजब्राह्मणीसमागमसुखेन नष्टं मम भयम् ।

(२) भो राजन् ! अहं तव पृष्ठतः स्थास्यामि, ...

कापालिकः—रामगिरिनिवासिनः कापालिकचूडामणेश्चन्द्रशेखरात् ।

विदूषकः—(१) दिट्ठिया मई सालो समागदो । सो खलु चंदसेहरो मम बंभणीए दिमा ।

कलहंसः—(विहस्य) मुने ! महोपाध्यायोऽसौ निषधायां. तदमुना भगिनीपतिना भवद्भिर्न लज्जितव्यम् ।

कापालिकः—(सरोषम्) सम्पदापि निवेदितमस्य महोपाध्यायत्वम् ।

राजा—(स्मित्वा) अल्पसम्पत्तिकत्वमेतुरमहोपाध्यायत्वे । अल्पवेतना हि विद्यार्थिनः प्रायेण ।

देवीं वाचमविरैकीयां विक्रीणीते धनेन यः ।
कुचेव तस्यै सा मूल्यमल्पपुरोरीकयेत् ॥ १४ ॥

कापालिकः—(सोपहासम्) किमभिधानोऽयं महोपाध्यायः ?

राजा—गरगुणाभिधानोऽयम् ।

कापालिकः—(सोपहासम्) आकारानुरूपमभिधानम् ।

राजा—मुने ! किमभिधानमलङ्करोषि ? ।

कापालिकः—सर्वोदराभिधानोऽस्मि ।

विदूषकः—(२) भाणिदीए सरिसं णामं ।

राजा—(सस्मितम्) वयस्य ! सर्वस्याभ्यागतो गुरुरिति नैनं हसितुमर्हसि ।

विदूषकः—(३) सयाणं वि कंमधारिणं किं मे एस हसदि, अहं कीस ण हसिस्सं ?

राजा—अयमयम्भः सामान्योऽन्यासः परिहासस्य ।

मनोऽपि देहिनस्तेन तृणमपि पीडयेत् ।
कान्यमर्थमनर्थानि यतः कान्तिमुपासते ॥ १५ ॥

विदूषकः—(४) भो कावालिया ! जेद मे णञ्चणं विरसं ण करेसि, ता हि ति कन्देमि ।

(१) दिष्ट्या मम वयस्य. सुरगतः । स खलु चन्द्रशेखर एव [illegible]
(२) भगिन्या सदृशं नाम ।
(३) [illegible] किं [illegible] ? अहं [illegible] न [illegible] ।
(४) भोः कापालिक ! यदि मे नर्तनं विरसं न करोषि, तत् किमिति क्रन्दसि ।

[illegible]

कापालिकः—यथेच्छं विज्ञपय।

विदूषकः—(१) जई मे इमं खट्टंगं समप्पेसि, ता तुह बहिणीए खंडणोवगरणं मुसलं भोदि।

कापालिकः—(सरोषम्) आः पाप! ब्राह्मणब्रुव! मामासादितपरमब्रह्माणं तपोधनमवजानासि? एष ते खट्वाङ्गेन शिरः पातयामि।

विदूषकः—(सरोषमुत्थाय) (२) अरे दासीपुत्त! कावालिया! लहु इदो एहि, जेण दे एदिणा जण्णोपविदेण मत्थयं तोडेमि।

(उभौ नियुध्येते)

राजा—अलमलमनुचिताचरणेन। कलहंस! निवारय निवारय।

कलहंसः—(परिक्रम्य) किमिदं युध्यमानस्य कापालिनः कक्षातः पतितम्?

राजा—(विलोक्य) कलहंस! किमिदम्?

कलहंसः—देव! अनेकवस्त्रग्रन्थिनिवद्धा मात्रेयं कापालिनः सम्भाव्यते।

राजा—मध्यमवलोकय। (कलहंसः तथा करोति)

कापालिकः—(विलोक्य सभयमात्मगतम्) हा! हतोऽस्मि। (युद्धाद् विरम्य प्रकाशमुच्चैःस्वरम्) भो भो! नालोकनीयं मन्मन्त्रपुस्तकम्।

कलहंसः—(विलोक्य) कथं वस्त्रान्तरे लेखः?

राजा—(गृहीत्वा वाचयति) स्वस्ति। महाराजचित्रसेनं मेषमुखः प्रणम्य विज्ञपयति यथा सर्वमपि युष्मन्मनोरथानुरूपं सम्भाव्यते। इयं च कोष्ठकहस्तात् तत्प्रतिकृतिर्ग्राह्येति।

कलहंसः—कोऽयं चित्रसेनः? को मेषमुखः? कः कोष्ठकः? का वा सा? यस्याः प्रतिकृतिः।

राजा—अव्यक्तस्थानप्रचारलेखोऽयं न शक्यते ज्ञातुम्। भवतु तावत्, पुरोऽवलोकय।

(१) यदि मे इदं खट्वाङ्गं समर्पयसि, तदा तव भगिन्याः खण्डनोपकरणं मुशलं भवति।

(२) अरे दासीपुत्र! कापालिक! लघु इत एहि, येन त एतेन यज्ञोपवीतेन मस्तकं त्रोटयामि।

१ क. यथेष्टं। २ क. जय। ३ स. कृपा०।

(कलहंसः तथा करोति)

कापालिकः—(सभयमुच्चैःस्वरम्) तदेव व्याहरति ।

कलहंसः—(विलोक्य सहर्षमात्मगतम्) अहो ! स्त्रीरत्नं सेयं स्वप्नदृष्टा मुक्तावली । स चैव नैमित्तिकावेदितः स्वमार्थज्ञानमत्ययहेतुरर्थः । (प्रकाशम्) देव ! सफलीक्रियतां नेत्रनिर्माणं लोकोत्तरवस्तुदर्शनेन ।

राजा—(विलोक्य सहर्षप्रकर्षम्) अहो ! बहूनां वस्तूनामेकत्र वासः ।

वक्त्रं चन्द्रो नयनयुगली पाटलाम्भोजयुग्मं
　नासानालं दशनवसनं फुल्लबन्धूकपुष्पम् ।
कण्ठः कम्बुः कुचयुगमथो हेमकुम्भौ नितम्बौ
　गङ्गारोधश्चरणयुगलं वारिजद्वन्द्वमेतत् ॥ १६ ॥

किञ्च—

लावण्यपुण्यतनुयष्टिमिमां मृगाक्षीं
　जाने स्वयं घटितवान् भगवान् विधाता ।
स्वर्योपितामपि चिरस्पृहणीयमङ्ग-
　विन्याससौरभमिदं कथमन्यथाऽस्याः ॥ १७ ॥

(पुनर्विमृश्य) मुने ! किमिदम् ?

कापालिकः—(सरोषमिव) यथेदं मौक्तिकमायमाभरणं, यथा दन्तपत्राश्रितौ कर्णपाशौ; तथा जाने दाक्षिणात्यायाः कस्या अपि योषितः प्रतिकृतिरियम् ।

राजा—(विलोक्य सस्पृहम्)

अशेषाणां मध्ये जलनिधिमणीनां गुणजुषः
　परं मुक्ता व्यक्तं दधतु हृदि दर्पं किमपरैः ?
अयं यासां मल्लीमुकुलनवदामद्युतिहरः
　प्रभातारो हारः स्वपिति सुखमस्याः स्तनतटे ॥ १८ ॥

किञ्च—

दासस्तस्य गजान्वयार्णवमणेः स्तम्बेरमस्य स्वयं
　पौलोमीकृतचित्रकर्बुररदः सोऽप्यभ्रमूवल्लभः ।
यद्दन्तान्तविनिर्मिते प्रचलनमेह्लोलिनी कुण्डले
　काण्डीरस्मरपाण्डुगण्डफलकावस्याश्चिरं चुम्बतः ॥ १९ ॥

(पुनः सविनयम्) मुने ! सर्वथा कथय किमिदम् ?

कापालिकः—प्राणात्ययेऽपि किमसत्यमाभाष्यते ?

राजा—भवतु तावत्, कथय कुत्रेयं समासादिता ?

कापालिकः—अत्रैव कानने।

राजा—यद्येवं ध्रुवमियं देवतामतिकृतिः काऽपि कस्यापि युगादिदेवदेवतायतनवन्दनार्थमागतस्त्रि (स्य त्रि) दशस्य हस्ताभिपतिता, अनेन च समासादिता।

विदूषकः—(१) भो ! दाव पच्छा एदा जाणेयव्वा, पढमं पदाए समीवे मं धरेघ; जेण दिट्ठिदोसो से न भोदि।

राजा—(सप्रमोदम्) साधु वयस्य ! साधु सर्वथा केलिकुशलोऽसि। (दिशोऽवलोक्य) काऽत्र भोः ! करङ्कवाहिनीषु ?

(प्रविश्य)

युवतिः—(२) एसा चिट्ठामि।

राजा—अयि मकरिके ! वयस्याय मसादताम्बूलं प्रयच्छ।

मकरिका—(तथा कृत्वा) (३) भट्टा ! किं एदं महया पयत्तेण अवलोईयदि ?

राजा—आयुष्मति ! देवतामतिकृतिरियम्।

मकरिका—(विलोक्य विमृश्य च) (४) भट्टा ! न एसा देवयापडिकिदी।

राजा—(ससम्भ्रमम्) तर्हि किमेतत् ?

मकरिका—(५) जइ मे पारितोसिअं किंपि भट्टा पयच्छदि, ता कहेमि।

राजा—(सादरम्) निषधां तुभ्यं पारितोषिकं दास्यामि। भृशमावेदय।

मकरिका—(६) भट्टा ! एसा विदब्भाहिवइणो भीमरहस्स पुत्तीए दमयंतीए पडिकिदी।

(१) भोस्तावत् पश्चादेषा ज्ञातव्या। प्रथममेतस्याः समीपे मां धरत, येन दृष्टिदोषोऽस्या न भवति।

(२) एषा तिष्ठामि। (३) भर्तः ! किमेतत् महता प्रयत्नेनावलोक्यते ?

(४) भर्तः ! नैषा देवताप्रतिकृतिः।

(५) यदि मे पारितोषिकं किमपि भर्ता प्रयच्छति, तदा कथयामि।

(६) भर्तः ! एषा विदर्भाधिपतेर्भीमरथस्य पुत्र्या दमयन्त्याः प्रतिकृतिः।

१ क. पयच्छदि।

(कलहंसः तथा करोति)

कापालिकः—(समयमुच्चैःस्वरम्) तदेव व्याहरति ।

कलहंसः—(विलोक्य सहर्षमात्मगतम्) अहो ! स्त्रीरत्नं सेयं स्वमदृष्टा मुक्तावली । स चैव नैमित्तिकावेदितः स्वमार्थज्ञानप्रत्ययहेतुरर्थः । (प्रकाशम्) देव ! सफलीक्रियतां नेत्रनिर्माणं लोकोत्तरवस्तुदर्शनेन ।

राजा—(विलोक्य सहर्षप्रकर्षम्) अहो ! बहूनां वस्तूनामेकत्र वासः ।

वक्त्रं चन्द्रो नयनयुगली पाटलाम्भोजयुग्मं
नासानालं दशनवसनं फुल्लबन्धूकपुष्पम् ।
कण्ठः कम्बुः कुचयुगमथो हेमकुम्भौ नितम्बौ
गङ्गारोधश्चरणयुगलं वारिजद्वन्द्वमेतत् ॥ १६ ॥

किञ्च—

लावण्यपुण्यतनुयष्टिमिमां मृगाक्षीं
जाने स्वयं घटितवान् भगवान् विधाता ।
स्वर्योपितामपि चिरस्पृहणीयमङ्ग-
विन्याससौरभमिदं कथमन्यथाऽस्याः ॥ १७ ॥

(पुनर्विमृश्य) मुने ! किमिदम् ?

कापालिकः—(सरोषमिव) यथेदं मौक्तिकप्रायमाभरणं, यथा दन्तपत्राञ्चितौ कर्णपाशौ; तथा जाने दाक्षिणात्यायाः कस्या अपि योषितः प्रतिकृतिरियम् ।

राजा—(विलोक्य सस्पृहम्)

अशेषाणां मध्ये जलनिधिमणीनां गुणजुषः
परं मुक्ता व्यक्तं दधतु हृदि दर्पं किमपरैः ?
अयं यासां मल्लीमुकुलनवदामद्युतिहरः
प्रभातारो हारः स्वपिति सुखमस्याः स्तनतटे ॥ १८ ॥

किञ्च—

दासस्तस्य गजान्वयार्णवमणेः स्तम्बेरमस्य स्वयं
पौलोमीकृतचित्रकर्बुररदः सोऽप्यभ्रमुवल्लभः ।
यद्दन्तान्तविनिर्मिते प्रचलनमेह्वोलिनी कुण्डले
काण्डीरस्मरपाण्डुगण्डफलकावस्याश्चिरं चुम्बतः ॥ १९ ॥

(पुनः सविनयम्) मुने ! सर्वथा कथय किमिदम् ?

कापालिकः—प्राणात्ययेऽपि किमसत्यमाभाष्यते ?

राजा—भवतु तावत्, कथय कुत्रेयं समासादिता ?

कापालिकः—अत्रैव कानने।

राजा—यद्येवं ध्रुवमियं देवताप्रतिकृतिः काऽपि कस्यापि युगादिदेवदेवता-यतनवन्दनार्पमागतस्त्रि (स्य त्रि) दशस्य हस्तात्परिपतिता, अनेन च समासादिता।

विदूषकः—(१) भो ! दाव पच्छा एदा जाणेयव्वा, पढमं एदाए समीवे मं धरेध; जेण दिट्ठिदोसो से न भोदि।

राजा—(सप्रमोदम्) साधु वयस्य ! साधु सर्वथा कौलिकुशलोऽसि। (दिशो-ऽवलोक्य) काऽत्र भोः ! करङ्कवाहिनीषु ?

(प्रविश्य)

युवतिः—(२) एसा चिट्ठामि।

राजा—अयि मकरिके ! वयस्याय प्रसादताम्बूलं प्रयच्छ।

मकरिका—(तथा कृत्वा) (३) भट्टा ! किं एदं महया पयत्तेण अवलोईयदि ?

राजा—आयुष्मति ! देवताप्रतिकृतिरियम्।

मकरिका—(विलोक्य विमृश्य च) (४) भट्टा ! न एसा देवयापडिकिदी।

राजा—(ससम्भ्रमम्) तर्हि किमेतत् ?

मकरिका—(५) जइ मे पारितोसिअं किंपि भट्टा पैयच्छदि, ता कहेमि।

राजा—(सादरम्) निपर्धा तुभ्यं पारितोपिकं दास्यामि। भृशमावेदय।

मकरिका—(६) भट्टा ! एसा विदब्भाहिवइणो भीमरहस्स पुत्तीए दम-यंतीए पडिकिदी।

(१) भोस्तावत् पश्चादेषा ज्ञातव्या। प्रथममेतस्याः समीपे मां धरत, येन दृष्टिदो-षोऽस्या न भवति।

(२) एषा तिष्ठामि। (३) भर्तः ! किमेतत् महता प्रयत्नेनावलोक्यते ?

(४) भर्तः ! नैषा देवताप्रतिकृतिः।

(५) यदि मे पारितोषिकं किमपि भर्ता प्रयच्छति, तदा कथयामि।

(६) भर्तः ! एषा विदर्भाधिपतेर्भीमरथस्य पुत्र्या दमयन्त्याः प्रतिकृतिः।

१ क. पअच्छदि।

राजा—कथं पुनर्ज्ञातवती भवती ?

मकरिका—(१) भट्टा ! कुंडिणपुरे मे मादिकुलं । तदहं सव्वं पि विदब्भवुत्तंतं जाणेमि ।

राजा—(स्वगतम्) सम्भवत्येतत् । उक्तं चानेन कापालिकेन यथाऽयं साम्प्रतं विदर्भमण्डलादायातः । (प्रकाशम्) मुने ! दमयन्तीप्रतिकृतिरियम् ?

कापालिकः—ब्रह्मचारिणो वयम्, न योषित्कथां प्रथयामः ।

राजा—(सरोषम्) पाखण्डिचाण्डाल ! कौटकुटिक ! तापसच्छद्म प्राणिधिरसि । कोऽत्र भोः ?

(प्रविश्य)

दण्डपाणिः पुरुषः—एषोऽस्मि ।

राजा—अये भीम ! एनं नियम्य कारायां क्षिप ।

पुरुषः—यदादिशति देवः (इत्यभिधाय कापालिकं जटासु गृहीत्वा भीमो निष्क्रान्तः)

कलहंसः—मूर्त्या शान्तात्मेवायं परमतीव दुष्टः । भद्रया मुद्रयैव प्रतिहतमुद्दर्शां पाखण्डिनां शान्तात्मत्वम् । अपि च—

> शान्तात्माऽपि खलः खलः कथमपि व्यारूढवाढावमो-
> च्छेदस्यापि सतो न वर्त्म चरितुं जह्वालकेलिक्रमः ।
> इन्दोः कुन्दसितैश्रितापि परितो दोषैव दोषा करै-
> स्छन्नस्यापि पयोधरैः प्रतिदिशं नाह्नः श्रियं गाहते ॥ २० ॥

(पुनर्विमृश्य) मकरिके ! सत्यं मानुषीप्रतिकृतिरियम् ?

मकरिका—(२) किं अन्नहा भट्ट(ट्टि)णो विन्नवीयदि ?

राजा—

> कामं कामं कुसुमधनुषोऽप्यावहन्ती सशोके
> लोकेऽप्यस्मिन् यदि मृगदृशामीदृशी रूपलक्ष्मीः ।
> क्लेशाकीर्णे तपसि विपुलस्वर्गभोगोत्सुकानां
> मन्दीभूता खलु तदधुना प्राणभाजां प्रवृत्तिः ॥ २१ ॥

(पुनर्विमृश्य) वयस्य ! त्वत्प्रयत्नकृतोऽयमस्माकं रत्नलाभः । कोऽत्र भोः ?

---

(१) भर्तः ! कुण्डिनपुरे मे मातृकुलम्, तदहं सर्वमपि विदर्भवृत्तान्तं जानामि ।

(२) किमन्यथा भर्तुर्विज्ञाप्यते ?

१. रौद्रया ।

(प्रविश्य)

पुरुषः—एषोऽस्मि ।

राजा—अये माकन्द ! खरमुखाय घनकालङ्कारं प्रयच्छ ।

(यदाज्ञापयति देव इत्यभिधाय माकन्दो निष्क्रान्तः)

विदूषकः—(१) जिदं मए जिदं मए । (ऊर्ध्वबाहुः प्रनृत्यति)

राजा—(स्मित्वा)

संयोगे श्रीमतो भोगे वैकल्यस्य निबन्धनम् ।
तमस्तु वस्तुचिन्तायां शरण्या श्रीरधिका मदात् ॥ २२ ॥

(पुनः साभिलाषं प्रतिकृतिमवलोक्य स्वगतम्) विफल एव ममावतारो जगति यदेनया सह सलीलमशोकवने न विहरामि । (प्रकाशम्) मकरिके ! दमयन्ती कन्यका ?

मकरिका—(२) अथ इं ।

राजा—अनुगृहीतोऽस्मि वेधसा (पुनरपवार्य) कलहंस ! त्रिजगतोऽप्यसुलभं वस्तु सम्पादयितुं न शक्नोषि ?

कलहंसः—किमपरमुच्यते ? यदि मन्मार्गैरपि सम्पद्यते, तदा सम्पादयामि ।

(नेपथ्ये तूर्यध्वनिः)

कलहंसः—देव ! युगादिदेवदेवतायतनसन्ध्याबलिपटहध्वनिरयम् ।

राजा—(स्वगतम्) अहो ! परमं शाकुनम् । (पुनर्विमृश्य) प्रेषयाम्येनं दमयन्त्याः पार्श्वे । इयं च मकरिका विदर्भभाषावेषाचारकुशला सहैव यातु ।

(पुनर्नेपथ्ये)

भो भो गन्धर्वलोकाः ! स्वकार्याणि कृत्वा शीघ्रमागच्छत युगादिदेवसन्ध्यासङ्गीतकमनुष्ठातुम् ।

राजा—(सप्रमोदमात्मगतम्) अहो ! प्रयोजनसमर्थः शब्दपातः । ध्रुवमयं कलहंसः प्रयोजनमापाद्य शीघ्रमायास्यति । भवतु । (प्रकाशम्) कलहंस ! चित्र-

(१) जितं मया जितं मया । (२) अथ किम् ।

कर्मालङ्कर्मीणान्युपकरणानि प्रगुणयितुं व्रज। मकरिके! वैदर्भीप्रतिकृतिं त्वं गृहाण। वयस्य! दर्शय पन्थानं येन सन्ध्याविधिमाधाय सौधमलङ्कर्महे।

(इति निष्क्रान्ताः सर्वे)

॥ प्रथमोऽङ्कः ॥

द्वितीयोऽङ्कः।

(नेपथ्ये)

स्वागतं कलहंसाय सपरिच्छदाय।

(ततः प्रविशति कलहंसः मकरिकाप्रभृतिश्च परिवारः)

कलहंसः—कथं मत्तमयूरोद्यानरक्षकः शेखरोऽस्मदागमनमनुमोदते?

(प्रविश्य)

शेखरः—आर्य कलहंस! युष्मदागमनोत्कण्ठितोऽतीव देवो वर्त्तते। तदहं गत्वा निवेदयिष्यामि। (इति निष्क्रान्तः)

कलहंसः—अयि मकरिके! कच्चिदिदमभिहिता त्वया लम्बस्तनी? यथा यावद् वयं त्वदागमनं देवाय विज्ञापयामः, तावत् त्वया मत्तमयूरोद्यान एव स्थातव्यम्।

मकरिका—(१) अप इं।

कलहंसः—अपि प्रगुणीकृतानि देवस्योपायनीकर्तुं विदर्भमण्डलोद्भवानि वस्तूनि?।

मकरिका—(२) सव्वमाचरिदं।

(नेपथ्ये)

भो भोः सभाचारिणः! प्रगुणीक्रियतां सिंहासनम्। अहो गन्धर्वलोकाः! प्रारभ्यतां सङ्गीतकम्। इदानीमास्थानमलङ्करिष्यति देवः।

---

(१) अप किम्। (२) सर्वमाचरितम्।

१ ख. अयि। २ क. ० स्यौपनयनी०।

कलहंसः—कथमयममात्यः किम्पुरुषो वदति ?

(नेपथ्ये)

(१) इदो इदो पियवअस्स !।

कलहंसः—मकरिके ! यथाऽयं खरमुखो व्याहरति, तथा जाने समायाति देवः। तदास्थानमुपसर्पाव। (इति परिक्रामतः)

(ततः प्रविशति सिंहासनस्थो राजा, किम्पुरुष–खरमुखादिकश्च परिवारः)

राजा—(स्मृत्वा विदूषकं प्रति) वयस्य ! प्राप्तः कनकालङ्कारः ?

(प्रविश्य)

शेखरः—देव ! प्राप्तः।

राजा—(ससम्भ्रमम्) कः प्राप्तः ?

शेखरः—देव ! दिष्ट्या वर्धसे। प्राप्तो मत्तमयूरोद्यानं सपरिच्छदः कलहंसः

किम्पुरुषः—न केवलमुद्यानं सभां च।

(कलहंस उपसृत्य मकरिकया सह प्रणमति)

राजा—(बाहुभ्यामाश्लिष्य) अपि कुशलवान् कलहंसः ? कुशलवती मकरिका ?

कलहंसः—देवस्य प्रतापेन।

राजा—(सोत्सुक्यम्) समर्थितमनोरथः समायातोऽसि ?

कलहंसः—न समर्थितमनोरथः।

राजा—हताः स्मः।

कलहंसः—किन्तु सम्भावितमनोरथोपायः समायातोऽस्मि।

राजा—(सहर्षम्) अनुगृहीताः स्मः। उपायसम्भावनायामुपेयमपि सम्भाव्यते। भवतु तावत्। दृष्टवानसि विदर्भराजात्मजाम् ?

कलहंसः—देव ! अदृष्टविदर्भराजात्मजस्य कलहंसस्य विदर्भगमनं निष्फलम्।

राजा—न केवलमदृष्टविदर्भराजात्मजस्य कलहंसस्य विदर्भगमनं निष्फलं, जन्मापि। भद्रलं वाचालताविस्तरेण। प्रथमं तावद् दमयन्तीतनुचारिमाणं समासतो विज्ञपय।

(१) इत इतः प्रियवयस्य !।

१ ख. ०वअस्सो। २ ख. वर्धापसे। ३ ख. अपि। ४ ख. विदर्भेरित०।

कलहंसः—अयं समासः ।

राजा—(सप्रमोदम्)

> वैदर्भीमनुवर्णनां रसघनश्रोतव्यसीमामिमा-
> माकर्ण्य श्रवणौ ! युवां गमयथः स्वं जन्म तावत्फलम् ।
> त्रैलोक्याद्भुतरूपदर्शनसुधासम्पर्कहेतुः पुनः
> पुण्यं वां नयने ! फलिष्यति वपुर्लावण्यपुण्योत्सवे ॥ १ ॥

कलहंस ! सावधानोऽस्मि ।

कलहंसः—देव !

> काम्यं यत्र मुखं [illegible] कुरङ्गीदृशो
> यत्र [illegible] शशाङ्केन किम् ?
> [illegible] यदि [illegible] वैभवे
> वैदर्भी यदि [illegible] किम् ? ॥ २ ॥

राजा—(सहर्षमात्मगतम्) यदि [illegible] विदर्भराजतनयायां गति [illegible] [illegible], [illegible] नलकर्णान्तकलिकाकर्णनम् । (पुनर्विशेषतोऽवगम्य) [illegible] [illegible] विदर्भराजात्मजोऽऽरण्यगौरवर्णना- [illegible] ! ([illegible])

> [illegible]
> [illegible] ।
> [illegible] ! [illegible] ! [illegible]
> वैदर्भि [illegible] ! [illegible] ॥ ३ ॥

कलहंसः—अपि च देव !

> [illegible]
> [illegible] ।
> [illegible]
> [illegible] ॥ ४ ॥

[illegible]

विदूषकः—(१) ही ही भो कलहंस ! सुट्ठु तए दमयंतीए अंगचंगत्तणं समासेण कहिदं, ता सत्थि भवदे भोदु ।

कलहंसः—(ससम्भ्रमम्) कथमार्यः खरमुखः? खरमुख ! नमस्ते ।

विदूषकः—(२) मह समाणविहवो होहि ।

मकरिका—(३) अज्ज ! पणमामि ।

विदूषकः—(४) मम सरिसं रूविणं पइं लहसु ।

राजा—(स्मित्वा) अहो ! परमसम्पत्तिहेतुराशीर्वादः ।

विदूषकः—(५) भो ! तए मह जोग्गं न किं पि विदब्भमंडलादो आणीदं ?

कलहंसः— अस्त्यानीतम् ।

राजा—(स्मित्वा सौत्सुक्यम्) अलमप्रस्तुतेन । सविस्तरं विदर्भराजतनयास्वरूपमावेदय ।

कलहंसः—देव !

> चलकमलविलासाभ्यासिनी नेत्रपत्रे
> दशनवसनभूमिर्बन्धुजीवं दुनोति ।
> स्मरभरपरिरोहत्पाण्डिमागूढरूढ-
> द्युतिविजितमृगाङ्का मोदते गण्डभित्तिः ॥ ५ ॥

राजा—यथायं कलहंसो वर्णयति, तथैव यदि तस्या अङ्गसन्निवेशो यदि च भगवाननुकूलो विरञ्चिस्तदा न निषधाधिपतेरपरो भूर्भुवःस्वस्त्रयेऽपि पुण्यमागल्भ्यवान्।

विदूषकः—(६) भो कलहंस ! ताए कण्णगाए मह वत्ता कावि पुच्छिदा ?

मकरिका—(७) पुच्छिदा ।

विदूषकः—(सहर्षम्) (८) किं ताए भणिदं ?

---

(१) अहो अहो ! भोः कलहंस ! सुष्ठु त्वया दमयन्त्या अङ्गचङ्गत्वं समासेन कथितम् । तत् स्वस्ति भवते भवतु ।

(२) मम समानविभवो भव। (३) आर्य ! प्रणमामि ।

(४) मम सदृशं रूपिणं पतिं लभस्व ।

(५) भोः ! त्वया मम योग्यं न किमपि विदर्भमण्डलादानीतम् ?

(६) भोः कलहंस ! तया कन्यकया मम वार्ता काऽपि पृष्टा ?

(७) पृष्टा । (८) किं तया भणितम् ?

मकरिका—(१) एदं भणिदं, सो गद्दहमुहो किं करेदि ?

विदूषकः—(सरोषम्) (२) हुं सा मं गद्दहमुहं भणादि, ता न तस्स वण्णणं सुणिस्सं ।

कलहंसः—अपरं च ।

> कार्कश्यभूः स्तनतटी न गिरां विलासः
> केशाः परां कुटिलतां दधते न चेतः ।
> तस्याः कुरङ्गकदृशो नृपचक्रशक्र !
> जाड्यं गतौ न तु मतौ विधृतावकाशम् ॥ ६ ॥

किम्पुरुषः—(स्वगतम्) ध्रुवमीदृशस्य स्त्रीरत्नस्य सम्प्राप्तिर्भरतार्द्धराज्यमुपनयति ।

कलहंसः—अपि च स्वयं विमृश्य सोऽयमवयवानां सौन्दर्यलेशो देवाय विज्ञपितः । परमार्थेन तु—

> वदनशशिनो नेत्राम्भोजद्वयस्य कपोलयोः
> स्तनकलशयोर्दोष्णोर्नाभेर्नितम्बतटस्य च ।
> तनुतनुलताज्योत्स्नावीचीनिमग्नदृशा मया
> न खलु कलितो दोषः कश्चिद् गुणो न च कश्चन ॥ ७ ॥

विदूषकः—(सहर्षम्) (३) ही ही भो ! तीए अयं ज्जेव महंतो दोसो जं सरीरे तेएण पिखिदुं पि न सक्कीयदि ।

राजा—(सस्पृहमात्मगतम्)

> आः ! किं भविष्यति स कोऽपि कदापि विश्व-
> कल्याणकन्दजलदप्रतिमो मुहूर्तः ।
> यस्मिन् विदर्भतनयावदनेन्दुसङ्गा-
> दुत्फुल्लपक्षिकुमुदं तदिदं मम स्यात् ॥ ८ ॥

कलहंसः—किञ्चिन्निर्निमेषनेत्रविषय एव वैदर्भीरूपमरूपं मत्यशीकृतोऽपि ... वाचा वर्णयितुम् ।

---

(१) एतद् भणितम्, स गर्दभमुखः किं करोति ?

(२) हुं ! सा मां गर्दभमुखं भणति, ततो न तस्या वर्णनं श्रोष्यामि ।

(३) अहो अहो ! भोः ! तस्या अयमेव महान् दोषो यत् शरीरे तेजसा प्रेक्षितुमपि न शक्यते ।

राजा—(सप्रश्रयमात्मगतम्) निर्निमेषनेत्रविषय एव वैदर्भीरूपप्रकर्ष इति पद्मस्मारप्रभृतिः । ध्रुवं भविष्यति तद्दर्शनं नः ।

किम्पुरुषः—(साशङ्कमिव) तद्देव किं किमपि यत्कविगिरामप्यगोचरः ?

राजा—(सरोषममात्यं प्रति) अयुक्तमभिदधासि । यतः—

अधिका वर्णना वर्ण्यात् क्वचिद् वर्ण्यं ततोऽधिकम् ।
वर्ण्यस्याकान्ति-कान्तिभ्यां द्वयमप्युपपद्यते ॥ ९ ॥
अत्यन्तकमनीयं हि स्तोतुं वाचोऽपि नेशते ।
स्वरूपतः सुधास्वादं वक्तुं ब्रह्मापि न क्षमः ॥ १० ॥

तदलमतिविस्तरेण । कलहंस ! कथय तावदितः स्थानाद् गतेन किमाचरितं त्वया ?

कलहंसः—देव ! देवप्रतिकृतिं दमयन्तीप्रतिकृतिं चादाय देवपादान् प्रणम्य कतिपयैरेवाहोभिरहं कुण्डिनमभिगतवान् ।

राजा—(सत्वरम्) ततस्ततः ।

कलहंसः—अनन्तरमनया मकरिकया स्वाभिज्ञानद्वारेण कथमप्यावयोः कन्यान्तःपुरे प्रवेशः कृतः ।

राजा—(सस्पृहम्) आयुष्मति मकरिके ! किमभवती भवती प्रथमं वैदर्भी दृष्टवती ?

मकरिका—(१) अथ इं ।

राजा—ततस्ततः ।

मकरिका—(२) तदो पडिदिणं सेवावसरेण दमयंतीपासं गच्छंति, जधावसरं च देवस्स रूव-लावण्ण-विक्कमप्पमुहं चरिदं विण्णवेमि ।

राजा—(सादरम्) ततस्ततः ।

मकरिका—(३) एगदा हरिसिदहिअआए दमयंतीए भणिदं कधा-सुदं जेव एसा णिसढाहिवइणो इह अत्थि ? आदु अण्णो वि को वि ? तदो मए भणिदं-

(१) अथ किम् । (२) ततः प्रतिदिनं सेवावसरेण दमयन्तीपार्श्वं गच्छन्ती, यथावसरं च देवस्य रूप-लावण्य-विक्रमप्रमुखं चरितं विज्ञपयामि ।

(३) एकदा हर्षितहृदयया दमयन्त्या भणितं कथा-श्रुतैव एषा निषधाधिपतेरिह, अथवाऽन्योऽपि कोऽपि ? ततो मया भणितम्-

१ क. [illegible]

ो वि सव्वरहस्सट्ठाणं दुदियं पिव हिदयं निसढाहिवइणो पियवयस्सो कलहंसो अत्थि ।

किम्पुरुषः—मकरिके ! वाग्मिनी खल्वसि । सर्वरहस्यस्थानं द्वितीयमिव यं वदन्त्या त्वया रहस्यालापेषु निःशङ्का कृता राजपुत्री ।

राजा—ततस्ततः ।

कलहंसः—अस्वस्थशरीरा दमयन्तीति प्रयोपं विधाय वैद्यव्याजेनाहमनया र्भेदुहितुरभ्यर्णं नीतः ।

राजा—(सप्रमोदम्) मकरिके ! चतुराऽसि विकटकपटनाटकघट- ु । (विमृश्य)

सर्वथा कैतवं निन्द्यं प्रवदन्तु विपश्चितः ।
केवलं न विना तेन दुःसाध्यं वस्तु सिध्यति ॥ ११ ॥

किम्पुरुषः—देव ! किमपरमुच्यते ?

कामं शाठ्यव्यपोहेन परलोकः प्ररोहतु ।
इहलोकप्रतिष्ठा तु शाठ्यपर्य्येव निश्चितम् ॥ १२ ॥

कलहंसः—देव !

निर्मायो यः कृपालुर्यः सत्यो यः सनयश्च यः ।
प्रायेण तत्र लोकस्य क्लीबबुद्धिर्विजृम्भते ॥ १३ ॥

राजा—(सत्वरम्) ततस्ततः ।

कलहंसः—समलङ्कृतासने मयि राजपुत्री सलीलमिदमभिहितवती-स ान् कलहंसोऽसि ? (रित ?)

राजा—अहो ! गिरां मधुरिमा । ततः ।

कलहंसः—मयोक्तम्-यथा जानाति देवी । ततो राजपुत्री 'समासतो विवक्षित- मावेदय' इति निगदितवती । अनन्तरमहमुक्तवान् ।

राजा—(सौत्सुक्यम्) किमुक्तवानसि ?

कलहंसः—इदमुक्तवानस्मि ।

अन्योऽपि सर्वरहस्यस्थानं द्वितीयमिव हृदयं निषधाधिपतेः प्रियवयस्यः कलहंसो नामास्ति ।

१ क.०पुर्त्वेव ।

शौण्डीरेषु भयोज्ज्वलेषु सुभगोत्तंसेषु च ग्रामणी-
दैवो नैषधभूपतिः श्रुतमिदं स्वर्भूर्भुवो भूरिशः।
एतच्च प्रथितं विदर्भतनया यद् विश्वविश्वस्फुर-
च्छौर्यादिप्रसरं वरं स्पृहयति ब्रूमः किमन्यत् ततः ?॥ १४॥

राजा—(स्वगतम्) आः ! किमतः परं राजतनयाऽभिधास्यतीति यत्सत्य-माकुलोऽस्मि। भवतु (प्रकाशम्) ततः किमुक्तवती ?

कलहंसः—राजतनया न किंचित्।

राजा—(सखेदमात्मगतम्) हा ! हताः स्मः।

कलहंसः—किन्तु कपिञ्जला नाम विदर्भराजचामरग्राहिणी समीपस्थितेद-मुक्तवती।

राजा—(ससम्भ्रमम्) किमाह स्म सा ?

कलहंसः—इदमाह स्म सा। अनुरूपं योगं कर्तुमीहते स भगवान् कलहंसः।

राजा—(सहर्षमात्मगतम्) इयत्प्रत्युज्जीविताः स्मः। जानाति तावदेत-त्परिकरलोको यथा दमयन्त्या निषधपतिरनुरूपो वरः। (प्रकाशम्) ततस्ततः।

कलहंसः—अनन्तरं च स्मितं कृत्वा राजतनया देवस्य प्रतिकृतिपटं मम करतलादादाय पुनः प्रतिकृतिं पुनः पुलककोरकितमात्मानं सुचिरमालोकितवती।

राजा—(ससम्भ्रमम्) लक्षितः कोऽप्यवलोकनस्याभ्युपायः कलहंसेन !

विदूषकः—(सरोषम्) (१) भो ! किं पुच्छेसि ? पुलकिदेणं अंगेणं ज्जेव णिवेदिदं।

कलहंसः—लक्षितः कपिञ्जलावचनात्।

राजा—(ससम्भ्रमम्) किं तत् कपिञ्जलावचः ?

कलहंसः—इदं वचो यथा देवि ! किमर्थमत्यर्थमायास्यते पुनः पुनरवलोकनेन दृष्टिः ? सर्वथाऽनुहरत्येवैषा प्रतिकृतिर्दैवीवपुः।

राजा—साधु कपिञ्जले ! भावज्ञानकुशले ! साधु, ततस्ततः।

कलहंसः—अथान्तरे च देवी प्रतिकृत्या सह निरूप्यते न पुनर्मूलरूपेणेति वदन्ती प्रकाशिता कापालिकानीता प्रतिकृतिं राजपुत्र्या दर्शितवती।

(१) भोः ! किं पृच्छसि ? पुलकितेनाङ्गेनैव निवेदितम्।

राजा—समीचीनमाह मकरिका ।

यथा मुख्यस्य सौन्दर्यं प्रतिबिम्बस्य नो तथा ।
सूर्याचन्द्रमसौ वारिसङ्क्रान्तौ क्लान्ततेजसौ ॥ १५ ॥

कलहंसः—ततो मकरिके ! मत्करलिखितेयं प्रतिकृतिः कुतस्त्वैतस्याः प्राप्तिरिति सरोषं राजपुत्री व्याहरत् ।

राजा—(सभयम्) कोऽयमुत्पातः ? ततस्ततः ।

कलहंसः—अनन्तरं च कपिञ्जले ! प्रतिकृतिमेतां ताताय दर्शय, चित्रपटमेतं च देवतागृहे निधेहीत्यभिधाय राजतनया मां विसृष्टवती ।

राजा—(सभयम्) कथं न किमपि प्रत्युत्तरम् ?

कलहंसः—किन्तु देवप्रतिकृतिपटस्य देवतागृहविमोचनेन दत्तमेव राजपुत्र्या प्रत्युत्तरम् ।

राजा—वाचिकं श्रोतुमिच्छामि ।

मकरिका—(१) इदं पच्छा मम कहिदं । जहा–

इह अत्थि घोरघोणो जहत्थनामा कवालिओ एगो ।
कूरत्तणस्स कवडित्तणस्स पढमं पइट्ठाणं ॥ १६ ॥
लंबत्थणी त्ति नामं भज्जा तस्सत्थि खुज्जतणुलेट्ठी ।
सपत्ताणं दोसाणं ठाणं दूई य मिहुणाणं ॥ १७ ॥

राजा—(कलहंसं प्रति) असंस्कृतवागियं मकरिका न स्फुटमर्थमावेदयति । तत्त्वमेव कथय ।

कलहंसः—घोरघोणेन च भीमरथाय सन्दिष्टम्, यथेयं दमयन्ती कलचुरिपतेर्भार्या भविष्यति ।

(१) इदं पश्चात् मम कथितम् । यथा—

इहास्ति घोरघोणो यथार्थनामा कापालिक एकः ।
क्रूरत्वस्य कापट्यस्य प्रथमं प्रतिष्ठानम् ॥
लम्बस्तनीति मम भार्या तस्यास्ति कुब्जतनुयष्टिः ।
सकलानां दोषाणां स्थानं दूती च मिथुनानाम् ॥

१ अ. न. ज°

राजा—(समयमात्मगतम्) मुषिताः स्मः (प्रकाशम्) स घोरघोणः किमतीन्द्रियमर्थं जानाति ?

कलहंसः—दाम्भिकोऽयं न किमपि जानातीति तत्रत्याः कथयन्ति । मया पुनर्गवेषयतापि न कोऽपि दम्भो लक्षितः।

राजा—अत्रार्थे तत्रत्याः प्रमाणं न भवान्। यतः—

आगन्तुकोऽनुरागं नेतुमविज्ञातदूषणः शक्यः।
विज्ञातदूषणः खलु जनस्तु वश्यो न सहवासी ॥ १८ ॥

किन्तु कथय सहवास्यपि राजा केन हेतुना तस्य दम्भं नावधारयति।

कलहंसः—राज्ञो व्यामोहो घोरघोणस्य च भाग्यमनवधारणे हेतुः।

राजा—उपपन्नमिदम्—

जन्मिनां पूर्वजन्माप्तभाग्यमन्त्राभिमन्त्रितः।
अचेतनोऽपि वश्यः स्यात् किं पुनर्यः सचेतनः ? ॥ १९ ॥

ततस्ततः।

कलहंसः— ततो राजापि कापालिकप्रत्ययेन स्वदुहितरं चित्रसेनाय दातुमिच्छति।

राजा—ततस्ततः।

कलहंसः—ततो दमयन्त्या मकरिकाऽभिहिता यथा यदि निषधाधिपतिर्लम्बस्तनीं कथमप्यनुकूलयति, तदा पुनरपि सा तातं कदाग्रहाद्विवर्तयति, मां च निषधाधिपतये दापयति।

राजा—(सत्वरम्) किं पुनर्लम्बस्तनी सहैव नानीता ?

कलहंसः—आनीताऽस्ति।

राजा—क्वासौ ?

कलहंसः—अस्ति मत्तमयूरोद्याने।

राजा—अये शेखर! लम्बस्तनीं शीघ्रमाकारय।

शेखरः—यदादिशति देवः (इत्यभिधाय निष्क्रान्तः)

(ततः प्रविशति कटितटं नर्तयन्ती लम्बस्तनी)

राजा—(विलोक्य) आकृत्या कृत्येव लक्ष्यते।

---

१ क कदाग्रहात्।

कलहंसः—(अपवार्य) न केवलमाकृत्या कर्मणाऽपीयं कृत्या । (पुनर्विदूषकं प्रति) तवापि योग्यमिदं मया विदर्भदेशादानीतम् ।

विदूषकः—(विलोक्य सभयकम्पम्) (१) भो रायं ! अहं एयाओ ठाणाओ उट्ठिस्सं ।

राजा—किमिति ?

विदूषकः—(२) जइ एसा थूलमहिसी कड्डियडं नचंती ममोवरि पडेदि, ता धुवं मं मारेदि ।

राजा—वयस्य ! अस्मास्वनुग्रहेण राजपुत्र्येयं प्रेषिता, तदेतामवज्ञातुं नार्हसि ।

विदूषकः—(३) भो ! न मए एदाए अवण्णा कीरदि, किन्तु अप्पणो रक्खा ।

राजा—(सरोषमिव) सर्वथा परिहासावसरं न वेत्सि ।

विदूषकः—(निःश्वस्य) (४) जदि मए मुहेण कावि फलसिद्धी भोदि, ता भोदु, इह ज्जेव चिट्ठिस्सं ।

राजा—लम्बस्तनि ! इदमासनमास्यताम् ।

विदूषकः—(५) भोदी लंबत्थणीए दुब्भलं खु एदं आसणं । ता तुमए भावहाणाए उवविसिदव्वं ।

(कलहंसः संज्ञया विदूषकं वारयति)

राजा—लम्बस्तनि ! कुतश्चलस्यसि ?

लम्बस्तनी—(मुखं नर्तयित्वा) (६) अत्तणो जोगस्स पैभावेण ।

विदूषकः—(७) भोदी ! किं अद्दुब्बला सि ?

लम्बस्तनी—(८) मागवग्गिसमेण ।

(१) भो राजन् ! अहमेतस्मात् स्थानादुत्थास्यामि ।
(२) यद्येषा स्थूलमहिषी कटितटं नर्तयन्ती ममोपरि पतेत्, तदा ध्रुवं मां मारयेत् ।
(३) भोः ! न मयैतस्या अवज्ञा क्रियते, किन्त्वात्मनो रक्षा ।
(४) यदि मया मुखेन कापि फलसिद्धिर्भवति, तदा भवतु, इहैव स्थास्यामि ।
(५) भवति ! लम्बस्तन्या दुर्बलं खल्वेतदासनम्, तत्त्वया भावहानया उपवेष्टव्यम् ।
(६) आत्मनो योगस्य प्रभावेण । (७) भवति ! किमतिदुर्बलासि ?
(८) मार्गाग्निश्रमेण ।

[illegible]

विदूषकः—(१) भो कलहंसा ! किणिएहिं गोणेहिं मुंडे (हिं) हिं [वा] एसा संपत्ता ?

(कलहंसो स्मित्वाधोमुखस्तिष्ठति)

राजा—(सभयमात्मगतम्) ध्रुवमयमेनां दुरात्मा कोपयिष्यति । भवतु (प्रकाशम्) लम्बस्तनि ! अकुटिलहृदयः प्रकृतिपरिहासशीलोऽयं ब्राह्मणः । तदस्य वचोभिर्न कोपितव्यम् ।

लम्बस्तनी—(कटितटं करतलेनाहत्य, मुखं वक्रीकृत्य) (२) णाहमीदिसाणं गद्दहमुहाणं उत्तरं देमि ।

राजा—(विहस्य) महाप्रभावा श्रूयते भवती । तदावेदय किमपि ।

लम्बस्तनी—(सगर्वम्) (३) भो महाराय ! अपुत्ताणं पुत्तं देमि, अणायारसंजादे[3] गब्भे पाडेमि, दुल्लहं पि पिअजणं संपादेमि । किं बहुणा ! जं तिहुयणे वि असज्झं तं साहेमि ।

राजा—(अपवार्य कलहंसं प्रति) अहो धृष्टता ! अहो निर्लज्जता ! विद्वन्, संवदति किमप्येतदुक्तम् ?

कलहंसः—न किमपि, गर्भपातं पुनर्जानाति ।

राजा—(सविचिकित्सम्) अल्पमुखेयं तर्हि ।

विदूषकः—(४) भोदी ! एवं दाव मे संसयं भंजेहि । मह बंभणीए भाआ पुल्लकुट्टिणी जा पाडलिपुत्ते वसदि, सा किं तुमं आदु अण्णा का वि ?

राजा—(सरोषम्) अयि मूर्खब्राह्मण ! नाद्यापि परिहासाद् विरमसि । (पुनर्लम्बस्तनीं प्रति) भविष्यति नः किमपि भवद्दर्शनफलम् ?

(१) भो कलहंस ! कियद्भिर्गोणैर्मुण्डैर् [वा] एषा सम्प्राप्ता ?

(२) नाहमीदृशानां गर्दभमुखानामुत्तरं ददामि ।

(३) भो महाराज ! अपुत्रेभ्यः पुत्रं ददामि । अनाचारसञ्जातान् गर्भान् पातयामि । दुर्लभमपि प्रियजनं सम्पादयामि । किं बहुना ! यत् त्रिभुवनेऽप्यसाध्यं तत् साधयामि ।

(४) भवति ! एवं तावन्मे संशयं भङ्ग्धि । मम ब्राह्मण्या भ्राता पुष्पकुट्टिनी या पाटलिपुत्रे वसति, सा किं त्वमथवान्या कापि ?

१ ब. मुंडेहिं मुंडेहिं । २ ब, द. मुद्दे ए० । ३ ब. ०ज्जा० । ४ ब. ०रहिंस ।

लम्बस्तनी—(१) अवस्सं भविस्सदि ।

राजा—(अपवार्य) तर्हि विदर्भजां सम्पादय ।

लम्बस्तनी—(२) इत्थ को वि किं संदेहो ? एसा संपादेमि ।

राजा—(सहर्षम्) कोऽत्र भो भाण्डागारिषु ?

(प्रविश्य)

पुरुषः—एषोऽस्मि ।

राजा—अये कोरक ! एतस्याः सर्वाङ्गीणं कनकाभरणं प्रयच्छ ।

कोरकः—आदेशः प्रमाणम् (इत्यभिधाय निष्क्रान्तः)

राजा—लम्बस्तनि ! त्वमपि स्वदेशे विजयस्व ।

लम्बस्तनी—(३) सत्थि महारायस्स । (इत्यभिधाय कतिशो नर्तयन्ती निष्क्रान्ता)

राजा—(स्मृतिमभिनीय) अमात्य ! लम्बोदरः कापालिकः कथं वर्तते ?

किम्पुरुषः—देव ! लम्बोदरो युवराजकूबरेण क्रीडापात्रं कर्तुं नीतोऽस्ति ।

राजा—एवम् (विमृश्य)

दृष्टभङ्गः कुमारस्य सोऽयं तेजःक्षयावहः ।
मार्तण्डमण्डलस्येव सैंहिकेयसमागमः ॥ २० ॥

कलहंसः—दुरात्मनः कापालिकस्य संसर्गाद् दुष्प्रकृतिरपि कापि कुमारस्य सम्भाव्यते ।

किम्पुरुषः—अनिरूपितोऽयं वितर्कः । यतः—

शुभा वा लोकस्य प्रकृतिरशुभा वा भवतु सा
परेषां संसर्गात्र खलु गुणदोषौ प्रभवतः ।
अपां पत्युर्मध्ये सततमपि वासेऽपि मृदुतां
न यान्ति ग्रावाणः स्पृशति न च पाथः कठिनताम् ॥ २१ ॥

(१) अवश्यं भविष्यति । (२) अत्र कोऽपि किं संदेहः ? एषा संपादयामि ।
(३) स्वस्ति महाराजस्य ।

१ क. [illegible]

अपि च देवस्य निषधस्यापि सन्ततिर्दुष्प्रकृतिर्भवतीति श्रद्धालैवोऽपि न प्रतिपद्यन्ते, किमङ्ग! हृदयालवः?

कलहंसः—(सरोषम्) प्रतिहततमोऽयं वितर्कः।

भजन्ते कार्याणि प्रकृतिविभवं कारणगतं
प्रवादो लोकानां ध्रुवमयमनेकान्तकलुषः।
मृदुत्वं ननु शिशिरजलदपयसां विश्वविदितं
स कश्चिन्मुक्तानामथ च किल काठिन्यनिकषः॥ २२॥

राजा—किमपरमुच्यते?

असौ पाखण्डिचाण्डालो युवराजस्य निश्चितम्।
वातापितापकारीव विन्ध्यस्योन्नतिघातकः॥ २३॥

(नेपथ्ये)

अखिलानां बिसिनीनां कमलमुखान्येकहेलया द्रष्टुम्।
गगनाचलगर्भमसावधिरोहति कमलिनीनाथः॥ २४॥

राजा—(स्वगतम्) कथमयं मागधो मध्यन्दिनवर्णनापदेशेन प्रियामुखदर्शनं पिशुनयति! भवतु (प्रकाशम्) कलहंस! दर्शय मार्गं, येन मध्याह्नस्नानाय व्रजामः।

(इति निष्क्रान्ताः सर्वे)

॥ द्वितीयोऽङ्कः ॥

तृतीयोऽङ्कः ।

(ततः प्रविश्य)

कुरङ्गकः—(उच्चैःस्वरमाकाशे) अये मुकुल ! बकुलप्रभृतीनि प्रगुणय सुरभि कुसुमानि । उपनय पाकाताम्राम्रप्रमुखानि फलानि । ननु पञ्चबाणायतनमिदान देवी दमयन्ती सगन्धर्वलोका समलङ्करिष्यति ।

(प्रविश्य)

मुकुलः—आर्य कुरङ्गक ! सर्वं प्रगुणमेव पूजोपकरणम्, किन्तु कथय किञ्चि मित्तोऽयमद्य सकलेऽपि राजकुले संरम्भः ?

कुरङ्गकः—(सरोषमिव) अये सरल मुकुल ! वैदेशिक इव लक्ष्यसे । एत दपि न जानासि, ननु देव्या दमयन्त्याः श्वः स्वयंवरविधिः ।

मुकुलः—श्वः स्वयंवरविधिः ?

कुरङ्गकः—अथ किम् ।

मुकुलः—(विचिन्त्य) ननु दमयन्तीं चेदिपतये चित्रसेनाय दातुमभिलाषुक विदर्भपतिरासीत् ।

कुरङ्गकः—आसीत् प्रतिकृतिदर्शनात् पूर्वम् ।

मुकुलः—(ससम्भ्रमम्) विततमावेदय ।

कुरङ्गकः—तां निषधादागतां दमयन्तीप्रतिकृतिमालोक्य कथमियं निषधायां गतेति गवेषयता देवेन ज्ञातं यथा–घोरघोणः कापालिको दमयन्तीपरिणयनोत्कण्ठितस्य चित्रसेनस्य मेषमुखनामा प्रणिधिः । सोऽपि लम्बोदरोऽस्यानुचरः कोष्ठकनामा चार एव ।

मुकुलः—(सत्वरम्) ततस्ततः ।

कुरङ्गकः—ततो धर्मकर्मविप्लवमवधार्य छिन्नकर्णोष्ठनासिकया लम्बस्तनिकया सह गर्दभमारोप्य देवेन घोरघोणो निर्विषयः कृतः ।

मुकुलः—(साश्चर्यम्) पश्य मलिनकर्माऽपि कियतीं प्रतिष्ठामधिरोपितो दैवे-

मुकुल मुकु० १ क०... । १ क० ...० ।

कुरङ्गकः—विस्मयनीयं नैवैतत्।

आस्तां सर्वं किमिह पातकिनो न यान्ति
यान्ति श्रियं समधिकां किमु धार्मिकेभ्यः।
तेनासमञ्जसमसौ रचयन् विशङ्कं
लोकाधिपं मनसि वाचि तनौ च हृष्येत्॥ १॥

मुकुलः—साम्प्रतं क्वासौ?

कुरङ्गकः—साम्प्रतमसौ निषधामधिवसतीति श्रूयते।

(नेपथ्ये)

भोः! कः साम्प्रतं निषधामधिवसति?

कुरङ्गकः—(प्रणम्य) देव! कापालिकघोरघोणः।

राजा—(आकर्ण्य) लम्बोदरोपजनितवासनेन युवराजहृदयेन समाहूतः। भवतु (प्रकाशम्) भो भोः सैन्याः! बहिः स्थातव्यं बहिः स्थातव्यम्। न खलु सहकारनिकराभिरामः सोढुमल्पमयमारामश्चक्रावमर्दम्।

कुरङ्गकः—(मुकुलं प्रति) एहि स्वस्थानं व्रजामः।

(इति प्रणम्य निष्क्रान्तौ)

राजा—अहो! वसन्तावतारस्यातिपङ्कजरङ्कस्यपरिभोगमखिलं जगत्।

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयो
मधुरविरुतोत्कण्ठाभाजः प्रियाः पिकपक्षिणाम्।
विरलविरलस्वेदोद्गारा वधूवदनेन्दवः
प्रसरति मधौ धात्र्यां जातो न कस्य गुणोदयः?॥ २॥

(दिशोऽवलोक्य)

अभिनवः प्रसरैर्नवमल्लिकाकुसुमपुञ्जरजोभिरयं मधुः।
यवनिकां विदधाति वियोगिनां शशिकरव्यतिपङ्कनिवृत्तये॥ ३॥

कलहंस! विदितवृत्तान्तः स भवान् विदर्भाणाम्। तद् विलोकय कियत्यतिरमणीयमत्र कुसुमाकरोद्यानेऽस्माकमावासस्थानम्।

कलहंसः—यदादिशति देवः।

विदूषकः—(१) ही ही ! पडिपुण्णा मे बंमणीए मणोरथा । सत्थि-वायणगं पि किं पि दाणं मे रायदुहिया पडिवादयस्सदि । अथवा न सत्थिवायणं करिस्सं, सा मं गद्दहमुहं भणदि । भोदी मयरिए ! णं पुच्छामि, सव्वकज्जे वि विदब्भपुत्ती मं गद्दहमुहं वाहरदि ?

मकरिका—(स्मित्वा) (२) न परं गद्दहमुहं, मक्कडकन्नं बंकपायं च ।

विदूषकः—(३) हला मुहरे ! सुमरेसि एदं भणिदं ?

राजा—(स्वगतम्)

आमन्त्रिता वयमतः प्रमदः परेऽपि
सन्त्यागताः क्षितिभुजोऽथ विषादतापः ।
अङ्गं विधानमिव सन्धिषु रूपकाणां
तुल्यं स्वयंवरविधिः सुख-दुःखहेतुः ॥ ४ ॥

कलहंसः—अयं तरुणतरणिकिरणकरणिधारिचारुप्रवालपटलपुलकितानेक-शाखाप्रतानविनिवारितातपप्रचारः सहकारस्तदास्यतामस्यालवालवारिशीकरासारो-पगूढप्ररूढहरितोपजातपरभागे मूलभागे देवेन ।

राजा—(तथा कृत्वा) कलहंस ! पश्य सहकारशाखासनीडे नीडे ।

प्रियतमावदनेन्दुविलोकितैरसुहितः कलकण्ठयुवा नवः ।
प्रतिमुहुः प्रतिगत्य नभस्तलाद् वलति याति वलत्यथ यात्यथ ॥ ५ ॥

अपि च—

उत्तंसकौतुकनवक्षतदक्षिणाशा-
शाखाग्रपल्लवलवा सहकारवीथी ।
सेयं समादिशति नः स्फुटमङ्गनानां
सद्यः सलीलगतमञ्चितयौवनानाम् ॥ ६ ॥

(१) अहो अहो ! प्रतिपूर्णा मे ब्राह्मण्या मनोरथाः । स्वस्तिवाचनकमपि किमपि दानं मे राजदुहिता प्रतिपादयिष्यति । अथवा न स्वस्तिवाचनं करिष्ये, सा मां गर्दभमुखं भणति । भवति मकरिके ! त्वां पृच्छामि—सर्वकार्येऽपि विदर्भपुत्री मां गर्दभमुखं व्याहरति ?

(२) न परं गर्दभमुखम्, मर्कटकर्णं वक्रपादं च ।

(३) अरे मुखरे ! स्मरसि एतद् भणितम् ?

१ क. एवं । २ ख, ग, ०परभागे दे०

कलहंसः—

विश्रमितनम्रभरपूरनिमग्नपार्ष्णि-
भागाङ्कितनिम्नपदपद्धतिबन्धुराङ्गी।
क्षीर्णा न केवलमसौ सहकारवीथी
याते दिशत्यवनिरप्यवनीशचन्द्र॥ ७॥

राजा—(कर्णं दत्त्वा स्वगतम्) कथमनक्षरगीतध्वनिः? (प्रकाशम्) कलहंस! शृणोषि किमपि?

विदूषकः—(१) चीरीयाणं महुरं रसिदं सुणेमि।

राजा—धिग् मूर्ख! नन्वेष—

उत्कर्णयन् वनविहारिकुरङ्गयूथा—
न्याश्लेषयन् विरहकान् कलिकाकलापैः।
सम्पूर्णपञ्चमकलासुभगम्भविष्णुः
कर्णौ विनिद्रयति मुद्रितगीतनादः॥ ८॥

कलहंसः—यथाऽऽदिशति देवः।

राजा—अहह! सहृदयहृदयापहारिहारितम(मा)वेषविषयेश्वरो गीतनादः। कलहंस!

अजल्प्य जल्पामः किमपि किल पाषाणसुहृदो
सदा नैषां भूयाज्जगति पुरुषाणामजननिः।
असारं संसारं विदधति न सारं मतिमुहुः
पिबन्तो ये सूक्तीरथ च कलगीतीर्मधुमुचः॥ ९॥

अपि च—

न गीतशास्त्रमर्मज्ञा न तत्त्वज्ञाश्च ये किल।
अपारपशुदेश्येभ्यस्तेभ्यः पुम्भ्यो नमो नमः॥ १०॥

कलहंसः—देव!

आस्तां मर्मपरिज्ञानं येषां गीतस्पृहाऽपि न।
कुरङ्गेभ्योऽपि हीनेषु मर्त्यत्वं तेषु वैरसम्॥ ११॥

(१) चीरिकाणां मधुरं रसितं शृणोमि।

मकरिका—(अपवार्य) (१) पडिहदो सि ।

राजा—सहकारतिरोहितास्तिष्ठामो येनेयं स्वैरं विहरति, वदति, विलोकयति च ।

(सर्वे तथा कुर्वन्ति । ततः प्रविशति यथानिर्दिष्टा दमयन्ती)

दमयन्ती—(२) सहि कविंजले ! कुसुमायरे निसिढावइणो आवासं जाणिय कामपूयाववएसेण अहं दाव इह समागदा । गवेसिदो य मए तरुनिरुवणामिसेण सयलो वि आरामो । परं न को वि कहिं पि दिट्ठो । ता किं नेदं, किं न किं पि मयरियामंतसरिसं भविस्सदि ?

कपिञ्जला—(३) भट्टिणि ! मा उत्तम, आराम परिमलणसंकाए न को वि मज्झे पइट्ठो । किं न पिक्खादि देवी आरामपरिसरेसु समावासिदं सिन्नं ? अवि य सहयारवीहियाए माणुसाइं पि दीसंति ।

राजा—कथमस्मान् कपिञ्जला दर्शयति ! अहह पञ्चबाणबाणः कटाक्षविक्षेपः !

भयतरलकुरङ्गीनेत्रसब्रह्मचारी
विकचकुवलयश्रीरेष दृष्टेर्विलासः ।
परिणतपरिबोधोद्बोधधाम्नां मुनीना-
मपि मनसि विकारोद्गारमाविष्करोति ॥ १६ ॥

कपिञ्जला—(४) भट्टिणि ! जाव को वि कुदो वि समागच्छदि, दाव मयणस्स पूयं निवत्तेहि । कोसलिए ! उवणेहि भट्टिणीपूओवगरणं ।

---

(१) प्रतिहतोऽसि ।

(२) सखि कपिञ्जले ! कुसुमाकरे निषधपतेरावासं ज्ञात्वा कामपूजाव्यपदेशेनाहं तावदिह समागता । गवेषितश्च मया तरुनिरूपणामिषेण सकलोऽप्यारामः, परं न कोऽपि क्वापि दृष्टः । तत् किं न्वेतत्, किं न किमपि मकरिकामन्त्रसदृशं भविष्यति ?

(३) भर्त्रि ! मा उत्ताम्य, आरामपरिमर्दनशङ्कया न कोऽपि मध्ये प्रविष्टः । किं न प्रेक्षते देवी आरामपरिसरेषु समावासितं सैन्यम् ? अपि च सहकारवीथिकायां मनुष्या अपि दृश्यन्ते ।

(४) भर्त्रि ! यावत् कोऽपि कुतोऽपि समागच्छति, तावत् मदनस्य पूजां निवर्तय । कौशलिके ! उपनय भर्त्रीपूजोपकरणम् ।

दमयन्ती—(१) अहं सयं उवचिणिय कुसुमाइं मयणं पूयइस्सं। ता चिट्ठदु कोसलिया, पयट्टावेद दाव संगीयं।

राजा—यथेयं पञ्चमस्य सुश्लिष्टमूर्छना तानेषु मतिमुहुः सुखायते, तथा जाने गीतमर्मज्ञा।

अविदितमर्मा कर्मसु न शर्म तज्जन्म चुम्बति प्रायः।
अकलितहृदयरहस्यां स्मरोपनिषदो बहिः प्लवते॥ १७॥

(सत्वरम्) मकरिके! प्रभवसि राजपुत्रीमिह समानेतुम्?

मकरिका—(२) अहं दाव पयदिस्सं, आगमणं पुण दिव्वस्स आयत्तं।

राजा—तर्हि यतस्व।

(मकरिका परिक्रामति)

दमयन्ती—(३) कविंजले! न को वि दाव समागदो, ता अंतेउरं वच्चामो।

कपिञ्जला—(४) भट्टिणि! दिट्ठिया दिट्ठिया समागदा मयरिया।

(मकरिका उपसृत्य प्रणमति)

दमयन्ती—(सहर्षमालिङ्ग्य) (५) मयरिए! अन्नो वि को वि समागदो, आदु तुमं ज्जेव?

मकरिका—(६) अन्नो वि।

दमयन्ती—(अपवार्य) (७) कधं राया नलो?

मकरिका—(८) अध इं।

दमयन्ती—(सत्वरम्) (९) कहिं सो?

मकरिका—(१०) एसो सहयारवीहियाए।

---

(१) अहं स्वयमुपचीय कुसुमानि मदनं पूजयिष्यामि। ततस्तिष्ठतु कौशलिका, प्रवर्तयत तावत् संगीतम्।

(२) अहं तावत् प्रयतिष्ये, आगमनं पुनर्दैवस्य आयत्तम्।

(३) कपिञ्जले! न कोऽपि तावत् समागतः, ततोऽन्तःपुरं व्रजामः।

(४) भर्त्रि! दिष्ट्या दिष्ट्या समागता मकरिका।

(५) मकरिके! अन्योऽपि कोऽपि समागतः, अथवा त्वमेव?

(६) अन्योऽपि। (७) कथं राजा नलः? (८) अथ किम्।

(९) क्व सः? (१०) एष सहकारवीथिकायाम्।

दमयन्ती—(पुनमुत्क्षिप्य) (१) मयरिए ! एसो नलो (पुनः सभयमात्मगतम्) मा नाम विलासिणीलोएण दिट्ठम्हि । भोदु एवं दाव (प्रकाशम्) मयरिए एदस्स वि नामं तुमं न जाणासि ? णं तिणविसेसो एसो नलो ।

कपिञ्जला—(विहस्य) (२) सच्चं एसो नलो, न उण तिणविसेसो किंतु तिणविसेसीकदअवरराजलोओ ।

दमयन्ती—(३) कविंजले ! तुमं वंकभणियाइं जाणासि ।

राजा—(उपसर्प्य) कलहंस !

सखीशङ्काशङ्कुभ्रमणपरितापव्यसनिनी
त्रिभागाभोगाग्रग्रवनवह्लीभूतशितिमा ।
द्रुमालोकव्याजाद् विपमपरिपाता मम वपुः
समं सेयं दृष्टिर्जडयति च संरम्भयति च ॥ १८ ॥

(विमृश्य)

कुचकलशयोरीदृं नृत्तं भ्रुवोर्मृदुता गिरां
दृशि तरलता वक्त्रे कान्तिस्तनौ तनिमा तथा ।
तदिदमखिलं वेपथेतस्यहं यदि वल्लभो
ध्रुवमपरथा दोषः स्वार्थं जनो बहु मन्यते ॥ १९ ॥

कलहंसः—परमार्थोऽयम्

मीमांसको गुण-दोषौ कुरुते स्वार्थाभिसङ्गसापेक्षः ।
ज्ञानघनस्तु यथास्थितपदार्थतत्त्वान्यनुरुध्य ॥ २० ॥

मकरिका—(४) भट्टिणि ! पसण्णा होहि ।

दमयन्ती—(५) मयरिए ! अहं कया वि किं अपसन्ना, जं एवं मंतेसि !

---

(१) मकरिके ! एष नलः ! मा नाम विलासिनीलोकेन दृष्टास्मि । भवतु एवं तावत् । मकरिके ! एतस्यापि नाम त्वं न जानासि ? ननु तृणविशेष एष नलः ।

(२) सत्यमेष नलः, न पुनस्तृणविशेषः, किन्तु तृणविशेषीकृतापरराजलोकः ।

(३) कपिञ्जले ! त्वं वक्रभणितानि जानासि ।

(४) भर्त्रि ! प्रसन्ना भव ।

(५) मकरिके ! अहं कदापि किमप्रसन्ना, येन एवं मन्त्रयसि ?

मकरिका—(१) कहं नाम न अप्पसमा, जं हिदयवल्लहं जणं पेच्छिय दूरं चिट्ठसि ?

दमयन्ती—(२) मयरिए ! नाहमिदिसं कल्लाणजणस्स अणुचिदं अणुट्ठिदुं साहसिणी । किं च—

आलाव-हास-परिरंभणाइं पेम्मस्स परियरो एसो ।
पेमं उण नयणविभागभूरिपरियोन्तिरा दिट्ठी ॥ २१ ॥

अयं च अमरिससरिसेहिं जणं गयमणुसरंती कविंजलाए वि लज्जेमि ।

मकरिका—(सकोपम्) (३) सहयारवीहियं वि अणुसरंती सरिसासिणेहा, महाराओ उण विदब्भेसु वि समागदो असरिससिणेहो ?

दमयन्ती—(४) मयरिए ! न पारेमि मए सह जंपिदुं, ता मयणपूयानिमित्तं कुसुमाइं उवचिणिस्सं ।

(इति सर्वाः परिक्रामन्ति)

राजा—कथमितोऽभिवर्तते देवी ?

दृष्टे ! प्रमुदितः स्फुरां कुरु पुरः पुर्णी विदर्भेशितु
र्नेत्रानन्दयति बिभ्रती स्मरकरिक्रीडावनं यौवनम् ।
यद्वक्त्रेन्दुविलाससम्पदमतिश्रद्धालुरालोकितुं
पर्यालोमपिपतिरुद्धहृदयनिमिषं चक्षुःसहस्रं विभ्र ॥ २२ ॥

कलहंस ! उपनय पद्मवेत्रम् ।

कलहंसः—इदम् ।

(१) कथं नाम नात्मसमा, यद् हृदयवल्लभं जनं दृष्ट्वा दूरं तिष्ठसि ?

(२) मकरिके ! नाहमीदृशं कल्याणजनस्यानुचितमनुष्ठातुं साहसिनी । किंच—

आलाप-हास-परिरम्भणानि प्रेम्णः परिकर एषः ।
प्रेम पुनर्नयनविभागभूरिपरिघूर्णमाना दृष्टिः ॥

अन्यच, अमर्षसदृशं जनं गजमनुसरन्ती कपिञ्जलाया अपि लज्जे ।

(३) सहकारवीथिकामप्यनुसरन्ती सदृशस्नेहा, महाराजः पुनर्विदर्भेष्वपि समागतो ऽसदृशस्नेहः !

(४) मकरिके ! न पारयामि त्वया सह जल्पितुम् । ततो मदनपूजानिमित्तं कुसुमान्युपचेष्ये ।

(राजा किमपि पत्रके लिखित्वा समर्पयति)

दमयन्ती—(१) कपिंजले ! कहिं वणोद्देसे वियइल्लवल्लियाओ चिट्ठंति ?

मकरिका—(२) एदस्सिं सहयारनिगुंजे ।

(दमयन्ती पुष्पावचयं नाटयति)

राजा—(उपसृत्य) अलमलमनुचिताचरणेन । ननु ललाटन्तपे भगवति कमलिनीनाथे परमानुरागवेतनक्रीते च सविधभाजि सर्वकर्मीणे जने कोऽयं स्वयं विचकिलकलिकावचयक्लेशोपद्रवः ?

दमयन्ती—(निर्वर्ण्य विलोक्य सानन्दम्) (३) कहमेस सयं भयवं पंचबाणो ? अहवा असरीरस्स अणंगस्स कुदो ईदिसो अंगसोहग्गपब्भारो ? ता कदत्थो दमयंतीए अंगभंगिमा । (प्रकाशम्) कविंजले ! को एस मं वारेइ ?

कपिञ्जला—(४) जस्स कदे तुमं इध समागदा ।

दमयन्ती—(५) कस्स कदे अहं इध समागदा ?

कपिञ्जला—(६) हिययदइयस्स ।

दमयन्ती—(७) ता किं भयवं मणसिजो ?

कपिञ्जला—(विहस्य) (८) भट्टिणी जाणादि ।

दमयन्ती—(सकोपमिव) (९) हंजे ! उवहसेसि मं, ता उवविसिस्सं, न चिट्ठिस्सं ।

(राजा मुक्ताकलापमालम्ब्य 'अलमलम्' इत्यादि पठति)

कलहंसः—देवि ! दूरादागतस्य प्रणयिनो जनस्याभ्यर्थनां नावमन्तुमर्हसि ।

दमयन्ती—(१०) कधं कलहंसो ! कलहंस ! मोचावेहि मे पाणिं ।

---

(१) कपिञ्जले ! कस्मिन् वनोद्देशे विचकिलवल्लिकास्तिष्ठन्ति ।

(२) एतस्मिन् सहकारनिकुञ्जे ।

(३) कथमेष स्वयं भगवान् पञ्चबाणः ! अथवा अशरीरस्यानङ्गस्य कुत ईदृशोऽङ्गसौभाग्यप्राग्भारः ! तत् कृतार्था दमयन्त्या अङ्गभङ्गिमा । कपिञ्जले ! क एष मां वारयति ।

(४) यस्य कृते त्वमत्र समागता । (५) कस्य कृतेऽहमत्र समागता ?

(६) हृदयदयितस्य । (७) तत् किं भगवान् मनसिजः ? (८) भर्त्री जानाति ।

(९) हञ्जे ! उपहससि माम्, तदुपवेक्ष्यामि न स्थास्यामि ।

(१०) कथं कलहंसः ! कलहंस ! मोचय मे पाणिम् ।

कलहंसः—देवि ! कलहंसः पाणेर्ग्राहयिता, न पुनर्मोचयिता ।

दमयन्ती—(१) हीमाणहे ! न को वि मह पक्खवायं करेदि ।

राजा—शान्तं शान्तम् । हे मृगाक्षि ! नन्वयमस्मि तव पक्षपाती । समादिश कृत्यम् ।

दमयन्ती—(२) जइ एवं ता मुंच मे पाणिम् ।

नलः—कथमपराधकारी मुच्यते ?

दमयन्ती—(३) किं एदिणा अवरद्धं ?

राजा—अनेन त्वत्प्रतिकृतिमालिख्यायमियति विरहानले पातितः ।

दमयन्ती—(स्मित्वा) (४) जइ एवं ता अहं पि ते पाणिं गहिस्सं । तव पाणिलिहिदेण पडेण अहं पि एदावत्थसरीरा जादा ।

राजा—नन्वयं पाणिग्रहणार्थ एव सर्वः प्रयासस्तदनुकूलवादित्वमपि नलस्य ।

विदूषकः—(५) भोदि ! तए अप्पण ज्जेव अप्पा समप्पिदो, ता दाणिं न गहीयदि ।

(दमयन्ती सात्त्विकभावान् नाटयन्त्यधोमुखी भवति)

राजा—(विलोक्य)

इमौ मुग्धे कर्णौ वदनमिदमिन्दुः स्फुटकलः ।
कलः सोऽयं नादस्तरुणकलकण्ठीकलकलः ।
इयं माद्वीवल्लीपुलककुसुमाङ्का भुजलता
वसन्तश्रीः साक्षात् त्वमसि मदिराक्षि ! ध्रुवमतः ॥ २२ ॥

(सहर्षं च—)

चन्द्रोद्यानसरांसि सुन्दरि ! मनः कर्षन्ति तावद् गुणै-
र्यावन्नैव दले त्वदास्यकमले दृष्टिर्न विश्राम्यति ।

---

(१) अहो ! न कोऽपि मम पक्षपातं करोति ।

(२) यद्येवं तदा मुञ्च मे पाणिम् । (३) किमेतेनापराद्धम् ?

(४) यद्येवं तदाहमपि ते पाणिं ग्रहीष्यामि. तव पाणिलिखितेन पटेनाहमप्येतदवस्थशरीरा जाता ।

(५) भवति ! त्वयाऽऽत्मनैवात्मा समर्पितस्तदिदानीं न गृह्यते ।

तावत् कोऽपि कलालवो विजयते खद्योतपोतार्चिषां
यावन्नात्मकरैर्धिनोति धरणिं देवः सुधादीधितिः ॥ २४ ॥

दमयन्ती—(१) अज्जउत्त ! (पुनः सलज्जम्) महाराय ! अथवा इदि देआंगे पतंगतावो, ता विरम पाणिग्गहणादो ।

राजा—अयि कातरकुरङ्गनेत्रे ! कोऽयं वाङ्—मनसयोर्विवादः । ननु यथामनसमेवाभिधीयतामार्यपुत्रेति । अपि च शतपत्रपत्रतुल्याक्षि ! यदि पतङ्गतापाबाधासाध्वसेन पाणिग्रहणाद् विरमामि, तदानीमनङ्गतापो मां बाधते । किञ्च—

चित्रं त्रस्तैणशावाक्षि ! त्वत्पाणिग्रहणोत्सवः ।
सन्तापस्य निहन्ता नः प्रतापस्य तु कारणम् ॥ २५ ॥

कपिञ्जला—(२) भट्टिणि ! लज्जमुज्झिय पयडाणुरायं किंपि अणुचिट्ठ ।

दमयन्ती—(सरोषमिव) (३) हंजे ! तुमं पि कन्नगाजणविरुद्धे कम्मे मं निजोजयसि ?

राजा—अयि चन्द्रमुखि ! न त्वां कपिञ्जला योजयति । किन्तु कृतमानिनीमानभङ्गः स भगवाननङ्गः । अनङ्गाधीनो हि कुसुमाकरोद्याने सर्वस्य सर्वो व्यापारः । (सर्वाङ्गीणमवलोक्य) कुन्ददति ! किञ्चिदुपालभ्यसे ।

दमयन्ती—(स्वगतम्) (४) हीमाणहे ! अप्पाणंमि वि आदिधेईकदे उवालंभो न मुंचादि ।

कपिञ्जला—(सभयमात्मगतम्) (५) किं मए किमवि अवरद्धं ?

राजा—ननु ब्रवीमि, उपालभ्यसेऽभ्यन्तरपरिजनापराधेन ।

दमयन्ती—(६) कहं विय ।

राजा—

वक्त्रेन्दुः स्मितमातनोदधिगते दृष्टी विकासश्रियं
बाहू कण्टककोरकाण्यविभृतं भाषा गिरो गौरवम् ।

---

(१) आर्यपुत्र ! महाराज ! अथवा एति देवाङ्गे पतङ्गताप, तद् विरम पाणिग्रहणात् ।
(२) भर्त्रि ! लज्जामुज्झित्वा प्रकटानुरागं किमपि अनुतिष्ठ ।
(३) हले ! त्वमपि कन्यकाजनविरुद्धे कर्मणि मा नियोजयसि ?
(४) अहो ! आत्मन्यपि आतिथेयीकृते उपालम्भो न मुच्यते ।
(५) किं मया किमप्यपराद्धम् ? (६) कथमिव ?

किं लाञ्छनानि भवाभिधेयमस्मत् स्वस्थावनेयोचितं ।
स्वस्मात्मनि मयि नैतदुन्नति कुण्ठन्तं पुनः स्वस्थताम् ॥ २६ ॥

(दमयन्ती सलज्जमधोमुखी भवति)

यदि वा देवि ! शान्तम् । मन्मथमर्मभेदसामर्थ्यो यो गुणमपि दोषमभिदधाति ।

कपिञ्जला—(१) भट्टिणि ! वदं कालविलम्बेण, रहस्सं किं पि मंतेहि ।

दमयन्ती—(२) णाहं रहस्सं मंतिदुं सिक्खिदा ।

राजा—अयि स्मरनागरिके ! किमात्मानं वैदग्ध्यवन्ध्यमावेदयसि ? अपि चात्मनि शिक्षितः । कलहंस ! दर्शय रहस्यमस्मदीयम् ।

(कलहंस पत्रमर्पयति । दमयन्ती वाचयति)

अमीभिः सांसिद्धिकस्मर किमु कर्म चारित्र्यपटे ।
यदेतेऽप्यसन्ते सलिलमरतेभ्योऽपि भवतः ।
अयं युक्तो व्यक्तं ननु गुणयितुं चातकशिशु-
र्य एष प्राप्तेऽपि स्पृहयति न पाथस्तटपरान् ॥ २७ ॥

दमयन्ती—(*विहस्य स्वगतम्*) स्वदेशगरणोऽभिमुखं भवति । (*प्रकाशम्*)
(३) कलहंस ! मुद्धा क्खु अहं, न गूढभणिदीणमत्थं जाणामि ।

राजा—किमेवमभिदधासि ? यतः—

मुग्धाङ्गनानयनपातविलक्षणानि
दर्शेरपि क्षणमलक्षितविभ्रमाणि ।
आलोकितान्यपि मताङ्गि ! निवेदयन्ति
वैदग्ध्यमप्यदमनस्पशमो भवत्याः ॥ २८ ॥

यदि वा व्यक्तमपि विज्ञप्यते ।

---

(१) भर्त्रि ! कृतं कालविलम्बेन, रहस्यं किमपि मन्त्रय ।
(२) नाहं रहस्यं मन्त्रयितुं शिक्षिता ।
(३) कलहंस ! मुग्धा खल्वहम्, न गूढभणितीनामर्थं जानामि ।

दमयन्ती—(पत्रके किमपि लिखित्वा) (१) एदं दे सत्थिवायणं (विदूषकस्य प्रयच्छति । राजानं प्रति) महाराय ! सुदे (सुवे ?) पुणो वि संगमो ।

राजा—

फर्णेजपं सतमुदो विपदो वचस्त्वं
श्वःसङ्गमः पुनरतिमलयस्य शङ्का ।
त्वद्विप्रयोगशरणं क्षणमप्यहं तु
वर्षाणि देवि ! किल यामि परःशतानि ॥ ३० ॥

दमयन्ती—(२) अओ परं न पारेमि चिट्ठिदुं, ता गमिस्सं (निष्क्रान्ता)

(राजा पत्रकं वाचयति)

सौदामिनीपरिष्वङ्गं मुञ्चन्त्यपि पयोमुचः ।
न तु सौदामिनी तेषामभिष्वङ्गं विमुञ्चति ॥ ३१ ॥

कलहंसः—देव ! अनयाऽप्यात्मनोऽनन्यशरणत्वमावेदितम् ।

राजा—नन्वयमुत्तरार्धस्यार्थः ।

कलहंसः—पूर्वार्धस्यार्थोऽनिष्टं सूचयति ।

राजा—(सभयम्) किं तत् ?

कलहंसः—परिणयनानन्तरं दमयन्तीपरित्यागम् ।

राजा—शान्तम् । ननु नलो यदि दमयन्तीं परित्यजति, तदा निषधामभिजनं च । तदेहि शिविरं व्रजामः ।

(इति निष्क्रान्ताः सर्वे)

॥ तृतीयोऽङ्कः ॥

---

(१) एतत् ते स्वस्तिवाचनम् । महाराज ! श्वः पुनरपि सङ्गमः ।

(२) अतः परं न पारयामि स्थातुम्, ततो गमिष्यामि ।

चतुर्थोऽङ्कः।

(नेपथ्ये)

(१) ऊसलेध भो अगदहो ऊसलेध।

(ततः प्रविशति राजा भीमरथोऽमात्यवसुदत्तादिकश्च परिवारः)

राजा—अमात्य ! दर्शय मार्गं येन स्वयंवरशोभामालोकयामः।

वसुदत्तः—इत इतो देवः परिक्रामतु।

राजा—अमात्य ! वत्साप्रतिकृतिदर्शनेनापि वयं स्वयंवरं विधातुमीषन्मनसः समभवाम। घोरघोणवचनविरोधिलम्बस्तनीवचनेन पुनः सविशेषमुत्साहिताः।

वसुदत्तः—देव ! लम्बस्तनी किमुक्तवती ?

राजा—निषधाधिपतिपत्नी दमयन्ती भविष्यतीत्युक्तवती।

वसुदत्तः—चित्रसेनपत्नीप्रतिपादकेन घोरघोणवचनेन सह सर्वथा विरुध्यते लम्बस्तनीवचः।

राजा—ततोऽस्माभिस्तदेतं वरविप्लवमाशङ्कमानैः स्वयंवरविधिरनुष्ठितः।

वसुदत्तः— देव ! खराधिरोहणक्रुद्धेन दुरात्मना घोरघोणेन किमप्यश्रद्धेयमश्रोतव्यं च प्रतिज्ञातम्।

राजा—(सभयम्) किं तत् ?

वसुदत्तः—यो दमयन्तीं परिणेष्यति, तस्य राज्यभ्रंशम् (इत्यर्धोक्ते तूष्णीमास्ते)

राजा—शान्तं शान्तं प्रतिहतममङ्गलम्, ननु दमयन्तीपतिस्त्रिखण्डभरतपतिरिति मुनयः समादिशन्ति। ततः कथं स तापसापसदो राज्यभ्रंशं करिष्यति ?

वसुदत्तः—यदेव ज्ञानचक्षुषः समादिशन्ति तदेवास्तु। (विलोक्य) अयं स्वयंवरमण्डपः, इदं सिंहासनमास्यतां देवेन।

राजा—(तथा कृत्वा विलोक्य च) अमात्य ! समायाताः काशीपतिप्रभृतयः क्षोणिपतयः, परमद्यापि निषधाधिपतिर्नायाति। कोऽत्र भोः ?

(१) अपसरत भोः ! अग्रतोऽपसरत।

(प्रविश्य)

पुरुषः—आदिशतु देवः।

राजा—अये मङ्गलक! कुसुमाकरोद्यानाभिषधाधिपतिमाकार्य शचीपतिदिशि विनिवेशिते कार्तस्वरसिंहासने समुपवेशय।

(' आदेशः प्रमाणम् ' इति ब्रुवाणो मङ्गलको निष्क्रान्तः। ततः प्रविशति मङ्गलकेनादिश्यमानमरणिर्नलः कलहंस—खरमुख—मकरिकाऽऽदिकश्च परिवारः)

मङ्गलकः—इत इतो निषधाधिपतिः। इदं सिंहासनमास्यताम्।

नलः—(समुपविश्य स्वगतम्)

आकुञ्चितैर्विकसितैश्चकितैः सहर्षै-
रुत्कण्ठितैः कुटिलितैर्ललितैर्विनीतैः।
आलोकितैर्मृगदृशो वदनप्रवृत्ति-
ष्वृत्तैर्जितोऽस्मि मुषितोऽस्मि हतोऽस्मि तुल्यम्॥ १॥

(प्रकाशम्) कलहंस!

कृतमिषशतं यद् गच्छन्त्या मुहुर्मुहुरीक्षितं
यदपि च सखीशङ्काभीत्या गता न विरागतः।
तदिदमनिशं स्मारं स्मारं कुशीलववन्मनो
हसति रमते रोदित्युच्चैर्विषीदति सीदति॥ २॥

(विमृश्य) कीदृशमस्य स्वयंवरस्य निर्वहणं सम्भावयसि?

कलहंसः—पत्रकश्लोकविमर्शनेन नाटकस्येव प्रमदाद्भुतरसशरणं सम्भावयामि निर्वहणम्।

नलः—वयस्य खरमुख! खरनादितेन राजपुत्रीं मतिनिवर्तयता त्वया वयमधमर्णीकृताः। जाने भगवता विरञ्चेन भवानेतदर्थमेव गर्दभवदनः कृतः।

विदूषकः—(सरोषम्) (१) अदो जेव तए कदखुडामणिना खरमुहस्स पडिकदं कदं।

नलः—वयस्य! राजपुत्रीललितमीमांसादुर्ललितचेतोभिरस्माभिर्न किमपि रजनावनुस्मृतम्, तदिदानीं गृहाणेदं ग्रैवेयकम्।

(१) अत एव त्वया कृतचूडामणिना खरमुखस्य प्रतिकृतं कृतम्।

विदूषकः—(१) कुविदो म्हि, न गिन्हिस्सं।

नलः—मकरिके! वयस्यमनुकूलयास्मासु।

मकरिका—(२) अरे गद्दहमुहं! किं भट्टिणमवजाणासि?

विदूषकः—(३) आ दासीए धीए! मं बंभणमहिक्खिवसि?

नलः—वयस्य! साम्प्रतमनवसरः क्रोधस्य।

विदूषकः—(४) जइ अणवसरो कोहस्स, ता गिन्हिस्सं पसादं।

नलः—रसभङ्गः कृतस्त्वया, ततो न वयं ग्रैवेयकं प्रतिपादयिष्यामः।

मकरिका—(विहस्य) (५) ईदिसस्स ज्जेव संमाणस्स जुग्गो सि।

विदूषकः—(६) भो! पडिवादेहि आभरणं, न पुणो रुसिस्सं।

(नलो ग्रैवेयकं समर्पयति)

मङ्गलकः—(अग्रतः परिक्रम्य) देव विदर्भाधिपते! समायातो निषधाधिपतिः।

राजा—अवशिष्यते कोऽपि नरपतिः?

मङ्गलकः—न कोऽपि।

राजा—कोऽत्र भोः?

(प्रविश्य)

कञ्चुकी—एषोऽस्मि।

राजा—माधवसेन! वत्सां दमयन्तीं स्वयंवरमण्डपे समानय।

('आदेशः प्रमाणम्' इत्यभिधाय माधवसेनो निष्क्रान्तः। ततः प्रविशति कञ्चुकिना निर्दिश्यमानमार्गा दमयन्ती, गृहीतवरमाला कपिञ्जला च)

कपिञ्जला—(७) तदो पुच्छिदा अहं रयणिवुत्तंतं मयरियाए, कहिदो य मए।

---

(१) कुपितोऽस्मि, न ग्रहीष्यामि।

(२) अरे! गर्दभमुख! किं भर्तारमवजानासि?

(३) आः! दास्याः पुत्रि! मां ब्राह्मणमधिक्षिपसि?

(४) यद्यनवसरः क्रोधस्य, तद् ग्रहीष्ये प्रसादम्।

(५) ईदृशस्यैव सम्मानस्य योग्योऽसि।

(६) भोः! प्रतिपादय आभरणम्, न पुना रुषिष्यामि।

(७) ततः पृष्टाऽहं रजनीवृत्तान्तं मकरिकया, कथितश्च मया।

दमयन्ती—(सखेदमिव) (१) कीस तए अहं लहुईकदा ?

माधवसेनः—इत इतो देवी। देवि! अयमेष देवो विदर्भाधिपतिः। एते च वरयितारः क्षमाभर्तारः।

कपिञ्जला—(अपवार्य नलं दर्शयन्ती) (२) एसो उण कुसुमावचय-पच्चूहकारी दुव्विसहआधि-वाधिनाडयपत्थावणासुत्तहारो सजणो।

दमयन्ती—(समन्ततोऽवलोक्य, नलं च सविशेषं निर्वर्ण्य स्वगतम्) (३) कधं अहल्लेव गोदमस्स सावेण एदस्स दंसणेण जडीकदा मे ऊरुजुयली! हा! कधं सयंवरमंडवे परिक्कमिस्सं ?

कपिञ्जला—(स्वगतम्) (४) अम्मो! कधं भट्टिणीए नलं पिच्छिऊण ऊरुत्थंभो जादो? भोदु एवं दाव (प्रकाशम्) भट्टिणि! रयणिसंभूददाहजरेण नीसहाइं दे अंगाइं, ता मं अवलंबिय परिक्कमसु।

नलः—(विलोक्य) मकरिके! केयं कपिञ्जलादत्तहस्तावलम्बा परिक्रामति?

मकरिका—(५) णं एसा दमयंती।

नलः—अहो! कौतूहलं राजपथेऽपि भ्रमः। नन्वियं विष्टपदृष्टिचकोरी-चन्द्रिका देवी दमयन्ती। मकरिके!

> अधिकमधिवहन्ती गण्डयोः पाण्डिमानं
> तलिननलिननालान्यङ्गकैस्तर्जयन्ती।
> अलसचरणपातैर्वीक्षितैश्चातिकान्तैः
> कथय कथमियं नः साम्प्रतं भाग्यपूर्वा? ॥ २ ॥

---

(१) कथं त्वयाऽहं लघुकीकृता?

(२) एष पुनः कुसुमावचयप्रत्यूहकारी दुर्विषहाधि-व्याधिनाटकप्रस्तावनासूत्रधारः स्वजनः।

(३) कथमहल्येव गौतमस्य शापेनैतस्य दर्शनेन जडीकृता मे ऊरुयुगली! हा! कथं स्वयंवरमण्डपे परिक्रमिष्यामि?

(४) अहो! कथं भर्त्र्या नलं दृष्ट्वा ऊरुस्तम्भो जातः? भवतु, एवं तावत्। भर्त्रि! रजनीसम्भूतदाहज्वरेण निःसहानि ते अङ्गानि, ततो मामवलम्ब्य परिक्रमस्व।

(५) नन्वेषा दमयन्ती।

मकरिका—(विहस्य) (१) भट्टा ज्जेव संतावमुप्पाययंतो अपुरत्तणे कारणं।

नलः—(सहर्षम्) अयि ! रजनिवृत्तान्तमवधार्य वदसि ?

मकरिका—(२) अध इं।

नलः—किमजनि रजनौ देव्याः ?

मकरिका—(३) जं रहंगघरिणीए।

नलः—कथिन्निषधाधिपतिर्भगवता विरञ्चेन सुभगश्रेणिं लम्भितः। (दमयन्तीं विलोक्य) मकरिके !

सान्निध्यात् पितुरानतं नृपजनव्यालोकलीलोन्नतं
मद्वक्त्रेक्षणलालसात् मतिमुहुः कोणाङ्कलीचञ्चलम्।
आरामस्मरणोद्गताद्भुतरसं वेषांचितीदर्शन-
व्यग्रं नव्यसभाप्रवेशचकितं चक्षुः कुरङ्गीदृशः॥ ४॥

राजा—अये माधवसेन ! प्रत्येकमवनीभुजां नय-विनय-क्रम-विक्रमानुत्कीर्तय पुरो वत्सायाः।

माधवसेनः—(पुरो भूत्वा दमयन्तीं प्रति)

स्मेराक्षि ! क्षितिचक्रविश्रुतबलः काशीक्षितीशो बलः
सोऽयं स्कन्धतटेऽस्य मुञ्च विकचन्मल्लीप्रसूनस्रजम्।
उच्छालत्पृथुवालुकीकरभरव्यामग्नरङ्गत्तटे
गाङ्गे रोधसि सस्पृहा ग्लपयितुं चेद् ग्रीष्ममध्यन्दिनम्॥ ५॥

दमयन्ती—(४) अज्ज ! पत्थंचणवमणिणो कासिवासिणो सुणंति।

माधवसेनः—न मेऽस्मिन् मनोरतिरिति व्यक्तमुच्यताम्।

(परिक्रम्य)

अयमवनिपतीन्दुर्भूपतिः कुङ्कुणानां
कलय वलयधाम्ना पाणिना पाणिमस्य।

(१) भर्तैव सन्तापमुत्पादयन् अपूर्वत्वे कारणम्।

(२) अथ किम्।

(३) यद् रथाङ्गगृहिण्याः।

(४) आर्य ! पवनचनवमणिन काशीवासिन शृणुमः।

अधिजलधिगतानां गोत्रशत्रुर्भृगाणां
क्षपयति नहि पक्षान् क्ष्माभृतां शङ्कितोऽस्मात् ॥ ६ ॥

दमयन्ती—(१) अणिमित्तरोसिरो एस, ता न पारेमि पए पए अणुकूलिदुं।

माधवसेनः—कुन्ददति! वयसैव लघीयसी, संसारोपनिषद्दुष्येण गरीयसी खल्वसि।

अकाण्डकोपिनो भर्तुरन्यासक्तेश्च योषितः।
प्रसत्तिश्चेतरः कर्तुं ब्रह्मणापि न शक्यते ॥ ७ ॥

(सर्वेऽप्यन्तः परिक्रामन्ति)

काश्मीरेश्वर एष शेषवनितासङ्गीतकीर्तिर्द्विषत्-
कान्तावक्त्रविचित्रपत्रमकरीहर्म्यैकधूमध्वजः।
एतं कुन्ददति! त्वमावह वरं यद्यस्ति कौतूहलं
केदारेषु विकासिकुङ्कुमरजःपिङ्गेषु सङ्गीदितुम् ॥ ८ ॥

दमयन्ती—(२) अज्ज माधवसेण! तुसारसंभारपणयभीरुयं मे सरीरयं न किं तुमं जाणासि?

माधवसेनः—तर्हि पुरो व्रजामि। (परिक्रम्य) कलहंसगमने!

कौशाम्बीपतिरयमुन्नतांसपीठः
शौण्डीर्यावसथममुं वरं वृणीष्व।
यत्तेजोऽनलमसहिष्णुरुत्पतिष्णुः
क्ष्मापालो घनमभिभूतवान् न वत्सः? ॥ ९ ॥

दमयन्ती—(३) कपिंजले! अदिरमणीया तुमए वरमाला विणिम्मिदा।

माधवसेनः—अप्रतिवचनमेवास्य भूपतेः प्रत्यासः।

नलः—(कुसुमचापमन्तरमभिनीय स्वगतम्)

---

(१) अनिमित्तरोषण एष, तत् पारयामि पदे पदेऽनुकूलयितुम्।

(२) आर्य माधवसेन! तुषारसम्भारप्रणयभीरुकं मे शरीरं न किं त्वं जानासि?

(३) कपिञ्जले! अतिरमणीया त्वया वरमाला विनिर्मिता।

यस्यां मृगीदृशि दृशोरमृतच्छटायां
देवः स्मरोऽपि नियतं विततामिलाषः ।
एतत्समागममहोत्सवबद्धतृष्ण–
माहन्ति मामपरथा विशिखैः कथं सः ? ॥ १० ॥

माधवसेनः—(परिक्रम्य)

स एष सुभगाग्रणीः पतिरवन्तिभूमेः कला–
कलापकुलकेतनं यदरिवामनेत्राजनैः ।
वसद्भिरधिपर्वतं किमपि पर्वतीयाधिप–
श्रियो नृपतिनायिकाललितनाटकं शिक्षिताः ॥ ११ ॥

तदम्भोजसहस्रपत्रपत्त्रलाक्षि ! पवित्रय निजेन पाणिना पाणिमस्य यदि सिप्रा-स्रोतसि स्नानाय स्पृहयसि ।

दमयन्ती—(१) माधवसेण ! विवाहमंगलसंगणिद्भूरितूररवपडिरव-पणिद्दजागरणभिम्लाइं मे अंगाइं, न तरामि पुणो पुणो मंतिदुं ।

माधवसेनः—(सभयमात्मगतम्) कथमवन्तीपतिनिर्द्वेषेण सरोषमाभाषते । भवतु, नृपान्तरमुत्कीर्तयामि । (प्रकाशम्) कलकण्ठीकण्ठि ! न्यायैकधनमेतमनुमन्यस्व पतिं कलिङ्गाधिपतिम् । पश्य पश्य—

यथा यथा प्रतापाग्निर्ज्वलत्यस्य महीभृतः ।
नित्यं वर्णाश्रमारामाः स्निग्धच्छायास्तथा तथा ॥ १२ ॥

दमयन्ती—(विहस्य) (२) तादसमाणसपरिणामस्स नमो एदस्स ।

माधवसेनः—(स्वगतम्) वार्द्धककल्लोलकूलङ्कषः सत्यमनुरागनीय प्रथमाभिनवयौवनानाम् । भवतु (पुनः परिक्रम्य । प्रकाशम्) मृगाङ्कमुखि !

दर्शस्थानविरोधिविक्रमसीदोःकाण्डकण्डूलम—
चण्डच्छेदनगाम्मं पतिममुं मन्यस्व गौडेश्वरम् ।

---

(१) माधवसेन ! विवाहमङ्गलसङ्गनिर्भूरितूर्यरवप्रतिरवप्रनिद्रजागरणम्लानान्यङ्गानि मे, न शक्नोमि पुनः पुनर्मन्त्रयितुम् ।

(२) तादृशप्राणपरिणामस्य नम एतस्मै

भ्रम्यद्विन्दुतरङ्गभङ्गिपटलैर्यद्वाहिनीवारण-

श्रेणीदानजलैर्बिभर्ति जगती कस्तूरिकामण्डनम् ॥ १३ ॥

दमयन्ती—(१) अम्मो ! ईदिसं पि कसिणभीसणं माणुसरूवं भोदि ! अज्ज ! तुरिदमग्गदो वच, वेवदि मे हिदयं ।

(माधवसेनः स्मित्वा परिक्रामति)

नलः—(दमयन्तीमवलोक्य कलहंसं प्रति) पश्य पश्य कौतूहलम् ।

चापल्यं दृशि शाश्वतं कुटिलता चूर्णालकेषु स्थिरा-

मौद्धत्यं कुचयोरनन्यशरणं मध्ये परां तुच्छताम् ।

बिभ्राणाऽपि विदर्भराजतनया भीरुत्वं रता चेतसः

कलहंसः—देव ! किमदः कौतूहलम् ? यतः—

दोषा अप्यतिशेरते क्वचिदपि स्थाने प्ररूढा गुणान् ॥ १४ ॥

माधवसेनः—आः ! दुर्विदग्धहृदये !

रेवाशीकरवारिवेपथुवपुर्माहिष्मतीभूपतिः

सोऽयं श्रीवनिताविलासवसतेरस्याङ्कशय्यां गता ।

शर्म्मोल्लाघनघर्मघस्मरमहन्मैत्रीनिपीतश्रम-

स्वेदाम्भःकणिकाऽसपे ! क्षिप शरच्चन्द्रातपास्ताः क्षपाः ॥ १५ ॥

दमयन्ती—(स्मृतिमभिनीय) (२) अंबहे ! एस अंबाए भादुणो तणुओ वसुसेणो ।

माधवसेनः—(सव्यं परिक्रम्य) चन्द्रमुखि ! कालिन्दीसीकरासारसम्पर्क-सततशङ्कानिलीभूतवातपरिरम्भासम्भावितग्रीष्मोष्माणं विजयवर्माणं मथुराधिपतिं पतिमेतमनुमन्यस्व, स्वैरं विहर्तुमुत्कण्ठसे यदि वृन्दावनपावनासु गोवर्द्धनाधित्यकासु ।

यात्रायां किल यस्य सिन्धुरघटाभारैःप्रसर्पद्भुव-

मूर्च्छालावनिलोम्मूलनतले चामीकरस्माभृति ।

(१) अहो ! ईदृशमपि कृष्णभीषणं मनुष्यरूपं भवति ! आर्य ! त्वरितमग्रतो व्रज, वेपते मे हृदयम् । (२) अहो ! एषोऽम्बाया भ्रातुस्तनुजो वसुसेनः ।

यस्यां मृगीदृशि दृशोरमृतच्छटायां
देवः स्मरोऽपि नियतं विततामिलापः ।
एतत्समागममहोत्सवबद्धतृष्ण-
माहन्ति मामपरथा विशिखैः कथं सः ? ॥ १०॥

माधवसेनः—(परिक्रम्य)

स एष सुभगाग्रणीः पतिरवन्तिभूमेः कला-
कलापकुलकेतनं यदरिवामनेत्राजनैः ।
वसद्भिरधिपर्वतं किमपि पर्वतीयाधिप-
स्त्रियो नृपतिनायिकाललितनाटकं शिक्षिताः ॥ ११ ॥

तदकोशसहस्रपत्रपत्रलाक्षि ! पवित्रय निजेन पाणिना पाणिमस्य यदि सिप्रा-स्रोतसि स्नानाय स्पृहयसि ।

दमयन्ती—(१) माधवसेण ! विवाहमंगलसंगलिदभूरितूररवपडिरव-जणिदजागरणभिंभलाइं मे अंगाइं, न तरामि पुणो पुणो मंतिदुं ।

माधवसेनः—(सभयमात्मगतम्) कथमवन्तीपतिविद्वेषेण सरोषमाभाषते । भवतु, नृपान्तरमुत्कीर्तयामि । (प्रकाशम्) कलकण्ठीकण्ठि ! न्यायैकधनमेतमनुमन्यस्व पतिं कलिङ्गाधिपतिम् । पश्य पश्य—

यथा यथा प्रतापाग्निर्ज्वलत्यस्य महौजसः ।
चित्रं वर्णाश्रमारामाः स्निग्धच्छायास्तथा तथा ॥ १२ ॥

दमयन्ती—(विलोक्य) (२) तादसमाणवयपरिणामस्स नमो एतस्स ।

माधवसेनः—(स्वगतम्) वार्द्धकफलङ्कपङ्किलः सत्यमनुपासनीय एवायमभिनवयौवनानाम् । भवतु (पुनः परिक्रामति । प्रकाशम्) मृगाङ्कमुखि !


दर्पाध्मातविरोधिवीरकुरलीदोःकाण्डकण्डूक्रम—
च्छेदच्छेकपराक्रमं पतिममुं मन्यस्व गौडेश्वरम् ।

---

(१) माधवसेन ! विवाहमङ्गलसङ्गलितभूरितूर्यरवप्रतिरवजनितजागरणविह्वलानि मेऽङ्गानि, न शक्नोमि पुनः पुनर्मन्त्रयितुम् ।

(२) तातसमानवयःपरिणामाय नम एतस्मै

पञ्चमोऽङ्कः ।



(ततः प्रविशति कलहंसः)

कलहंसः—(सविषादम्) अहो ! विकटस्य संसारनाटकस्य परस्परविरुद्धरससमावेशवैरस्यम् ! शृङ्गाराद्भुतरसनिःस्यन्दसुन्दरः क्व नाम स स्वयंवरविवाहमहोत्सवाडम्बरः, क्व चैष परमकरुणरससमाकीर्णप्रणयविच्छिन्नो दुरोदरप्रवर्तितो दमयन्तीमात्रपरिकरस्य देवस्य निषधाधिपतेः प्रवासवैशसोपप्लवः ! अहह ! किमिदमनार्योचितं कर्म समाचरितमिन्दुकुलकृतावतारेणापि देवेन ! अपि खलु पामरप्रकृतयोऽपि दुरोदरकर्मणो दुर्विपाकमाकलयन्ति, किं पुनः सर्वकर्मीणबुद्धिर्देवो निषधाधिपतिः । यदि वा—

कृत्याकृत्यविदोऽपि धर्ममनसोऽप्यन्यायतो बिभ्यतो-
ऽप्यश्लाघ्यं पुरुषस्य दैववशतस्तत् किञ्चिदुज्जृम्भते ।
माहात्म्यं विभवः कला गुणगणः कीर्तिः कुलं विक्रमः
सर्वाण्येकपदेऽपि येन परितो भ्रश्यन्ति मूलादपि ॥ १ ॥

न चैतदनात्मनीनमेव कर्म समाचरितं देवेन, किमुतासर्वजनीनम् । न नाम सैंहिकेयोपरागे सवितेव केवलं म्लाम्यति, किन्तु तदधीनाशेषव्यवहारविशेषमखिलमपि काश्यपीवलयम् । किं तु पुरोहितप्रभृतिपौरलोकः शोकाकुलो द्यूतकर्मनिवारणाय प्रवृत्तः सकलराज्यपदमयन्तीपणेन दीव्यता देवेन समवधीरितस्तदपि न सतां चेतश्चमत्कारकारि । यतः—

तावन्मतिः स्फुरति नीतिपथाध्वनीना
तावत् परोक्तमपि पथ्यतया विभाति ।
यावन् पुराकृतमकर्म न सर्वपर्व-
प्रत्यूहकारि परिपाकमुपैति जन्तोः ॥ २ ॥

अपि च—

स्फुरन्त्युपायाः शान्त्यर्थमनुकूले विधातरि ।
प्रतिकूले पुनर्यान्ति तेऽप्युपाया अपायताम् ॥ ३ ॥

---

१ क. द्यूतनि०

सर्वथा विधिरेवात्र कर्मण्यलङ्कर्मीणतामगमत् । अथवा दुरोदर
निषधाधिपतिं विजेतुं कथमलम्भूष्णुरेष कूबरः ? खलु कृत्वाऽतीतशोच
एकः किल विधिविलसितविपाको मीमांस्यते । श्रुतं च मया यथा खरमुख—
अपि पुरीपरिसरारामवर्तिनो दमयन्तीसचिवस्य देवस्यान्तिकमधितिष्ठतः । त
गच्छामि । (इति परिक्रामति । विलोक्य) किमयं देवः क्षोणीपत्यपथ्यपथिकनेपथ्य
लस्तिलकतरुतले निविष्टस्तिष्ठति ? (सास्रम्) कथमहमेतस्य दुरवस्थापातिनः स्वा
स्वमास्यं दर्शयामि ? तदित एव स्थानात् प्रतिनिवर्ते । यदि वा प्रवसन्तं स्वामि
मालप्य पात्रकप्रवेशेन निरन्तरभक्तिसमुचितमाचरामि ।

(ततः प्रविशति राजा, दमयन्त्यादिकश्च परिवार)

राजा—(सावष्टम्भम्) देवि ! मा रोदीः प्रशस्तलक्षणा भवती । न खलु ते
पतिरभूत्वा भूपतिर्विश्राम्यति । व्यसनोपपातश्चायमनागतायाः सम्पदः पदम् ।

उभयाभिमुख्यभाजां सम्पत्त्यर्थं विपत्तयः पुंसाम् ।
ज्वलितानले प्रपातः कनकस्य हि तेजसो वृद्ध्यै ॥ ४ ॥

(दमयन्ती मन्दं मन्दं रोदिति)

विदूषकः—(विलोक्य) (१) भट्टा ! कलहंसो पणमदि ।

राजा—(सनिर्वेदम्) खरमुख ! भर्तेति पदमन्यत्र सङ्क्रान्तम्, तदिदानीं नाम्नै-
स्वैरमामन्त्रणपदमर्हामि । प्रणमतीत्यप्यवस्थाविरुद्धमनुच्चारणीयम् । कलहंस, ममापा-
ङ्गोऽर्थान्यैवमेव रमणीयम् ।

(कलहंसः प्रणम्य सास्रमधोमुखस्तिष्ठति)

राजा—(कलहंस प्रति)

मा विषीद कृतं बाष्पैः फलं मर्षय कर्मणाम् ।
सत्यं विषादशोकाभ्यां न दैवं परिवर्तते ॥ ५ ॥

कलहंसः—([illegible]) देव ! गुणस्थान [illegible]

राजा—(सक्षोभम्) न कूबरेण कृतः किन्तु [illegible]

मदंहनाहङ्कारं धार्मिकानां [illegible]
विना विधिं [illegible] [illegible] ॥ ६ ॥

(१) भर्तः ! कलहंसः प्रणमति ।
* व. [illegible] ।

कलहंसः—(प्रणम्य) अनुयानाय मामनुजानातु देवो विदूषकमपि ।

राजा—देवीमपि मुमुक्षुरहं परमियमपत्याऽऽग्रहेण मामनुगच्छति। अपि च सर्वस्वपणेन मां कूबरो जितवान्। ततः पथि पथिकवृत्त्यैव गन्तुमुचितम्। तदनुजानीतास्मान् देशान्तरगमनाय। श्लथयत स्नेहबन्धम्। कुरुत निर्दयं हृदयम्। न क्षमामहे राज्यभ्रंशधूसरं परिचितपौराणामास्यं दर्शयितुम्। व्रजामः कामप्येकां दिशम्। (अग्रतः कृत्वा) देवि! दुर्विपद्वातशीतातपक्लेशकारीणि मान्तराणि। राज्यभ्रंशेन विगतपरिच्छदवाहना वयम्। न शक्ष्यति भवती क्रमितुमशिक्षितपादचारा करालव्यालशैलसङ्कटासु वनभूमिषु। तद् विधेहि मे वचनमवलम्बस्व दीर्घदर्शितामिहैव कूबरान्तिके तिष्ठ पितृगृहं वा व्रज। (सर्वे तारस्वरं रुदन्ति) किमितेन प्राकृतप्रकृतिसब्रह्मचारिणा चेष्टितेन? ननु धैर्यमवलम्ब्य समयोचितमाचरत।

दमयन्ती—(१) अज्जउत्त! अहं इध ज्जेव चिट्ठिस्सं। पाणा उण अज्जउत्तेण समं आगमिस्संति।

कलहंसः—(प्रणम्य) अनुव्रजतु देवी देवम्।

राजा—अनुव्रजतु नाम परं परमक्लेशमनुभविष्यति।

दमयन्ती—(२) जं भोदि तं भोदु, अहं दाव आगमिस्सं।

राजा—कलहंस! मर्षयितव्यं यदस्माभिः माभवाद्भिः किमप्यपराद्धम्। वयस्य खरमुख! सर्वदा क्रीडासचिवोऽसि नः। ततस्त्वयाऽस्माकमुपहासादिकं सोढव्यम्। मकरिके! त्वदीयस्य दमयन्तीपदनाप्रयासस्य तदीदृशमवसानमभूत्।

दमयन्ती—(३) पियसहि मअरिए! कुंडिणं गदुअ अंबाए तादस्स य एस पवासवुत्तंतो विण्णवेयव्वो।

---

(१) आर्यपुत्र! अहमिहैव स्थास्यामि। प्राणाः पुनरार्यपुत्रेण सममागमिष्यन्ति।

(२) यद् भवति तद् भवतु, अहं तावदागमिष्यामि।

(३) प्रियसखि मकरिके! कुण्डिनं गत्वाऽम्बायाः तातस्य चैष प्रवासवृत्तान्तो विज्ञापयितव्यः।

मकरिका—(सास्रम्) (१) भट्टिणि ! न सक्केमि अत्तणो मुहं दंसिदुं, ता कुंडिणं न गमिस्सं ।

दमयन्ती—(२) अज्ज ससुर ! सहि मयरिए ! अहं तुज्झेहिं सुमरिदव्वा (कलहंसं प्रति) महाभाय ! अणुजाणाहि मं वणयरिं भविदुं ।

(सर्वे मन्दं रुदन्ति)

राजा—देवि ! अतिकामो भवति । प्रयतस्व देशान्तरगमनाय ।

दमयन्ती—(सरभसमुत्थाय) (३) एसम्हि पगुणीभूदा ।

राजा—(कलहंसादीन् प्रति) अनुजानीत मां सुहृदं दुष्कृतं चानुभवितुम् ।

(सर्वे सास्रं प्रणम्य निष्क्रान्ताः)

देवि ! कम्प्रस्थानमनुतिष्ठसि ?

दमयन्ती—(४) सिरसाणुजाइणं ।

राजा—इत इतो देवी ।

(उभौ परिक्रामतः)

दमयन्ती—(साश्रु विचिन्त्य) (५) अज्जउत्त ! पुव्वादिसिं गच्छ दं मज्झं ति अग्गा मार्ग !

राजा—देवि !

अवन्तीश्रितया मौर्वी यत्नन्दं शाश्वति निगम् ।
मन्वाशेषी विदिशं तेन विन्तितमन्यगा ॥ ७ ॥

---

(१) भर्त्रि ! न शक्नोम्यात्मनो मुखं दर्शयितुम्, तत् कुण्डिनं न गमिष्यामि ।

(२) आर्य श्वशुर ! सखि मकरिके ! अहं युष्माभिः स्मर्तव्या । महाभाग ! अनुजानीहि मां वनचरीं भवितुम् ।

(३) एषास्मि प्रगुणीभूता ।

(४) [illegible] ।

(५) आर्यपुत्र ! पूर्वदिशि [illegible] !

अपि च देवि ! मा स्म विषीद सर्वमपि शुभोदर्कं भविष्यति ।

अस्तमयाति पुनरुदयाति पुनरस्तमुपैति पुनरुदेत्यर्कः ।
विपदोऽपि सम्पदोऽपि च सततं न स्थास्नवः प्रायः ॥ ८ ॥

दमयन्ती—(परिक्रम्य सखेदम्) (१) अज्जउत्त ! परिस्संतम्हि ता खणं वीसमिस्सं ।

(राजा सबाष्पं स्वेदाम्भः प्रमृज्य सिचयाञ्चलेन वीजयति)

(निःश्वस्य) (२) अज्जउत्त ! कित्तियं अज्ज गंतव्वं ?

राजा—यावद् देवि ! समाक्रमितुमलम् ।

(दमयन्ती सखेदमुत्थाय परिक्रामति)

(स्वगतम्) विनोदयाम्यस्याश्चेतः कान्താररामणीयकोपवर्णनेन येनेयं चरण-चङ्क्रमणखेदं न वेदयति । (प्रकाशम्) देवि ! पश्य पश्य—

एते निर्झरझात्कृतैस्तुमुलितप्रस्योदराः क्ष्माधराः
छिन्नंते फलपुष्पपल्लवभरैर्ध्वस्तातपाः पादपाः ।
चक्रोऽप्येष वधूमुखार्द्धदलितैर्वृत्तिं विधत्ते बिसैः
कान्तां मन्द्ररुतस्तथैष परितः पारापतो नृत्यति ॥ ९ ॥

दमयन्ती—(३) अज्जउत्त ! सुहावत्थाणमेदे कोदूहलकारिणो, दुहाव-त्थाणं उण विसेसदो संतावकारिणो ।

राजा—सत्यमाह देवी ।

सुस्थे हृदि सुधासिक्तं दुःस्थे विषमयं जगत् ।
वस्तु रम्यमरम्यं वा मनःसङ्कल्पतस्ततः ॥ १० ॥

---

(१) आर्यपुत्र ! परिश्रान्तास्मि ततः क्षणं विश्रमिष्यामि ।

(२) आर्यपुत्र ! कियदद्य गन्तव्यम् ?

(३) आर्यपुत्र ! सुखावस्थानामेते कौतूहलकारिणः, दुःखावस्थानां पुनर्विशेषतः सन्तापकारिणः ।

---

१ ख. ग. यतोयं । २ क. कान्तारामणीयक० । ३ ख. ग. दुहावत्थाणं ।

मकरिका—(सास्रम्) (१) भट्टिणि ! न सक्केमि अत्तणो मुहं दंसिदुं, ता कुंडिणं न गमिस्सं ।

दमयन्ती—(२) अज्ज खरमुह ! सहि मयरिए ! अहं तुज्झेहिं सुमरिदव्वा (कलहंसं प्रति) महाभाय ! अणुजाणाहि मं वणयरिं भविदुं ।

(सर्वे मन्दं रुदन्ति)

राजा—देवि ! अतिकालो भवति । प्रयतस्व देशान्तरगमनाय ।

दमयन्ती—(सरभसमुत्थाय) (३) एसम्हि पगुणीभूदा ।

राजा—(कलहंसादीन् प्रति) अनुजानीत मां सुकृतं दुष्कृतं वाऽनुभवितुम् ।

(सर्वे सास्रं प्रणम्य निष्क्रान्ताः)

देवि ! कमध्वानमनुतिष्ठामि ?

दमयन्ती—(४) विदब्भाणुजाइणं ।

राजा—इत इतो देवी ।

(उभौ परिक्रामतः)

दमयन्ती—(सास्रं विचिन्त्य) (५) अज्जउत्त ! पुव्वचिंतिदं [1]पेच्छ कहं सव्वं पि अन्नहा जायं !

राजा—देवि !

अर्वाग्दृष्टितया लोको यथेच्छं वाञ्छति प्रियम् ।
भाग्यापेक्षी विधिर्दत्ते तेन चिन्तितमन्यथा ॥ ७ ॥

---

(१) भर्त्रि ! न शक्नोम्यात्मनो मुखं दर्शयितुम्, तत् कुण्डिनं न गमिष्यामि।

(२) आर्य खरमुख ! सखि मकरिके ! अहं युष्माभिः स्मर्तव्या । महाभाग ! अनुजानीहि मां वनचरीं भवितुम् ।

(३) एषाऽस्मि प्रगुणीभूता ।

(४) विदर्भानुयायिनम् ।

(५) आर्यपुत्र ! पूर्वचिन्तितं पश्य कथं सर्वमप्यन्यथा जातम् !

---

१ क. कम० । २ ख. ग. पिच्छमई

अपि च देवि ! मा स्म विषीद सर्वमपि शुभोदर्कं भविष्यति ।

अस्तमयति पुनरुदयति पुनरस्तमुपैति पुनरुदेत्यर्कः ।
विपदोऽपि सम्पदोऽपि च सततं न स्थास्नवः प्रायः ॥ ८ ॥

दमयन्ती—(परिक्रम्य सखेदम्) (१) अज्जउत्त ! परिस्संतम्हि ता खणं वीसमिस्सं ।

(राजा सबाष्पं स्वेदाम्भः प्रमृज्य सिचयाञ्चलेन वीजयति)

(निःश्वस्य) (२) अज्जउत्त ! किच्चिरं अज्ज गंतव्वं ?

राजा—यावद् देवि ! समाक्रमितुमलम् ।

(दमयन्ती सखेदमुत्थाय परिक्रामति)

(स्वगतम्) विनोदयाम्यस्याश्चेतः कान्ताररामणीयकोपवर्णनेन येनेयं चरण-चङ्क्रमणखेदं न वेदयति । (प्रकाशम्) देवि ! पश्य पश्य—

एते निर्झरझात्कृतैस्तुमुलितप्रस्थोदराः क्ष्माधराः
सिञ्चंते फलपुष्पपल्लवभरैर्ध्वस्तातपाः पादपाः ।
चक्रोऽप्येष वधूमुखार्द्धदलितैर्वृत्तिं विधत्ते बिसैः
कान्तां मन्द्ररुतस्तथैष परितः पारापतो नृत्यति ॥ ९ ॥

दमयन्ती—(३) अज्जउत्त ! सुहावत्थाणमेदे कोदूहलकारिणो, दुहाव-त्थाणं उण विसेसदो संतावकारिणो ।

राजा—सत्यमाह देवी ।

सुस्थे हृदि सुधासिक्तं दुःस्थे विषमयं जगत् ।
वस्तु रम्यमरम्यं वा मनःसङ्कल्पतस्ततः ॥ १० ॥

(१) आर्यपुत्र ! परिश्रान्तास्मि ततः क्षणं विश्रमिष्यामि ।

(२) आर्यपुत्र ! कियदद्य गन्तव्यम् ?

(३) आर्यपुत्र ! सुखावस्थानामेते कौतूहलकारिणः, दुःखावस्थानां पुनर्विशेषतः सन्तापकारिणः ।

१ ख. ग. चनेयं । २ क. कोलाहल॰ । ३ ख. ग. दुरावत्थं ।

राजा—नमो मुनये।

तापसः—भद्राणि पश्य। (अपवार्य विपरीतलक्षणया) महाभाग! वपुर्लक्षणविसंवादिनी ते दशा। तत् कथय कोऽसि? कथं दुःस्थावस्थः?

राजा—(सव्रीडम्) मुने! भूपतिचरोऽस्मि।

तापसः—(सादरमिव) तर्हि सुतरामतिथयः स्थ। तदावेदय किमातिथेयमनुतिष्ठामि?

राजा—यद्युद्यानस्तपस्विनस्तत् कथयत विदर्भपथाभिज्ञानानि। एतदेव नः साम्प्रतमातिथेयम्।

तापसः—किं तत्र वः?

राजा—श्वशुरकुलं तत्र नः।

तापसः—तत्र वः सधर्मचारिणी?

राजा—अत्र नः सधर्मचारिणी।

तापसः—(सविचिकित्समिव) स्त्रीसङ्गनिगडितो भवान् नार्हः कामचारस्य। अपि च राज्यभ्रंशः स्त्रीसङ्गश्चेति महती व्यसनपरम्परा।

राजा—(स्वगतम्) सत्यमाह तापसः। भुजमात्रपरिच्छदैर्यत्रैव तत्रैव यथैव तथैव स्वैरमास्यते। स्त्रीवद्धानां कुतः कामचारः?

तापसः—अनुचितं गृहस्थकृत्यचिन्तनं तपस्विनः। तथापि साप्तपदीनसौहार्दोपबृंहितहृदयो महाभागं किमप्यनुशास्मि।

राजा—अनुगृह्णातु महात्मा।

तापसः—भ्रष्टराज्यस्य भवतः श्वशुरकुलगमनमपत्रपावहं मे प्रतिभाति। त्वमप्यधिमनसमालोचय यद्ययमर्थः समर्थः प्रदर्शयितुमौचितीम्।

राजा—(स्वगतम्) इदमप्यस्य वचनं तथ्यं पथ्यं च। तदानीं स्वयंवरे तथा चमूचक्रेण गत्वा पुनरिदानीं दमयन्तीमात्रपरिच्छदः कुण्डिनं प्रविशंस्तत्रत्यपौरजनानामपि हास्यपात्रं भविष्यामि। तदियमेवैका देवी ज्ञातविदर्भपथाभिज्ञाना कुण्डिनमुपसर्पतु। (प्रकाशम्) भगवन्! सौहृदसदृशमनुशिष्टवानसि।

---

१ ख ग. ॰पद्रुन॰। २ क. ॰शासितास्मि। ३ ख. ग. ॰मर्थं प्रवहितु॰।

तापसः—(सहर्षमात्मगतम्) अनुष्ठितस्तावदेको गुरोरादेशः । पर
द्वितीयमनुतिष्ठामि । (ऊर्ध्वमवलोक्य प्रकाशं ससम्भ्रमम्) कथं ललाटन्तपस्तपनः ? उ
वर्तते सन्ध्याविधिः । महाभाग ! अनुजानीहि मां मध्याह्नसन्ध्यासेवनाय । अ
चोत्तरेण पर्वतमकुटिलः कुण्डिनस्य पन्थाः (इत्यभिधाय निष्क्रान्तः)

राजा—अस्मात् सरसः कमलदलपुटकैः सलिलमाहरामि, स्वयं च पिबामि
(सनिर्वेदम्) धिग् मां व्यसनोपपातविस्मृतौचित्याचरणम् । अनुपशान्तपिपासायां देव्यां
कथमहं पयस्यामि ? भवतु, जलमादाय तत्र गच्छामि । (तथा कृत्वा परिक्रम्य)
कथमियं मयाऽपहातव्या । आः ! ज्ञातम्, निद्रायितां सन्त्यज्य व्रजामि । (विलोक्य)
इयं देवी, देवि ! इदं वारि उपस्पृशतु देवी । (दमयन्ती उपस्पृशति) देवि ! अयं ते
विदर्भेषु व्रजन्त्याः (पुनः सशङ्कम्) अयं विदर्भेषु गच्छतामध्वनीनाम-
कुटिलः पन्थाः ।

दमयन्ती—(सभयमात्मगतम्) (१) हा ! हदम्हि मंदभाइणी । किं मं
परिचइदुकामो अज्जउत्तो, जं एवं जंपेदि ? अहवा पडिहदममंगलं । एयं खु पिवा-
सारिवन्नकंठस्स अज्जउत्तस्स वयणखलिदं ।

राजा—देवि ! यद्यपेतपरिश्रमा, तदा पुरः प्रचलितुं यतस्व ।

दमयन्ती—(२) अज्जउत्त ! निद्दायंति मे लोयणाइं, ता खणं इह
ज्जेव सइस्सं ।

राजा—(सहर्षमात्मगतम्) प्रियं नः (प्रकाशम्) देवि ! प्रश्रान्ताऽसि तद्
विनोदय निद्रया क्षणं चङ्क्रमणश्रमम्, अहमपि निद्रास्यामि ।

दमयन्ती—(स्वगतम्) (३) मा णाम मं पसुत्तं परिच्चईय कयाइ
गच्छे, ता अत्तणो चीवरेण अज्जउत्तं परिवेढिय निद्दाएमि ।

(१) हा ! हताऽस्मि मन्दभागिनी । किं मां परित्यक्तुकाम आर्यपुत्रो यदेव
जल्पति ? अथवा प्रतिहतममङ्गलम् । एतत् खलु पिपासाखिन्नकण्ठस्य आर्यपुत्रस्य वचनस्खलितम् ।

(२) आर्यपुत्र ! निद्रायेते मे लोचने, ततः क्षणमिहैव शेष्ये ।

(३) मा नाम मां प्रसुप्तां परित्यज्य कदाचिद् गच्छेत्, तदात्मनश्चीवरेण
आर्यपुत्रं परिवेष्ट्य निद्रामि ।

(तथा कृत्वा शयनं नाटयति)

राजा—(विलोक्य) कथं चरणचङ्क्रमणगाढप्ररूढगात्रपरिश्रमेण क्षणादेव निद्रामकर्पमधिरूढा देवी। तदारभ्यते चण्डालकुलालङ्करणं कर्म। (उत्थातुमिच्छति। साशङ्कम्) कथमिति निबिडमापीड्य मामियं विरहकातरा शेते। तपस्विनी मामवधारयति मुखमधुरमवसानदारुणं कालकूटफलम्। सरले! मुञ्च मुञ्च त्रिजगत्परितापावापहेतुः सर्वभक्षी नलरूपेणानलोऽस्मि। अपि च भर्तृवत्सले!

विश्वासघातिनमकृत्यकरं श्वपाकं
मा मां स्पृश श्लथय दोःपरिरम्भमुद्राम्।
अस्मादृशामकरुणैकशिरोमणीनां
सर्वंसहाऽपि विरमत्यनुषङ्गपापात्॥ १२॥

(शनैर्दोःपरिरम्भमुन्मुच्य साशङ्कम्) कथमम्बरेण परिवेष्टितोऽस्मि। (विहस्य) अपि यत्नपरे! किमीदृशैः प्रयत्नैरुपरुध्यति क्रूरकर्मपटीयान् नलः? यस्त्रिजगद्बन्धनेन प्रेम्णा न बध्यते तस्य मृणालतन्तुपेशलमम्बरं किमादधीत? एष तरवारिणा च्छित्त्वा गच्छामि। (कृपाणं प्रति) सखे! दर्शय फलमात्मसन्निधानस्य। (सरोषम्) कथं कृपालुरिव विलम्बसे? किञ्च नलस्यासिरसि दयालुश्चेति व्याहतं चरितम्। अपि च—

घनं प्रेमग्रन्थिं सदयमपि चिच्छेद हृदयं
कृपा केयं ब्रूहि स्फुरति हृदि निस्त्रिंश! भवतः?
यदद्यापि च्छेत्तुं न सहसि विदर्भेन्द्रतनया—
नितम्बस्तम्बाङ्कम्पणयिपरिधानांशुकमिदम्॥ १३॥

आः! ज्ञातम्, हस्तं सत्वरायमपेक्षते। (दक्षिणहस्तं प्रमार्य सरोषम्)

त्वया तावत् पाणिः प्रसभमुपगूढः परिणये
त्वमेवास्याः पीनस्तनजघनसौख्यसचिवः।
ततश्छेत्तुं वासः कुरुकृप! कृपाणं कर! घरं—
शुटन्मर्मोत्सङ्गः कथमहह! नोऽपि विलयम्?॥ १४॥

अपि च—

देवीनीविविच्छिदालोभ! निर्दाक्षिण्यशिरोमणे!
सवाच्यः स विरिञ्चोऽपि हस्त! त्वां दक्षिणं सृजन्॥ १५॥

(विमृश्य)

यदि वा धूतकारस्य न नामाकृत्यमस्ति ते ।
आः ! गृहाण कृपाणं हुं हुं विधेहि द्विधांशुकम् ॥ १६ ॥

(अंशुकं द्विधाकृत्य शनैरुत्थाय)

भ्रातश्चूत ! वयस्य केसर ! सखे पुन्नाग ! यामो वयं
मा स्मास्माकमनार्यकार्यपरतां जानीत यूयं हृदि ।
धूतेच्छा क्व च कूबरस्य निषधाभर्तुः क्व चाक्षैर्जयो
वैदर्भीत्यजनं क्व चैष निखिलः कल्पः प्रसादो विधेः ॥ १७ ॥

भवतु, चरमं देवीवदनेन्दुविलोकनं कृत्वा व्रजामि । (विलोक्य सास्रम्)

स्पृशति न मणिज्योत्स्नाच्छन्नं निशान्तजुषः पुरा
सुचिरमनिलोऽप्यङ्गं यस्या नलादिव शङ्कितः ।
विगतशरणा क्षुत्क्षामाङ्गी पटच्चरधारिणी
वनभुवि हहा ! सेयं शेते विदर्भपतिप्रसूः ॥ १८ ॥

हे देवि ! एष कर्मचण्डालो नलः प्रयाति । (कतिचित् पदानि दत्त्वा सरोषमात्मानं प्रति) आः क्षत्रियापसद ! पुरुषसारमेय ! भर्तृजाल्म ! श्वपाकनायक ! कृपाविकल ! हतनल ! कथमिमामेकाकिनीमात्मैकशरणां सधर्मचारिणीमस्मिन् गहने वने सन्त्यज्य प्रचलितोऽसि ? भवतु, वनदेवताः शरणं कृत्वा व्रजामि । (प्रतिनिवृत्य दिशोऽवलोक्य)

कच्चित् काननदेवताः ! शृणुत मे यस्या वपुः कल्पयन्
जातः शिल्पिगणाग्रणीः कमलभूः सेयं विदर्भात्मजा ।
अस्याः कर्कशकर्मणा प्रियतमाभासेन निष्कारणं
त्यक्तायाः शरणं स्थ मा स्म नलवन्निस्त्रिंशतां गच्छत ॥ १९ ॥

(पुनरञ्जलिं बद्ध्वा)

निद्राच्छेदे क्व दयित ! गतोऽसीति तारं वदन्ती
विन्यस्यन्ती दिशि दिशि दृशं बाष्पकल्लोललोलाम् ।
देव्यः ! सर्वा वनवसतयो मातरः ! प्रार्थये व-
स्तत् कर्तव्यं कलयति तथा कुण्डिनाध्वानमेषा ॥ २० ॥

(नेपथ्ये)

(१) अज्ज ! एदं सिसिरसलिलपूरिदं सरं, ता एदि मज्झवाहस्स गड्डुअ करेमि।

राजा—कथं पक्कणवासी कोऽप्यागच्छति (साशङ्कम्) यदि कथमप्येष शबरस्यास्य कोलाहलेन निद्रामपजह्यात् तदा मामन्वभीयात्। भद्र व्रजाम्यहम्। देवि ! तदानीं चरममाभाष्यसे। वनदेवतास्ते शरणम्। एष पापिष्ठश्रेष्ठो निर्घृणशिरोमणिः परवञ्चनाचतुरः क्षत्रियापदेशेन अनलगासगः क्रूरकर्मा चाण्डालचक्रवर्ती नलः प्रयाति। (इत्यभिधाय फूत्कुर्वन् निष्क्रान्तः)

(ततः प्रविशति पुरुषः)

पुरुषः—(२) अज्ज ! एदं सिसिरसलिलपूरिदं सरं। ता एदि मज्झवाहस्स करेमि (परिक्रम्य विलोक्य च) कधं इत्थिआ ! अम्मो ! अदिरूविणी ! हिमाणइ कधं अरण्णे एगागिणी (सदयम्) मा एदं केवि भुअङ्गवाअम्मो स्सावअसे भिक्खणं से हवए। ता उत्थावए हगे। अज्जे अज्जे ! उत्थेहि उत्थेहि (सरोषम्) कहं अदिनिद्दाए मुद्दा विअ न सुणेदि सद्दं ? भोदु, उप्पाडिय एदं अस्सम्म नएमि। (तथा कृत्वा निष्क्रान्तः)

॥ पञ्चमोऽङ्कः ॥

---

(१) आर्य ! एतत् शिशिरसलिलपूरितं सरः, तदेतत् मध्याह्नस्य गन्ध करोमि।

(२) आर्य ! एतत् शिशिरसलिलपूरितं सरः, तदेतत् मध्याह्नस्य करोमि। कथं स्त्री ! अहो ! अतिरूपवती, हा ! कथमरण्ये एकाकिनी ! मैनां कोऽपि भुजङ्गमकाले श्वापदो भक्षयेत् (!)। तदुत्थापयाम्यहम्। आर्ये ! आर्ये ! उत्तिष्ठ उत्तिष्ठ। कथं अतिनिद्रया मुग्धेव न शृणोति शब्दम् ! भवतु, उत्पाट्यैतामाश्रमं नयामि।

---

१ क. रक्षणम्।

(विमृश्य)

यदि वा द्यूतकारस्य न नामाकृत्यमस्ति ते ।
आः ! गृहाण कृपाणं हुं हुं विधेहि द्विधांशुकम् ॥ १६ ॥

(अंशुकं द्विधाकृत्य शनैरुत्थाय)

भ्रातश्चूत ! वयस्य केसर ! सखे पुन्नाग ! यामो वयं
मा स्मास्माकमनार्यकार्यपरतां जानीत यूयं हृदि ।
द्यूतेच्छा क च कूबरस्य निषधाभर्तुः क चार्थार्जयो
वैदर्भीत्यजनं क चैष निखिलः कल्पः प्रसादो विधेः ॥ १७ ॥

भवतु, चरमं देवीवदनेन्दुविलोकनं कृत्वा व्रजामि । (विलोक्य सास्रम्)

स्पृशति न मणिज्योत्स्नाच्छन्नं निशान्तजुषः पुरा
सुचिरमनिलोऽप्यङ्गं यस्या नलादिव शङ्कितः ।
विगतशरणा क्षुत्क्षामाङ्गी पटच्चरधारिणी
वनभुवि हहा ! सेयं शेते विदर्भपतिप्रसूः ॥ १८ ॥

हे देवि ! एष कर्मचण्डालो नलः प्रयाति । (कतिचित् पदानि दत्त्वा सरोषमात्मानं प्रति) आः क्षत्रियापसद ! पुरुषसारमेय ! भर्तृजाल्म ! श्वपाकनायक ! कृपाविकल ! हतनल ! कथमिमामेकाकिनीमात्मैकशरणां सधर्मचारिणीमस्मिन् गहने वने सन्त्यज्य प्रचलितोऽसि ? भवतु, वनदेवताः शरणं कृत्वा व्रजामि । (प्रतिनिवृत्य दिशोऽवलोक्य)

कश्चिद् काननदेवताः ! शृणुत मे यस्या वपुः कल्पयन्
जातः शिल्पिगणाग्रणीः कमलभूः सेयं विदर्भात्मजा ।
अस्याः कर्कशकर्मणा प्रियतमाभासेन निष्कारणं
त्यक्तायाः शरणं स्थ मा स्म नलवन्निस्त्रिंशतां गच्छत ॥ १९ ॥

(पुनरञ्जलिं बद्ध्वा)

निद्राच्छेदे क दयित ! गतोऽसीति तारं वदन्ती
विन्यस्यन्ती दिशि दिशि दृशं बाष्पकल्लोललोलाम् ।
देव्यः ! सर्वा वनवसतयो मातरः ! प्रार्थये व-
स्तद् कर्तव्यं कलयति तथा कुण्डिनाध्वानमेषा ॥ २० ॥

(नेपथ्ये)

(१) अज्ज ! एदं सिसिरसलिलपूरिदं सरं, ता पविसिअ सत्थवाहस्स गडुअ कहेमि ।

राजा—कथं पक्कणवासी कोऽप्यागच्छति (साशङ्कम्) यदि कथमप्येषा शबरस्यास्य कोलाहलेन निद्रामपनयात् तदा मामनवधीयात् । तद् व्रजाम्यहम् । देवि ! तदानीं चरमप्राप्स्यसे । वनदेवतास्ते शरणम् । एष पापिष्ठश्रेष्ठो निर्घृणशिरोमणिः परवञ्चनाचतुरः क्षत्रियापदेशेन ब्राह्मणाधमः क्रूरकर्मा चाण्डालचक्रवर्ती नलः प्रयाति । (इत्यभिधाय पूत्कुर्वन् निष्क्रान्तः)

(ततः प्रविशति पुरुषः)

पुरुषः—(२) अज्ज ! एदं सिसिरसलिलपूरिदं सरं । ता पविसिअ सत्थवाहस्स कहेमि (परिक्रम्य विलोक्य च) कथं इत्थिआ ! अम्मो ! अदिरूविणी ! हीमाणहे कधं अडवीए एगागिणी (सदयम्) मा एदं केवि सुवण्णवाकल्लाने एत्थवसे भिक्खवं वो ण्हाए । मा उत्थावए इमं । अज्जे अज्जे ! उत्थेहि उत्थेहि (सरोषम्) कहं महानिद्दाए सुत्ता विअ न सुणेदि सद्दं ? भोदु, उप्पाडिअ एदं सत्थवाहस्स णएमि । (तथा कृत्वा निष्क्रान्तः)

॥ पञ्चमोऽङ्कः ॥

---

(१) आर्य ! एतत् शिशिरसलिलपूरितं सरः, तदिदं सार्थवाहस्य गत्वा कथयामि ।

(२) आर्य ! एतत् शिशिरसलिलपूरितं सरः, तदिदं सार्थवाहस्य कथयामि । कथं स्त्री ! अहो ! अतिरूपिणी, हा ! कथमरण्ये एकाकिनी ! केनापि बुभुक्षितेन राक्षसो भक्षयेत् न मां देवः (!) । तदुत्थापयाम्यहम् । आर्ये ! आर्ये ! उत्तिष्ठ उत्तिष्ठ । कथं महानिद्रया सुप्तेव न शृणोति शब्दम् ! भवतु, उत्पाट्यैनां सार्थवाहस्य नयामि ।

---

१ क. रसते ।

षष्ठोऽङ्कः ।

(ततः प्रविशति नलः)

नलः—(दमयन्तीमनुस्मृत्य सानुतापम्)

राज्यं हारितवानहं नहि नहि व्याधत्त सर्वं विधि-
देवीं हाऽस्यजमस्मि तत्र विपिने यद्वा स्त्रियो वन्धनम् ।
तां पश्येयमहं वनेऽथ गहने तस्याः कुतः प्राणितं
ह्रीर्मे नो न दया दुरोदरकृतः का वा त्रपा का कृपा ? ॥ १ ॥

(पुनः सखेदम्)

नास्मार्षं नयमस्मि नाधिमनसं प्रेमाणमाशिश्रियं
नाकार्षं कुलमुज्ज्वलं हृदि कृपां पापो न वाऽजीगणम् ।
तां तस्मिन् गहने वने विरहयन् कर्माचरं दुर्जरं
धिग् मां नाहमवेक्षणीयवदनो नार्हामि पङ्क्तिं सताम् ॥ २ ॥

अहह ! कथमनिमित्तशत्रुर्दुरात्माऽहमात्मैकशरणां तां तपस्विनीमपाकृतवान् !

(ऊर्ध्वमवलोक्य)

न प्रेम नाप्यभिजनं न गुणं न सेवां
चित्ते दधत्युपकृतिं किल ये श्रयन्तः ।
किं दैव ! नैव निहता भवता हतास्ते
गर्भस्थिताः प्रसवमात्रभृतोऽथ मर्त्याः ॥ ३ ॥

(स्मृत्वा सचिन्तम्)

स्फुरति तिमिरे घूकव्राते ध्वनत्यतिभैरवं
ककुभि ककुभि व्यालानीके विसर्पति सध्वनौ ।
चरममचलं याते पत्यौ रुचां चकितेक्षणा
शरणमधिकं भीरुर्देवी करिष्यति किं वने ? ॥ ४ ॥

(विमृश्य)

तावनिपधेन भुजगरूपमास्थाय समयोचितमनुशिष्टोऽस्मि । इदमप्यतिरमणीय-माचरितं तातेन यन्मम रूपं विपर्यासितम् । अनुपलक्षितरूपो हि सुखमेवाहमिदानीम-योध्याधिपतेरभ्यर्णे सूपकारादिकर्माण्यादधानः स्थास्यामि । (साश्चर्यम्) अहह ! पश्य

१ ख. ग. निहिता ।

कीदृशी गुरुमधुसमृद्धिरासादिता तातेन। सर्वथा भूर्भुवःस्वस्त्रयेऽपि नासाध्यमस्ति तपसाम्। (सविषादम्) अहो! मे महान् प्रमादः। नन्वहं जीवलकेन महीपतेर्दधिपर्णस्याज्ञया विदर्भागतभरतैः प्रयुज्यमानं नाटकमवलोकितुमाकारितोऽस्मि। तद् व्रजामि त्वरितम्। अपि नाम नटेभ्यः क्वापि दमयन्तीप्रवृत्तिरपि लभ्येत। (परिक्रामति। नेपथ्याभिमुखमवलोक्य) कथमयमिक्ष्वाकुकुलतिलको देवो दधिपर्णः सपर्णनाम्नाऽमात्येन सह जल्पन्नास्ते। जीवलकोऽप्यत्रैव तिष्ठति। भवतु, प्रणमामि।

(ततः प्रविशति यथानिर्दिष्टो राजा)

राजा—अमात्य! पश्याकृतिविरुद्धमस्य बाहुकनाम्नो वैदेशिकस्य कलासु कौशलम्। किमेतस्य सर्वाङ्गवक्रस्य तदिदमचलक्षणवैलक्षण्यम्, सोऽयं सूर्यपाकविधिः, सेयमपरास्वपि क्रियासु चातुरी सम्भवति।

सपर्णः—अस्मिन् नयनोद्वेगाञ्जने कलाकलापमावपन्नसंशयं विरञ्चिर्भ्रान्तः।

जीवलकः—देव! बाहुकः प्रणमति।

राजा—बाहुक! इत आस्यताम्। (नलः प्रणम्योपविशति)

(स्मृत्वा) किमद्यापि विरयन्ति रङ्गोपजीविनः?

जीवलकः—भो भरतपुत्राः! प्रस्तूयतां नाट्यम्।

(प्रविश्य)

सूत्रधारः—नलान्वेषणनामप्रबन्धाभिनयावधानाय महाराजं दधिपर्णमभ्यर्थये।

नलः—(स्वगतम्) कोऽयं नलः? किमहमेव? यदि वाऽपारे जगत्पारावारे न दुर्लभो नामसंवादः।

राजा—एष सावधानोऽस्मि। ततः प्रस्तूयताम्।

(नेपथ्ये)

(१) हा अज्जउत्त! परित्तायाहि मं, भायामि एगागिणी करालवालविहुरे रण्णकुहरे।

---

(१) हा आर्यपुत्र! परित्रायस्व मां, बिभेमि एकाकिनी करालव्यालविधुरेऽरण्यकुहरे।

नलः—(स्वगतम्) मयैव दुरात्मना केनाप्येकाकिनी गहने वने किं प्रिया परित्यक्ता ?

राजा—अमात्य ! प्रथमेऽपि नाट्यारम्भे कष्टमतिकरुणो रसः।

(नेपथ्ये)

अये पिङ्गलक ! तामनुकूलय तपस्विनीं येन सार्थवाहान्तिकं नयामः।

सूत्रधारः—यदमी दमयन्ती-गन्धार-पिङ्गलकनेपथ्यधारिणो रङ्गोपजीविनः संरभन्ते, तज्जाने प्रवृत्तं नाट्यम्। तदहमपि कार्यान्तरमनुतिष्ठामि।

(अञ्जलिं बद्ध्वा)

जयति स पुरुषविशेषो नमोऽस्तु तस्मै त्रिधा त्रिसन्ध्यमपि।
स्वप्नेऽपि येन दृष्टं नेष्टवियोगोद्भवं दुःखम्॥ ५॥

(इत्यभिधाय निष्क्रान्तः)

(ततः प्रविशति दमयन्ती गन्धारः पिङ्गलकश्च)

गन्धारः—आर्ये ! अलमतिप्रलपितेन। आगच्छाचलपुरयायिनो धनदेव-नाम्नः सार्थवाहस्याभ्यर्णम्।

दमयन्ती—(१) अज्ज ! अत्तणो भत्तारं गवेसइस्सं।

गन्धारः—आर्ये ! कस्ते पतिः ?

नलः—(ससम्भ्रममात्मगतम्) किमेषाऽभिधास्यति ?

दमयन्ती—(२) निसढाहिवदी नलो।

नलः—(स्वगतम्) आः पाप ! नलहतक ! विलीयस्व। किमतः परं शृणोषि ? ध्रुवमुपरता देवी। कथमपरथा नाट्येषु तन्नामनिबन्धेन व्यवहारः।

पिङ्गलकः—(सरोषम्) (३) सिग्गिले ! किं तेण कूरकम्मणा चंडा-लेण कहिस्ससि ? ता सत्थवाहपासं एहि।

---

(१) आर्य ! आत्मनो भर्तारं गवेषयिष्यामि।

(२) निषधाधिपतिर्नलः।

(३) सिग्गिरे ! किं तेन क्रूरकर्मणा चण्डालेन कथयिष्यसि ? तत्सार्थवाहपार्श्वमेहि।

राजा—(सहर्षम्) साधु भो भरत! साधु! स्वप्नेऽप्यदृष्टपवदनोऽसौ येनेयमेकाकिनी परित्यक्ता।

नलः—(सरोषमिव) अस्पृश्योऽश्रोतव्योऽग्राह्यनामा चेदयमभिधीयताम्।

गन्धारः—तर्हि गवेषय क्वापि।

दमयन्ती—(१) एदस्सिं सरे मह णिमित्तं सलिलमाणेदुं गदो भविस्सदि। ता इत्थ गवेसिस्सं।

गन्धारः—बाले! मूढाऽसि। यस्त्वां सुप्तामपजहाति, स किं त्वन्निमित्तमम्भः समानयति?

दमयन्ती—(२) अध मा एवं भण। अहं पाणेहिंतो वि अज्जउत्तस्स पियदरा।

राजा—परित्यागेनाप्यमुना निवेदितं त्वयि भर्तुः प्रेम।

दमयन्ती—(परिक्रम्य) (३) कधं एदं सरो, ण उण अज्जउत्तो दीसदि। भोदु, एदं चक्कवायघरणिं पुच्छामि।

सहि! चक्कवायदइए! दइयं किं मह न साहसे सहसा?
पियविरहियाण दुक्खं पच्चक्खं तुज्झमणुनिसं॥ ६॥

राजा—उचितमुक्तवती।

अनुभूतं न यद् येन रूपं नावैति तस्य सः।
न स्वतन्त्रो व्यथां वेत्ति परतन्त्रस्य देहिनः॥ ७॥

दमयन्ती—(विमृश्य) (४) पियपणयगव्विदा ण पडिवयणं पडिच्छदि। (सरोषम्) हंजे रहंगिए! केरिसो दे एस पियपणयदप्पो!

---

(१) एतस्मिन् सरसि मम निमित्तं सलिलमानेतुं गतो भविष्यति। तदत्र गवेषयिष्यामि।

(२) अथ मैवं भण। अहं प्राणेभ्योऽपि आर्यपुत्रस्य प्रियतरा।

(३) कथमेतत् सरो न पुनरार्यपुत्रो दृश्यते! भवतु एतां चक्रवाकगृहिणीं पृच्छामि।
सखि चक्रवाकदयिते! दयितं किं मम न कथयसि सहसा?
प्रियविरहितानां दुःखं प्रत्यक्षं तवानुनिष्पन्न॥

(४) प्रियप्रणयगर्विता न प्रतिवचनं प्रतीच्छति। सखि रथाङ्गि! कीदृशस्ते एष प्रियप्रणयदर्पः!

अहं पि पुरवं ईदिस यासं । संपदं ज्जेव अणाहा जादा।

गन्धारः—(सास्रम्) आर्ये ! किमेषा तिरश्ची वराकी जानाति ?

दमयन्ती—(१) ता अन्नत्थ पुच्छिस्सं ।

(विलोक्य संस्कृतमाश्रित्य च)

मातः कुञ्जरपत्नि ! तात हरिण ! भ्रातः शिखण्डिन् ! कृपां
कृत्वा ब्रूत मनाक् प्रसीदत कृतो युष्माकमेषोऽञ्जलिः ।
दृष्टः क्वापि गवेषयन्निह वने भीमात्मजां नैषधो
भूपालः सरणिं सृजन्नविरलैर्बाष्पोर्मिभिः पङ्किलाम् ॥ ८ ॥

पिङ्गलकः—(२) अज्जे ! कीस उणं तेण पदिणा तुमं पडिचत्ता सि ?

दमयन्ती—(सबाष्पम्) (३) अज्ज ! दोसं न याणामि ।

अप्पा समप्पिओ पढमदंसणे वणमिणं च सह चलिया ।
सुवणेमि पइं अन्नं न महेमि तहा वि परिचत्ता ॥ ९ ॥

अहवा पडिहदममङ्गलं । नाहं अज्जउत्तेण परिचत्ता, किं तु मह दुक्खविणोयणत्थं परिहासो कदो ।

(पुनराकाशे)

(४) एगागिणी अहं भीलुगा य निम्माणुसं च वणमिणमो ।
ता एहि एहि पिययम ! अलाहि परिहासकीलाए ॥ १० ॥

अहमपि पूर्वमीदृश्यासम् । साम्प्रतमेवानाथा जाता ।

(१) तदन्यत्र प्रक्ष्यामि ।

(२) आर्ये ! किं पुनस्तेन पत्या त्वं परित्यक्ताऽसि ?

(३) आर्य ! दोषं न जाने ।

आत्मा समर्पितः प्रथमदर्शने वनमिदं च सह चलिता ।
स्वप्नेऽपि पतिमन्यं न काङ्क्षामि तथापि परित्यक्ता ॥ ९ ॥

अथवा प्रतिहतममङ्गलम् । नाहमार्यपुत्रेण परित्यक्ता, किन्तु मम दुःखविनोदनार्थं परिहासः कृतः ।

(४) एकाकिन्यहं भीरुका च निर्मानुषं च वनमिदम् ।
तदेहि एहि प्रियतम ! अलं परिहासक्रीडया ॥ १० ॥

---

१ ग. चेव ।

(प्रतिरवमाकर्ण्य आकाशे)

(१) किं मं वाहरसि ? एस आगच्छामि । (ससंभ्रमं धावति)

गन्धारः—(सबाष्पम्) आर्ये ! प्रतिश्रुतिरियम् ।

दमयन्ती—(सपदि स्थित्वा) (२) अज्ज ! एसा पडंसुया ?

गन्धारः—एषा प्रतिश्रुत् ।

दमयन्ती—(३) (स्वप्रतिच्छायामालोक्य, महाप्रमुदितस्वरम्) दिट्ठिया दिट्ठिया अज्जउत्त ! दिट्ठो सि दिट्ठो सि कहिं दाणिं गच्छसि ? (पुनः ससंभ्रमं धावित्वा सशीत्कारं च स्थित्वा गन्धारं प्रति सबाष्पम्) अज्ज ! दब्भंकुरेहिं विद्धो मे चलणो । ता अवणेहि एदो अहवा चिट्ठ सयं ज्जेव अवणिस्सं । नाहं परपुरिसं फुसेमि ।

राजा—(ससंभ्रममुत्थाय) भगवति ! पतिव्रते ! नमस्ते ।

जीवलकः—देव ! किमिदम् ? सिंहासनमलङ्क्रियताम् । ननु कूटनाटकनेपथ्यम् ।

(राजा सव्रीडमुपविशति)

नलः—(सदुःखमात्मगतम्)

> धृते ! धाधिर्यं त्वं कलय विभृतां किञ्च नयने !
> पुनामन्धीभावं द्रुतमनगदङ्गारविषयम् ।
> शृणोम्यस्यास्तारं न रुदितमहं येन नादिदं
> न वा पश्याम्येतां विरहहरिणीं हारिलसिताम् ॥ ११ ॥

गन्धारः—(सबाष्पम्)

> अस्याः क्षोणि ! विधेर्वशादभिनवां संनिक्षयन्त्यास्त्वपि
> भ्रान्तिं किं चरणौ विरादतिखरैर्दर्भाङ्कुरैर्विध्यसि ?
> व्यापन्नौ पतिनात्सु कर्तुमुचितास्ते पक्षपाताः स्त्रियाः
> पारुष्यं पुरुषः स नाम विभृतां क्षोणीपतिर्नैषधः ॥ १२ ॥

---

(१) किं मां व्याहरसि ? एष आगच्छामि ।

(२) आर्य ! एषा प्रतिश्रुतिः[१]

(३) दिष्ट्या ! दिष्ट्या ! आर्यपुत्र ! दृष्टोऽसि दृष्टोऽसि, क्वेदानीं गच्छसि ? आर्य ! दर्भाङ्कुरैर्विद्धो मे चरणः । तदपनयैतानथवा तिष्ठ, स्वयमेवापनेष्यामि । नाहं परपुरुषं स्पृशामि ।

---

१ ख. ग. प्रतिश्रुत् ।

सपर्णः—(सरोषमुत्थाय) आः ! शैलूषापसद ! येनेयं पतिव्रता गहने वने निर्निमित्तमग्राह्यनाम्ना चण्डालेन परित्यक्ता, तमपि पापीयांसं क्षोणीपतिमभिदधासि?

राजा—अमात्य ! स्वस्थो भव, नाटकमिदम् ।

(सपर्णः सलज्जमुपविशति)

नलः—(राजानं प्रति)

एनामरण्यभुवि मुक्तवतोऽपि दोषो-
न्मेषो नलस्य न मनागपि किन्तु तेषाम् ।

राजा—(सभयम्) येऽस्या एतामवस्थामवलोकयन्ति ?

नलः—नहि नहि

यैरेष कल्मषमयो न कृतस्तदानी-
मेवाग्निसादपनयैर्हतलोकपालैः ॥ १३ ॥

राजा—(सरोषम्) बाहुक ! वृथा भगवतो लोकपालानुपालम्भसे। ननु नलं पश्यन्तोऽपि पापेनोपलिप्यन्ते लोकपालाः, किं पुनर्व्यापादयन्तः ?

पिङ्गलकः—(सास्रम्) (१) अज्जे ! न य से पाविट्ठे तुह पदी, किं पुण एसा पडिच्छाया ।

दमयन्ती—(२) अज्ज ! एसा मम ज्जेव पडिच्छाया, न उण अज्जउत्तो ! ता किं सच्चकं ज्जेव परिचत्तम्हि ?

(आत्मानमवलोक्य सखेदम्)

मुक्ताहार ! विहारमातनु ननु स्वैरं क्वचित् साम्प्रतं
पुष्पापीड ! किमद्य पीडयसि मे सीमन्तसीमाङ्गणम् ?
मञ्जीराणि ! रणन्ति किं श्रवणयोः पुष्णीथ दुःस्थां व्यथां ?
त्यक्ता तेन यदर्थमर्थितवती युष्मासु मैत्रीमहम् ॥ १४ ॥

राजा—(सरभसमुत्थाय) पतिव्रते ! पतिव्रते ! विशरारूणि प्रायेण शरीरिप्रेमाणि । विशेषतस्तव तस्य भर्तुरकुलीनस्य । तदलममुना गवेषितेन । अस्माकमभ्यर्णमुपेहि । इतः प्रभृति नस्तत्रभवती देवता वा माता वा सुता वा ।

(१) आर्ये ! न च स पापिष्ठस्तव पतिः, किं पुनरेषा प्रतिच्छाया ।

(२) आर्य ! एषा ममैव प्रतिच्छाया न पुनरार्यपुत्रः ! तत् किं सत्यमेव परित्यक्तास्मि ?

सपर्णः—देव! कोऽयं व्यामोहः? ननु विज्ञप्तं मया देवाय नलविमर्शविधेयम्। सिंहासनालङ्करणेन प्रसादः क्रियताम्।

(राजा सविलक्षमुपविशति)

नलः—(सनिर्वेदमात्मगतम्)

मातः! प्रसीद वसुधे! विहितोऽञ्जलिस्ते
पातालमूलपथिकं विवरं प्रयच्छ।
आशीर्लतायतघनेषु फणीन्द्रवक्त्र-
कोणाश्रयेषु ननु येन भवामि शान्तः॥ १५॥

दमयन्ती—(किञ्चित् परिक्रम्य) (१) कथं मज्झण्हो वट्टइ? न सक्केमि दिणेसरतावसंतावेण परिक्कमिदुं।

(ऊर्ध्वमवलोक्य सबाष्पम्)

हा देव दिणेसर! किं दहेसि किरणेहिं देहदहणेहिं?
जइ सो निसढाहिवई अदयमणो किं तुमं पि तहा?॥ १६॥

राजा—(सरभसं दमयन्तीं प्रति)

आः स्त्रीरत्न! पतिव्रते! शठमतेः क्रूरस्य दुष्टात्मनः
पत्युस्तस्य पुनः पुनः सकलुषां मा मा गृहाणाभिधाम्।
तन्नामश्रवणाद् वयं च निखिला पर्षच्च सेयं भटा-
श्चैतेऽसौ ननु बाहुकश्च महता पापेन संलिप्यते॥ १७॥

नलः—(सरोषम्) किमिदमपरिज्ञानमुच्यते देवेन। क्रूरचक्रवर्ती नलोऽस्मि, योऽस्मकाण्डे देवीमेकाकिनीं गहने वने निर्लज्जः समत्यजामि। तस्य महत्यपि पाप्मनि का विशङ्का?

राजा—(ससम्भ्रमम्) कस्त्वमसि?

---

(१) कथं मध्याह्नो वर्तते? न शक्नोमि दिनेश्वरतापसंतापेन परिक्रमितुम्।
हा देव दिनेश्वर! किं दहसि किरणैर्देहदहनैः?
यदि स निषधाधिपतिरदयमनाः किं त्वमपि तथा?॥ १६॥

नलः—(स्वगतम्) कथं विषादमूर्च्छालेन मयाऽऽत्मा प्रकाशितः ! भवतु, (प्रकाशम्) बाहुकमूपकारोऽस्मि ।

राजा—तत् किं नलोऽस्मीत्युक्तवानसि ?

नलः—किमहं नलोऽस्मीत्युक्तवानुतानुक्तमपि नाट्यरसाकुलितचेता देव एवमशृणोत् इति सन्देहः ।

राजा—ध्रुवमहमस्मि भ्रान्तः । अपरथा क्व स महाराजनिषधस्यापत्यं दर्शनीयरूपो नलः, क्व भवान् सर्वाङ्गविकृताकृतिः !

नलः—(ऊर्ध्वमवलोक्य स्वगतम्)

कल्पान्तकल्पमुपकल्प्य महो दिनेश !
मां भस्मसात् कुरुतरामचिराय पापम् ।
विश्वासघातजनितेन न चेदनेन
पापेन हन्त ! नियतं परिगृह्यसे त्वम् ॥ १८ ॥

पिङ्गलकः—(१) अज्जे ! जादि दिणेशलकिलणेहिं आदिचिलं संताविदासि, ता एदम्मि सहयालनिकुंजे पविश।

गन्धारः—(पुरो भूत्वा) इत इत आर्या ।

(सर्वे परिक्रामन्ति)

(विलोक्य सभयं निवृत्य च) आर्ये ! निवर्तस्व निवर्तस्व । चिरमरूढगाढबुभुक्षाक्षामकुक्षिः प्रतिनादमेदुरेण क्ष्वेडानिनादेन समन्ततः शोषयन् वन्यस्तम्बेरमाणां मदजलानि करालजिह्वाजटालवक्त्रकुहरस्तरुणगुञ्जापुञ्जारुणेक्षणः प्रतिक्षणं लोललाङ्गूलदण्डेन साटोपमाच्छोटयन्नवनिपीठमेकः केशरिकिशोरः सहकारनिकुञ्जाभ्यन्तरमधिवसति ।

दमयन्ती—(२) अज्ज ! मज्झे केसरी चिट्ठदि ? दिट्ठिया करिस्सदि मे दुक्खमोक्खं ।

(१) आर्ये ! यदि दिनेश्वरकिरणैरतिचिरं सन्तापिताऽसि, तदेतास्मिन् सहकारनिकुञ्जे प्रविश ।

(२) आर्य ! मध्ये केसरी तिष्ठति ? दिष्ट्या करिष्यति मे दुःखमोक्षम् ।

(विद्गलन्तं विलोक्य सभयं नश्यति)

दमयन्ती—(१) भोदु, उवसप्पामि णं ।

नलः—(विलोक्य ससम्भ्रममात्मगतम्) कथं देवीं पञ्चाननो व्यापादयितुमपक्रान्तः ! हा ! हतोऽस्मि । (विमृश्य) वीराग्रणीः खल्वसौ तदमुं सामप्रयोगेण वारयामि ।

(सरभसमुत्थाय)

एकाकिन्यबला वियोगविधुरा घोरान्तरभ्रान्तर-
क्षोणीपादविहारनिष्ठितवपुस्त्वग्मांसरक्तस्थितिः ।
अस्यां कान्तकरालवक्त्रकुहरे प्रस्थापितायां हरे !
किं शौर्यं भवतोऽतिशायि भविता को वा बुभुक्षाशयः ? ॥ १९ ॥

(विलोक्य) कथं साम्ना न विरमति ? भवतु दानप्रयोगं दर्शयामि ।

अथ तीव्रक्षुधा सत्यमौचित्यमतिवर्तते ।
मुग्धेनां नहि मां भुङ्क्ष्व पतितोऽस्मि तवा(वा)ग्रतः ॥ २० ॥

(इति रङ्गभूमौ पतितुमिच्छति)

राजा—अलमलमतिसम्भ्रमेण । बाहुक ! ननु नाट्यमिदम् ।

नलः—(सलज्जमात्मगतम्) किमिदं मया शोकव्याकुलेन व्यवसितम् ! भवतु । (प्रकाशम्) देव ! करुणारसातिरेकेण विस्मारितोऽस्मि ।

दमयन्ती—(उपसृत्य कण्ठीरवं प्रति)

मा वा प्रीणय नैषधस्य नृपतेः काश्चित् प्रवृत्तिं दिश-
त्यात्मानं यदि वा दिवाकरकरैर्भृष्टेन देहेन मे ।
द्रावय्यत्र यथाविमां मम मनःप्रीत्यै ततस्ते प्रियं
यत् पुष्णात्यचिरात् तदाचर हरे ! मा स्वामिशङ्कां कृथाः ॥ २१ ॥

(विलोक्य) (२) कधं एस परम्मुहो जादो ? न किंपि पडिवयणं पयच्छदि ।

राजा—बाहुक ! ध्रुवमयं मृगारिरेतस्याः पतिव्रताव्रतप्रभावेण प्रतिहतः ।

---

(१) भवतु, उपसर्पाम्येनम् ।

(२) कथमेष पराङ्मुखो जातो ! न किमपि प्रतिवचनं प्रयच्छति ।

नलः—(स्वगतम्) दिष्ट्या स्वयमेव प्रतिनिवृत्तमरिष्टम् । तदहमतः परमुत्थाय नाट्यं निवारयामि । येन मे पुनर्देवीविनिपातदर्शनं न भवति ।

(ससंरम्भमुत्थाय साक्षेपम्)

अपारे कान्तारे व्यसनशतकीर्णे प्रतिदिनं
कियत्कृत्वः सत्त्वं स्फुरति भृशमस्याः फलति च ।
नटा ! नाट्यं हंहो ! तदिह खलु कृत्वोपरमत
यतो द्रष्टुं स्त्रीणां वधविधिमयोग्याः क्षितिभुजः ॥ २२ ॥

सपर्णः—(विहस्य) बाहुक ! किमिदं पुनः पुनरात्मनो विस्मरणम् । कथं नाट्यमपि साक्षात् प्रतिपद्यसे? तद् यथास्थानमुपविश ।

दमयन्ती—(१) कधं एदिणा वि न मे दुक्खमोक्खो कदो ! ता एयम्मि सहयारे अत्ताणं उव्वंधिय वावाएमि । (दिशोऽवलोक्य) हा अज्जउत्त ! एसा तए निक्कारणनिक्करुणेण परिचत्ता असरणा दमयन्ती विवज्जदि । अंबाओ वणदेवयाओ ! कधिद् अज्जउत्तस्स एदं मह वि(व)वसिदं । हा ! अंब पुप्फवदीए ! हा ! ताय भीमरह ! कहिं सि ? देहि मे पडिवयणं । (लतापाशं कण्ठे बध्नाति)

राजा—(सरभसमुत्थाय) भगवति पतिव्रते ! अलमात्मनो विघातेन ।

सपर्णः—बाले ! किमिदमकृत्याचरणम् ?

जीवलकः—आर्ये ! नार्हसि नवे वयसि दुरात्मनः स्वपतेर्निमित्तमकाण्डे प्राणान् परित्यक्तुम् ।

नलः—(ससम्भ्रममुच्चैःस्वरम्) देवि देवि ! अलमत्यनिसाहसेन । नार्हसि मामात्मनो वधेन दुरात्मानं कलङ्कयितुम् । अपि च निस्त्रिंशस्य निर्मर्यादस्य पापीयसः पत्याभासस्य मम कृते वृथा सतीचक्रावतंसमात्मानं व्यापादयसि ।

गन्धारः—(विलोक्य सभयसम्भ्रमम्) अये पिङ्गल ! पिङ्गल ! छिन्धि छिन्धि पाशमस्या यावदियमद्यापि श्वसिति ।

---

(१) कथमेतेनापि न मे दुःखमोक्षः कृतः ! तदेतस्मिन् सहकार आत्मानमुद्बध्य व्यापादयामि । हा ! आर्यपुत्र ! एषा त्वया निष्कारणनिष्करुणेन परित्यक्ताऽशरणा दमयन्ती विपद्यते । अम्बा वनदेवताः ! कथयतार्यपुत्रायैतन्मम व्यवसितम् । हा ! अम्ब पुष्पवति ! हा ! तात भीमरथ ! कुत्रासि ? देहि मे प्रतिवचनम् ।

(पिङ्गलकः सरभसं धावित्वा स्थानात् छिनत्ति । दमयन्ती मूर्छिता पतति)

पिङ्गल ! ध्रुवमियमपश्यन्ती प्रियं क्वापि विपत्स्यते । तदिदानीमुत्पाट्य सार्थवाहाय समर्पयावः । (तथा कृत्वा निष्क्रान्तौ)

गर्भाङ्कः ॥

राजा—परां काष्ठामधिरूढवान् करुणो रसः ।

सपर्णः—देव ! रमणीयो नाट्यविधिः । वर्णार्थबन्धवैदग्धीकामिनामन्तःकरणा ये पुनरभिनयेष्वपि प्रबन्धेषु रसमपजहति विद्वांस एव ते न कवयः ।

न तथा वृत्तवैचित्री श्लाघ्या नाट्ये यथा रसः ।
विपाकमधुरमप्याम्रमुद्वेजयति नीरसम् ॥ २३ ॥

राजा—(स्मृत्वा) बाहुक ! ‘ देवि ! नाहमात्मनो वियोगेन कष्टदुःखितव्यः ’ इत्यभिदधानो नल इव भाषसे । तत् कथय परमार्थं समर्थय नः प्रार्थनाम् । कस्त्वमसि ? किमर्थं च दुःखायसे ?

(प्रविश्य)

प्रतीहारः—देव ! विदर्भाधिपतिप्रेषितो भद्राभिधानः पुरुषो द्वारि वर्तते ।

राजा—(ससम्भ्रमम्) शीघ्रं प्रवेशय ।

प्रतीहारः—यदादिशति देवः

(इत्यभिधाय निष्क्रान्तः । प्रविश्य भद्रः प्रणमति)

राजा—भद्र ! किमर्थं भवत्प्रेषणेनास्मान् विदर्भाधिपतिः [illegible] ?

भद्रः—महाराज ! भीमरथस्य प्राणेभ्योऽपि प्रिया पुत्री समस्ति ।

नलः—(ससम्भ्रमम्) सा खलु दमयन्ती ।

भद्रः—तस्याः तातः स्वयंवरविधिं विदर्भाधिपतिर्विधास्यति ।

नलः—(स्वगतम्) अहो ! धर्मविप्लवः । (पुनः सोत्कण्ठम्) आः ! कृतान्तकटाक्षितो मयि प्राणति दमयन्तीं कः परिणेष्यति ?

राजा—ततः किम् ?

भद्रः—तथा कथञ्चन प्रवर्तितव्यं यथा श्वः स्वयंवरमण्डपदर्शनपर्यन्तमलङ्करोति ।

विश्रान्ताखिलगीतवाद्यविधयः सङ्गीतशालाभुवो
वार्ताक्षिप्तजनस्य पुञ्जिभिरितः पर्याकुला वीथयः ॥ ४ ॥

राजा—(विलोक्य) बाहुक ! यथाऽयं मन्दमन्दरुदितः ससंरम्भमितस्ततः परिधावति पौरलोकस्तथा जाने सम्प्रत्येव कोऽपि विपत्स्यते ।

इतः प्रारभ्यन्ते निचितचितयः पश्य भृतकैः
प्रयाति प्रत्याशं विषमतमतूर्यध्वनिरितः ।
द्विजन्मानोऽप्येते निधनधनविच्छेदचकिताः
ससंरम्भं धावन्त्यपरिचितशूकास्तत इतः ॥ ५ ॥

नलः—देव ! एतं वृद्धब्राह्मणं पृच्छामि ।

(ततः प्रविशति गृहीतयष्टिर्गमनाकुलचेता वृद्धो ब्राह्मणः)

(उपसृत्योच्चैःस्वरम्) आर्यार्य !

ब्राह्मणः—नियोजयतु यजमानः ।

नलः—वैदेशिकत्वादनभिज्ञोऽस्मि वृत्तान्तस्य, तत् कथय किमिदमतितरां करुणम् ?

ब्राह्मणः—महाभाग ! किं कथयामि मन्दभाग्यः ? अकाण्डक्रोधसंरुद्धचेतसा वेधसा सर्वसंहारः प्रारब्धोऽद्य विदर्भपतिकुटुम्बस्य ।

राजा—कथमिव ?

ब्राह्मणः—प्राणेभ्योऽपि प्रिया विदर्भभर्तुरेकैव पुत्री ।

नलः—(स्वगतम्) तत् किं देवी विपन्ना ? अतः परमपि विधिर्विकारं किं किमपि दर्शयिष्यति ? (प्रकाशम्) तत् किं तस्याः ?

ब्राह्मणः—अद्य प्रातरेकेन केनापि वैदेशिकेन राजकुले तत् किमपि प्रकाशितं येन सा चितामधिरोढुमध्यवसिता । पश्य पुरः पुरस्यादवीयसि देशे निकषा सहकारतरुखण्डं तस्याश्चितिर्निर्वर्तते । अपरास्वप्येतासु तिसृषु तस्या एव परिकरलोकः प्रवेक्ष्यति । तदनुजानीहि मां प्राणात्ययसमयप्रवर्त्यमानदानप्रतिग्रहणार्थमुपगन्तुम् ।

राजा—(सविचिकित्समात्मगतम्) अहो ! सर्वातिशायी द्विजन्मनां निसर्गसिद्धो लोभातिरेको यदयमन्त्येऽपि वयसि वृथा वृद्धो निधनधनप्रतिग्रहान्न विरमति ।

नलः—प्रशंसय सिद्धयै ।

मातृगुप्तः—स्वस्ति महाभागाय (इत्यभिधाय मन्दं मन्दं निष्क्रान्तः)

राजा—बाहुक! विप्रलब्धाः केनापि वयं स्वयंवरसमाख्यानेन। तद् यावत् कोऽप्यस्मानुपहसयति तावदित एव स्थानान्निवर्तय पताकिनम्।

नलः—देव! क्षणमस्मिन्नेव स्थाने समोऽस्तिवाम्यताम्, यावदहमग्रतो गत्वा सम्यग् निर्णयामि।

(राजा तथा करोति)

(परिक्रम्य विलोक्य) कथमियं देवी प्राणपरित्यागसमयोचितनेपथ्या चिताभ्यर्णे कपिञ्जलया सह वर्तते! अयमपि कलहंसोऽयमपि खरमुख इयमपि मकरिका।

(ततः प्रविशन्ति यथानिर्दिष्टाः सर्वे)

दमयन्ती—(सास्रम्) (१) कपिञ्जले! पज्जालेहि जलणं जेण मे दुक्खमोक्खं करेदि।

कपिञ्जला—(२) भट्टिणि! विलंबेहि विलंबेहि कित्तियाइं पि दियहाइं, जाव भट्टा सव्वं सुद्धिं लहेदि। न हु पहिगजणसंकहाओ अवितहाओ हवंति।

दमयन्ती—(३) कपिञ्जले! अलाहि विलंबेण। न हु एदं असुदपुव्वं वत्तं सुणीअ पाणे धरेदुं सक्कोमि। अवि अ न हवंति अलियाओ असुहसंसिणीओ वत्ताओ।

नलः—(स्वगतम्) का पुनरशुभशंसिनी वार्ता? भवतु पृच्छामि। (उपसृत्य दमयन्तीं प्रति) आर्ये! किमर्थं मिथोऽयमद्भुतभूतरूपसम्पत्तिपावनं वपुरात्मनो वराकाग्निसात्क्रियते? विरम विरमास्मादध्यवसायात्।

दमयन्ती—(४) वेदेसिअ! न संपदं अवसरो नियपरिदेवणस्स। ता जदि दे दाणेण इच्छा ता गिण्ह, जाव अवसरो मम।

(१) कपिञ्जले! प्रज्वालय ज्वलनं येन मे दुःखमोक्षं करोति।

(२) भर्त्रि! विलम्बस्व विलम्बस्व कियन्त्यपि दिवसान् यावद् भर्ता सर्वां शुद्धिं लभेत। न खलु पथिकजनसङ्कथा अवितथा भवन्ति।

(३) कपिञ्जले! अलं विलम्बेन। न खल्वेतदश्रुतपूर्वां वार्तां श्रुत्वा प्राणान् धारयितुं शक्नोमि। अपि च न भवन्त्यलीका अशुभशंसिन्यो वार्ताः।

(४) वैदेशिक! न साम्प्रतमवसरो निजपरिदेवनस्य। तद् यदि ते दानेच्छा तद् गृहाण यावदवसरो मम।

कलहंसः—(उपसृत्य) वैदेशिक ! शृणु वह्निप्रवेशनिमित्तम् ।

नलं रन्तुं चेतस्तरलमनलं याऽस्य विरहे
सतीभावो यस्यामथ च जगतां विश्रुततमः ।
इयं सा क्षीराक्षी तदपि निषधक्षोणिपतिना
विना दोषोन्मेषादधिवनमपास्ता कथमपि ॥ ६ ॥

नलः—आः ! कथमद्य मातरेव चण्डालचरितस्य तस्य पापीयसो निषधाभर्तुरभिधानं त्वया स्मारितोऽस्मि !

दमयन्ती—(सरोषमात्मगतम्) (१) को एस दुम्मुहो अज्जउत्तं निंददि? (प्रकाशम्) वइदेसिग ! नाहमरण्णे पइणा परिचत्ता, किन्तु सयं मग्गदो परिब्भट्ठा !

कपिञ्जला—(२) पहिय ! जं कलहंसो कहेदि तं सच्चं ।

कलहंसः—निषधाधिपतिरिदानीं विपन्न इति श्रूयते । तत इयं देवी चितामधिरोहति ।

नलः—बाले ! यस्त्वामेकाकिनीमनिमित्तमरण्ये त्यजति तदर्थमेतत् त्रिलोकीलोचनोत्सवो वपुरग्निसात् क्रियत इति न मे मनसि समीचीनमाभाति । अपि च मुग्धे ! किं पावकदग्धैः स एव प्रियः प्राप्यते ? तैस्तैः शुभैरशुभैर्वा कर्मभिर्भिन्नवर्तिनीसञ्चरिष्णवः सर्वे जन्तवः ।

कलहंसः—पान्थ ! नायं तस्यैव प्रियस्य प्राप्त्यर्थं न च धर्मार्थं प्रयत्नः, किन्तु क्षत्रियाचारानुचारार्थं प्रियाप्रियनिवृत्त्यर्थं च ।

नलः—(स्वगतम्) अहो ! कौतुकम् ! एतामहमरण्ये व्यालानां बलिं कृतवान् । इयं पुनर्ममाप्रियनिवृत्त्यर्थं प्राणान् परित्यजति ।

स्वमेकः पररक्षार्थं विनिहन्ति विपत्तिषु ।
स्वरक्षार्थं परं त्वन्यश्चित्रं चित्रा मनोगतिः ॥ ७ ॥

दमयन्ती—(३) कपिञ्जले ! उवणेहि हुयासणं जेण चिदं पज्जालेमि ।

---

(१) क एष दुर्मुख आर्यपुत्रं निन्दति ? वैदेशिक ! नाहमरण्ये पत्या परित्यक्ता, किन्तु स्वयं मार्गतः परिभ्रष्टा ।

(२) पथिक ! यत् कलहंसः कथयति तत् सत्यम् ।

(३) कपिञ्जले ! उपनय हुताशनं येन चितां प्रज्वालयामि ।

---

१ ख, ग.॰चरणा॰

कपिञ्जला—(१) भट्टिणि! अहं वि हुयासणमणुसरिस्सं।

दमयन्ती—(२) कपिञ्जले! मा एवं भण। तए अंबा संधारियव्वा।

कपिञ्जला—(३) भट्टिणी पुप्फवदी वि तुह मग्गं अणुसरिदु-मिच्छदि, परं भट्टा वारेदि।

दमयन्ती—(४) संतं संतं पडिहदममंगलं। णं अंबा तायसुस्सूसणे चलणसुस्सूसिणी भविस्सदि।

कपिञ्जला—(५) भट्टा वि तुह दुक्खेण थोवजीविदो संभावीयदि।

नलः—(स्वगतम्) उपस्थितः सर्वसंहारस्तदतः परं नार्हामि गोपयितुमात्मानम्। (प्रकाशम्) बाले! यदि ते पतिः कुतोऽपि सन्निधीयते, तदा निवर्तसे साहसादस्मात्?

दमयन्ती—(६) पहिय! किं मं उवहसेसि? नत्थि मे इत्तियाइं भागधेयाइं, जेहिं पुणो वि अज्जउत्तं पिच्छामि। कपिंजले! उवणेहि जलणं।

(कपिञ्जला ज्वलनमुपनयति। दमयन्ती चितां प्रज्वालयति)

कलहंसः—देवि! प्रथममहमात्मानं भस्मसात् करोमि।

खरमुखः—(७) नहि नहि अहं पढमं।

मकरिका—(८) चिट्ठंदु सव्वे वि, पढमं अहं चिदाए पविसिस्सं। न सक्केमि तुम्हाण मरणं पिच्छिदुं।

---

(१) भर्त्रि! अहमपि हुताशनमनुसरिष्यामि।

(२) कपिञ्जले! मैवं भण। त्वयाऽम्बा सन्धारयितव्या।

(३) भर्त्री पुष्पवत्यपि तव मार्गमनुसरितुमिच्छति, परं भर्ता वारयति।

(४) शान्तं शान्तं प्रतिहतममङ्गलम्। नन्वम्बा तातपादानां चरणशुश्रूषिणी भविष्यति।

(५) भर्तापि तव दुःखेन स्तोकजीवितः सम्भाव्यते।

(६) पथिक! किं मामुपहससि? न सन्ति ममैतावन्ति भागधेयानि, यैः पुनरप्यार्यपुत्रं पश्यामि। कपिञ्जले! उपनय ज्वलनम्।

(७) नहि नहि अहं प्रथमम्।

(८) तिष्ठन्तु सर्वेऽपि, प्रथममहं चितां प्रवेक्ष्यामि। न शक्नोमि युष्माकं मरणं द्रष्टुम्।

नलः—(स्वगतम्) उक्तं भुजगरूपधारिणा तातेन 'यदि ते स्वरूपेण प्रयोजनं भवति तदा मामनुस्मरेः'। (पटं प्रावृत्य स्मरणं नाटयति। पुनरात्मानं विलोक्य) कथं नल एवास्मि जातः।

दमयन्ती—(१) भयवं हुयासण ! नमो दे । भयवंतो लोकपाला ! कधेहिं एदं मह चरिदं परलोगगयस्स अज्जउत्तस्स ।

(नेपथ्ये)

हा वत्से ! क मामेकाकिनं चरमे वयसि परित्यज्य प्रयासि ? (२) हा हरिणनयणे ! मयंकवयणे ! सिरीससोमाले ! वत्से ! किं अत्तणो मरणेण भीमरहं मारेसि ?

दमयन्ती—(आकर्ण्य) (३) नूणं मं वारिदुं तादो अंबा य समागच्छदि, ता लहुं पविसेमि। (चितां प्रदक्षिणीकृत्याधिरोढुमिच्छति)

नलः—(ससम्भ्रमं बाहौ गृहीत्वा)

येनाकस्मात् कठिनमनसा भीषणायां कराल-
व्यालानां त्वं वनभुवि हतेनातिथेयीकृतासि ।
निर्लज्जात्मा विकलकरुणो विश्वविश्वस्तघाती
पत्याभासः सरलहृदये ! देवि ! सोऽयं नलोऽस्मि ॥ ८ ॥

(दमयन्ती प्रत्यभिज्ञाय परिरभ्य चोच्चैःस्वरं रोदिति। कलहंसादयः सर्वे प्रणम्य रुदन्ति)

न प्रेम रंचितं चित्ते न चाचारः सतां स्मृतः ।
त्यजता त्वां वने देवि ! मया दारुणमाहितम् ॥ ९ ॥

---

(१) भगवन् हुताशन ! नमस्ते। भगवन्तो लोकपालाः ! कथयतैतन्मम चरितं परलोकगतायार्यपुत्राय ।

(२) हा ! हरिणनयने ! मृगाङ्कवदने ! शिरीषसुकुमारे ! वत्से ! किमात्मनो मरणेन भीमरथं मारयसि ?

(३) नूनं मां वारयितुं तातोऽम्बा च समागच्छति, तल्लघु प्रविशामि ।

१ ख, ग भुजंग० । २ ख, ग. किंचि० । ३ ख, ग. महा० ।

यस्तत्रापि प्रेम्णा न प्रसाद्यते, सोऽहं सर्वथा खलु खलप्रकृतिरस्मि ।

न प्रेम नौपधं नाज्ञा न सेवा न गुणो न धीः ।
न कुलं न धर्मं न श्रीर्दुर्जनस्य प्रशान्तये ॥ १० ॥

किञ्च—

छिन्नेषु रावणे तुष्टः शम्भुर्दशसु मूर्धसु ।
शतेऽपि शिरसां छिन्ने दुर्जनस्तु न तुष्यति ॥ ११ ॥

कलहंसः—किमिदं विषादमूर्च्छालीनानौचित्यविच्छिन्नं विपद्यते देवेन । न खलु सतामग्रणीर्निषधाधिपतिः स्वप्नेऽपि खलो भवितुमर्हति ।

नलः—देव्या अपि दाक्षिण्यमधिमनगमनादधानः कथं नास्मि खलः !

परसम्पत्समुत्कर्षद्वेषो दाक्षिण्यहीनता ।
द्वयमेतत् खलत्वस्य प्रथमं प्राणितं स्मृतम् ॥ १२ ॥

अलं कृत्वा वा दुश्चरितस्मरणम् । कथय तावत् केनेदममङ्गल्यमावेदितम् !

कलहंसः—देव ! एतेन वैदेशिकेन भरतकनाम्ना खञ्जकुण्डेन मुनिना ।

नलः—(सरोषम्) तं दुरात्मानमिहानयत ।

(ततः प्रविशति निबन्धितभुजस्तापसः)

(प्रत्यभिज्ञाय साक्षेपम्) आः पाप ! स एवासि येनाहमरण्ये प्रतार्य देवीं सन्त्याजितः ।

तापसः—नाहमरण्यं जगाम, न च त्वां प्रतारयामास ।

नलः—(सरोषम्) अरे ! अपसर्प कर्णेजप ! आखून ! प्रमत्तराक्षस ! अविश्रान्त ! अपदावानल ! साम्प्रतमपि मां प्रतारयसि ? ताडयत भोः ! दुरात्मानमेनं कशाभिः ।

(प्रविश्य कशाहस्तपुरुषास्ताडयन्ति)

तापसः—(सकरुणमुपेत्य) मा मा ताडयत, सत्यमावेदयामि ।

नलः—आवेदय ।

तापसः—कर्णोदर एवाहम् । यदा विदर्भनिर्वासितः कूबरान्तिकं पौरलोकेन नीतः । पौरलोकेनैव कर्पटवेषं कुर्वतोऽन्तर्वासितपरामर्शं प्रयाभिन्नः । देवेनोपदिष्टेन च मया स्वमरण्ये दमयन्त्याः त्याजितः । इदानीं स्वदाक्षिण्यदानः कृतः ।

नलः—देवि ! क्षमस्व मया निर्निमित्तमपाकृतासि ।

दमयन्ती—(१) मह णिमित्तं पोरयोणेन ईदिसमवत्थं णं अज्जउत्तो लंभिदो । ता अहं अज्जउत्तस्स अवराहिणी, न उणो मह अज्जउत्तो ।

कलहंसः—साधु देवि ! साधु पतिव्रतानामेष एव वाग्विभवः । देवोऽपि देवीमपहाय किमनुभूतवान् ?

नलः—देवीमपहाय कर्मेणाहम् 'एहि महापुरुष ! त्रायस्व माम्' इति प्रतिशुश्रुत्याहरन्तं दवानलज्वालाजटालवपुषमेकमाशीविषमद्राक्षम् ।

सर्वे—(सकौतुकम्) ततस्ततः ।

नलः—ततः स दवानलात्कृष्टो मां दष्ट्वा विकृतरूपं कृतवान् । देवतारूपं च विधाय 'सोऽहं तव पिता महाराजनिषधस्त्वत्कृपया समागतवान्' इति व्याहरत् ।

दमयन्ती—(२) तदो ।

नलः—'मा भैर्षीरतः परं द्वादशसु वर्षेषु पुनः प्रियादर्शनं ते भविष्यति' इत्यभिधाय तावत् तिरोऽभूत् । ततोऽहं क्रमेण सूपकारव्याजेन दधिपर्णाभ्यर्णे स्थितवान् ।

(नेपथ्ये)

प्रवर्त्यन्तां मङ्गलानि, प्रसाध्यन्तां मौक्तिकस्वस्तिकैः प्राङ्गणभुवः, प्रवर्त्यन्तां सङ्गीतकानि । ननु मनोरथानामप्यभूमिर्वत्सायाः प्रिया प्रियमासिरभूत् ।

कलहंसः—(ससम्भ्रमम्) कथं विदर्भाधिपतिरितोऽभ्येति ?

(ततः प्रविशति पुष्पवत्या सह राजा भीमरथः । सर्वे ससम्भ्रममुत्थाय प्रणमन्ति)

राजा—(नलं प्रति) 'यो दमयन्तीं परिणेष्यति तस्याहं राज्यभ्रंशं करिष्यामि' इति स्वप्रतिज्ञा पोरयोणेन समर्थिता । पोरयोणः पुनः किल कलचुरिपतेर्दमयन्तीपरिणयनाभिलाषुकस्य चित्रसेनस्य मेषमुखनामा प्रणिधिः । अयमपि पोरयोणाशिष्यो लम्बोदरश्चित्रसेनस्यैव कोष्ठकाभिधानश्चर एव ।

कलहंसः—देव ! निषधाधिपते ! तेऽमी चित्रसेन-मेषमुख-कोष्ठकाः, यान् मत्तमयूरोद्यानस्थितैर्देवो लेखे दृष्टवान् ।

(१) मम निमित्तं पोरयोणेन ईदृशीमवस्थां नन्वार्यपुत्रो लम्भितः । तदहमार्यपुत्रस्यापराधिनी, न पुनर्ममार्यपुत्रः ।

(२) ततः ।



GAEKWAD'S ORIENTAL SERIES.

Critical editions of unprinted Sanskrit Works, edited by competent scholars, and published by the Central Library, Baroda.

I. BOOKS PUBLISHED.

1. Kāvyamīmāṁsā : a work on poetics, by Rājaśekara (880-920 A.D.) : edited by C. D. Dalal, M.A., and R. Anantakrishna Sastry, 1916. Re-issue, 1924 2-4
2. Naranārāyanānanda : a poem on the Paurānic story of Arjuna and Kṛṣṇa's rambles on Mount Girnar, by Vastupāla, Minister of King Viradhavala of Dholka, (A.D. 1221 and 1231) : edited by C. D. Dalal and R. Anantakrishna Sastry, 1916 1-4
3. Tarkasaṅgraha : a work on Philosophy (Refutation of Vaiśeshika theory of automatic creation) by Ānandajñāna or Anandagiri, the famous commentator on Śaṅkarāchārya's Bhāṣyas, who flourished in the latter half of the 13th century : edited by T. M. Tripathi, B.A., 1917 2-0
4. Pārthaparākrama : a drama describing Ārjuna's recovery of the cows of King Virāṭa, by Prahlādanadeva the founder of Pālanpur and the younger brother of the Paramāra King of Chandrāvati, (a state of Mārwār), and a feudatory of the kings of Guzerat, who was a Yuvarāja in Samvat 1220 (A. D. 1164) : edited by C. D. Dalal, M.A., 1917 0-6
5. Rāshtraudhavaṁśa : an historical poem (Mahākāvya) describing the history of the Bagulas of Mayūragiri, from Rāshtraudha, king of Kanauj and the originator of the dynasty, to Nārāyana Shah of Mayūragiri, by Rudra Kavi composed in Saka 1518 (A. D. 1596) : edited by Pandit Embar Krishnamacharya with introduction by C. D. Dalal, M.A., 1917 1-12
6. Liṅgānuśāsana : on Grammar, by Vāmana, who lived between the last quarter of the 8th century and the first quarter of the 9th century : edited by C. D. Dalal, M.A., 1918 0-8
7. Vasantavilāsa : an historical poem (Mahākāvya) describing the life of Vastupāla and the history of Guzerat by Bālachandrasūri, from Modheraka (or Modhera in Kadi Prant, Baroda State), contemporary of Vastupāla, composed after his death for his son in Samvat 1296 (A. D. 1240) : edited by C. D. Dalal, M. A. 1917 ... 1-8
8. Rūpakasatkam : six dramas by Vatsarāja, minister of Paramardideva of Kalinjara, who lived between the 2nd half of the 12th century and the 1st quarter of 13th century : edited by C. D. Dalal, M.A., 1918 2-4

9. Mohaparâjaya : an allegorical drama describing the overcoming of King Moha (Temptation), or the conversion of Kumârapâla, the Chalukya King of Guzerat to Jainism, by Yaśahpâla, an officer of King Ajayadeva, son of Kumârapâla, who reigned from A. D. 1229 to 1232 : edited by Muni Chaturvijayaji ; with Introduction and Appendices by C. D. Dalal, M. A., 1918 2-0
10. Hammiramadamardana : a drama glorifying the two brothers Vastupâla and Tejahpâla and their King Vîradhavala of Dholka, by Jayasimhasûri, pupil of Vîrasûri and an Âcharya of the temple of Munisuvrata at Broach, composed between Samvat 1267 and 1286 (A. D. 1220 and 1239) : edited by C. D. Dalal, M.A., 1920 ... 2-0
11. Udayasundarîkathâ : a romance (Champu, in prose and poetry) by Soḍḍhala, who was a contemporary of and patronised by the three brothers Chchittarâja, Nâgârjuna, and Mummanirâja, successive rulers of Konkan, composed between A. D. 1026 and 1050 : edited by C. D. Dalal, M.A., and Pandit Embar Krishnamacharya. 1920 2-4
12. Mahâvidyâvidambana : a work on Nyâya Philosophy, by Bhatta Vâdîndra (A.D. 1210 to 1274) : edited by M. R. Telang. 1920. 2-4
13. Prâchînagurjarakâvyasangraha : a collection of old Gujarati poems dating from 12th to 15th centuries A. D : edited by C. D. Dalal, M.A., 1920 2-4
14. Kumârapâlapratibodha : a biographical work in Prâkrita, by Somaprabhâchârya composed in Samvat 1241 (A.D. 1195) : edited by Jinavijayaji. 1920 7-8
15. Ganakârikâ : a work on Philosophy (Pâśupata School) by Bhâsarvajña Muni, who flourished in the 2nd half of the 10th century : edited by C. D. Dalal, M.A. 1921 1-4
16. Sangîtamakaranda : a work on Music, by Nârada : edited by M. R. Telang. 1920 2-0
17. Kavîndrâchârya List : List of Sanskrit works in the collection of Kavîndrâchârya, a Benares Pandit (1656 A. D.) : edited by R. Anantakrishna Sastry with a foreword by Dr. Ganganatha Jha. 1921. 0-12
18. Vârâhagrihyasûtra ; Vedic ritual (domestic) of the Yajurveda edited by Dr. R. Shamashastry. 1920 0-12
19. Lekhapaddhati : a collection of models of state and private documents dating from 8th to 15th centuries A. D : edited by C. D. Dalal, M. A., and G. K. Shrigondekar, M.A. 1925 ... 2-0

[illegible] romance in Apabhramśa [illegible] edited by C. D. Dalal, M[illegible] 6-0

21. A Descriptive Catalogue of the Palm-leaf and Important Paper MSS in the Bhandars at Jessalmer, compiled by C. D. Dalal, M.A. and edited by L. B. Gandhi. 1924 3-4

22, 23. Paras'urâmakalpasûtra: a work on Tantra, with commentary by Râmes'vara and Padibati by Umânanda: edited by Mahadeva Sâstry, B.A., 2 vols. 1923 11-3

24. Tantrarahasya: a work on the Prabhâkara School of Pûrvamîmâmsâ by Râmânujâchârya: edited by Dr. R. Shamasastry, 1923 .. 1-8

25. Samarângana: a work on Architecture, town planning and engineering by King Bhoja of Dhara (11th century). edited by Mahamahopadhyâya T. Ganapati Sastry, Ph.D., etc., 2 vols. Vol. I, 1924 5-0

26. [illegible] dated 1165 A.D. [illegible] by distinguished [illegible] General Editor, [illegible] ... 5-0

27. A Descriptive Catalogue of MSS in the Central Library, Baroda Vol. I (Veda, Vedalakshana and Upanisads), compiled by G. K. Shrigondekar, M.A., and K. S. Ramaswami Sastry. 1925 ... 6-0

28. Mânasollâsa or Abhilashitârthachintâmani an encyclopedic work divided into one hundred chapters treating of one hundred different topics by Somes'varadeva, a Châlukya King of the 12th century: edited by G. K. Shrigondekar, M.A., 3 vols. vol. I 1925 ... 2-12

29. Nalavilâsa: a drama by Râmachandra Sûri, disciple of Hemachandra Sûri, describing the Paurânik story of Nala and Damayanti edited by Messrs. G. K. Shrigondekar, M.A. and L. B. Gandhi, 1926 ... 2-4

30, 31. Tattvasangraha a Buddhist Philosophical work of the 8th century by Sântarakshita, (705-762 A. D.) a Professor at the Nâlandâ University, with Pañjikâ (commentary) by his disciple Kamalas'îlâ, also a Professor in Nâlandâ: edited by Pandit Embar Krishnamâchârya with a foreward by the General editor, 2 vols. 1926 ... (Sh.er y)

32. Samarângana, Vol. II, edited by Mm. T. Ganapati Sastri, Ph. D. of Trivandrum. 1925 6-0

33. Advayavajrasangraha: consisting of twenty short works on Buddhist philosophy by Advayavajra, a Buddhist savant belonging to the 11th century A.D.: edited by Mahâmahopâdhyâya Pandit Haraprasad Sastri, M.A., C.I.E., [illegible]